सामाजिकविज्ञानम्

अस्माकम् अतीतः -1

षष्ठकक्ष्यायै इतिहासस्य पाठ्यपुस्तकम्

सामाजिक-विज्ञानम्

अस्माकम् अतीतः - 1

षष्ठ-कक्षायाः कृते इतिहासस्य पाठ्यपुस्तकम्

विद्यया ऽमृतमश्नुते

एन सी ई आर टी
NCERT

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्

NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

फरवरीमासः 2016 इत्यस्मात् संस्करणात्
अस्माभिः संस्कृतानुवादः कृतः ।

आमुखम्

राष्ट्रियपाठ्यचर्यायाः रूपरेखा (2005) ज्ञापयति यत् बालकानां यत् विद्यालयीयं जीवनम् अस्ति तद् विद्यालयीयं जीवनं बाह्य-जीवनेन सह योजनीयम्। अयं सिद्धान्तः पुस्तकीयस्य ज्ञानस्य तस्य न्यायस्य विपरीतः अस्ति यस्य प्रभाववशात् अस्माकं व्यवस्था अद्यावधि विद्यालयस्य गृहस्य च मध्ये अन्तरालं कल्पितवती। नूतनायां राष्ट्रिय-पाठ्यचर्यायाम् आधारितः पाठ्यक्रमः पाठ्यपुस्तकानि च अस्मिन् आधारभूते विचारे क्रियान्वयनस्य प्रयासः अस्ति। एतस्मिन् प्रयासे प्रत्येकं विषयं एकया दृढतरया भित्त्या आवरणस्य सूचनायाः संस्मारणस्य च प्रवृतेः विरोधः अपि सम्मिलितः अस्ति। आशासे यत् एते उपायाः अस्मान् राष्ट्रिय-शिक्षा-नीतौ (1986) वर्णितानां बालकेन्द्रितानां व्यवस्थानां दिशि अत्यधिकं दूरं यावत् नेष्यन्ति।

एतस्य प्रयत्नस्य साफल्यम् अधुना एतस्मिन् तथ्ये आश्रितम् अस्ति यत् विद्यालयानाम् आचार्याः अध्यापकाः च बालकान् कल्पनाशीलानां गतिविधीनां प्रश्नानां च साहाय्येन शिक्षणस्य काले च स्वस्य अनुभवैः चिन्तनस्य कियतः अवसारान् कल्पयन्ति। अस्माकम् एतत् मन्तव्यं स्यात् यत् यदि समयं स्थानं स्वतन्त्रतां च बालकेभ्यः प्रयच्छामः तर्हि बालकाः ज्येष्ठैः प्रदत्ताभिः सूचना-सामग्रीभ्यां युक्त्वा सङ्घर्षं च कृत्वा नूतनस्य ज्ञानस्य सर्जनं कुर्वन्ति। शिक्षायाः विविधानां साधनानाम् एवञ्च स्रोतसाम् अवहेलनस्य प्रमुखं कारणं पाठ्यपुस्तकं परीक्षायाः एकमात्रम् आधारस्य निर्माणस्य प्रवृत्तिः अस्ति। सर्जनस्य प्रारम्भस्य च विकासार्थम् आवश्यकम् अस्ति यत् बालकाः शिक्षणस्य प्रक्रियायां सहभागिनः सन्ति इति अङ्गीकुर्युः अपि च तान् सहभागिनः कुर्वन्तु, ते बालकाः ज्ञानस्य निर्धारितायाः मात्रायाः ग्राहकाः सन्ति इति मन्तव्यं त्यजन्तु।

एते उद्देश्याः विद्यालयस्य दैनिके जीवने कार्यशैल्यां च अत्यधिकस्य परिवर्तनस्य याचनां कुर्वन्ति। दैनन्दिन्यां समय-सारण्यां स्थितिस्थापकत्वम् (लचीलापन) तावदेव आवश्यकम् अस्ति यावत् वार्षिकस्य कालन्धरस्य क्रियान्वयने जागरूकता, यतः शिक्षणस्य कृते नियतानां दिनानां सङ्ख्या वास्तविकं रूपं स्वीकुर्यात्। शिक्षणस्य मूल्याङ्कनस्य च विधयः अपि एनं विषयं निर्धारीकरिष्यन्ति यत् इदं पाठ्यपुस्तकं विद्यालये बालानां जीवनानि मानसिकस्य उद्वेगस्य खिन्नतायाः च स्थाने हर्षस्य वातावरणस्य निर्माणे कियता प्रभाविरूपेण चरितार्थं भविष्यति। भारस्य समस्यायाः समाधानार्थं पाठ्यक्रमस्य निर्मातारः विभिन्नेषु चरणेषु ज्ञानस्य पुनर्निर्धारणस्य समये बालानां मनोविज्ञानं मनसि निधाय एवञ्च अध्यापनस्य कृते उपलब्धः समयः कियान् अस्ति इति एतस्य विषयस्य अवधानं पूर्वापेक्षया अधिकेन सचेतरूपेण करणस्य प्रयासः कृतः। एषः प्रयासः इतोऽपि गभीरतया स्यात् एतस्मिन् प्रयत्ने इदं पाठ्यपुस्तकं चिन्तनस्य विषयस्य कृते आश्चर्यस्य लघुषु समूहेषु वार्तालापस्य कृते तथा च चर्चायाः कृते हस्ताभ्यां क्रियामाणानां गतिविधीनां कृते प्राथमिकतां प्रयच्छति।

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद् एतस्य पुस्तकस्य रचनायाः कृते निर्मितस्य पाठ्यपुस्तक-निर्माण-समितेः परिश्रमस्य कृते कृतज्ञतां प्रकटीकरोति। परिषद् सामाजिक-विज्ञानम् इति पाठ्यपुस्तकस्य परामर्शदातृ-समितेः अध्यक्षस्य प्रोफेसर-हरि-वासुदेवन-महोदयस्य तथा च

एतस्य पाठ्यपुस्तकस्य समितेः मुख्यपरामर्शदातुः नीलाद्रिभट्टाचार्यस्य विशेषरूपेण आभारिणी अस्ति। एतस्य पाठ्यपुस्तकस्य विकासे बहुभिः शिक्षकैः योगदानं कृतम्। एतं योगदानं सफलीकर्तुं वयं तेषां प्राचार्याणाम् अपि अभारिणः स्मः । वयं तानि सर्वाणि सङ्घटनानि संस्थाः च प्रति कृतज्ञाः स्मः ये अस्माकं स्वस्य सामग्र्या सहयोगिभ्यः साहाय्यस्य स्वीकरणे च उदारतापूर्वकं सहयोगं कृतवन्तः।

वयं माध्यमिक-शिक्षा-विभागस्य तथा च उच्चशिक्षाविभागस्य मानव-संसाधन-विकास-मन्त्रालय-द्वारा नियुक्तस्य प्रोफेसर-मृणाल-मोरी-महोदयस्य अपि च प्रोफेसर-जी.पी.देशपाण्डे-महोदयस्य अध्यक्षतायां निर्मितायां निरीक्षण-समितेः सदस्यानां कृते ये स्वकीयं मूल्यवन्तं समयं सहयोगं च दत्तवन्तः तेषां कृते वयं धन्यवादस्य ज्ञापनं कुर्मः । व्यवस्थागतानां परिष्काराणां कृते प्रकाशनेषु च नैरन्तर्येण तस्मिन् परिष्कारे नावीन्यम् आनेतुं समर्पिता परिषद् टिप्पणीनां परामर्शानां च स्वागतं करिष्यति। यतः भाविसंशोधनेषु स्वीकर्तुं शक्यं स्यात्।

निदेशकः

नवदेहली
२० नवम्बरः २००६

राष्ट्रिय शैक्षिकानुसन्धानं
प्रशिक्षण परिषद् च

पाठ्यपुस्तक-निर्मातृ-समितिः

अध्यक्षः, सामाजिकविज्ञान-पाठ्यपुस्तक-परामर्शदातृ-समितिः

हरिवासुदेवनः, प्रोफेसरः, इतिहासविभागः, कलकत्ताविश्वविद्यालयः, कोलकाता

मुख्यपरामर्शदाता

नीलाद्रिभट्टाचार्यः, प्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

परामर्शदाता

कुमकुमरायः, एसोशिएटप्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

सदस्याः

जयामेननः, रीडरः, इतिहासविभागः, अलीगढमुस्लिमविश्वविद्यालयः, अलीगढम्।

पी.के.बसंतः, *रीडरः*, इतिहाससंस्कृतिविभागः, मानविकीभाषासंकायः, जामियामिल्लिया-इस्लामिया, नवदेहली।

रनबीरचक्रवर्ती, *प्रोफेसरः*, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

विश्वमोहनझा, *रीडरः*, इतिहासविभागः, आत्मारामसनातनधर्ममहाविद्यालयः, दिल्लीविश्वविद्यालयः, नवदेहली।

एन.पी.सिंहः, प्रधानाचार्यः,राष्ट्रियप्रतिभाविकासविद्यालयः, नवदेहली।

शुचिबजाजः, पी.जी.टी. (इतिहासः),स्प्रिंगडेल्सस्कूल, नवदेहली।

गौरीश्रीवास्तवः, *रीडरः*, महिलाध्ययनविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

अनिलसेठी, *प्रोफेसरः*, सामाजिकविज्ञानशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्

हिन्द्यनुवादः

हीरामनतिवारी, असिस्टेंटप्रोफेसरः, इतिहासाध्ययनकेन्द्रम्, जवाहरलालनेहरुविश्वविद्यालयः, नवदेहली।

नूतनझा, शिक्षिका, मीराम्बिकास्कूल, श्री अरविन्दो आश्रमः, नवदेहली।

पी.के.बसन्तः

सीमाएस.ओझा

सदस्य-समन्वयकः

सीमा एस.ओझा, प्रवक्त्री, सामाजिकविज्ञानशिक्षाविभागः, राष्ट्रियशैक्षिकानुसन्धानप्रशिक्षणपरिषद्।

भारतीय-संविधानम्

उद्देशिका

वयं भारतीयाः, भारतदेशम् एकं [1][**सम्पूर्ण-प्रभुत्व-सम्पन्नम्, समाजवादि, पंथ-निरपेक्षम्, लोकतन्त्रात्मक-गणराज्यं**] निर्मातुं तथा च तस्य समस्तनागराणां कृते;

सामाजिकम् आर्थिकं तथा च राजनैतिकं न्यायम्, विचारस्य,
अभिव्यक्तेः, विश्वासस्य, धर्मस्य,

उपासनायाः च स्वतन्त्रताम्,
प्रतिष्ठायाः अवसरस्य च समतां
प्रापयितुं

तथा च तेषु **सर्वेषु** मानवीयगौरवस्य तथा च [2][**राष्ट्रियैकतायाः अखण्डतायाश्च**] **सुनिश्चयकर्त्रीं** बन्धुतां संवर्धयितुं.....

दृढसंकल्पाः भूत्वा **अस्यां स्वसंविधानसभायाम्** अद्य नवम्बरमासस्य 26 तमे दिनाङ्के 1949 तमे ख्रीस्ताब्दे (मार्गशीर्षे शुक्लसप्तम्यां 2006 तमे विक्रमसंवत्सरे) **एतत् संविधानम् अङ्गीकुर्मः अधिनियमितं तथा च आत्मार्पितं कुर्मः ।**

---

1. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "प्रभुत्व-सम्पन्नलोकतन्त्रात्मक-गणराज्यम्" इत्यस्य स्थाने प्रतिस्थापितम् ।

2. संविधानाधिनियमः (द्वाचत्वारिंशं संशोधनम्) 1976 इत्यस्य द्वितीय-धारायाः द्वारा (3.1.1977 तः) "राष्ट्रस्य एकता" इत्यस्य स्थाने प्रतिस्थापितम् ।

इतिहासं किमर्थं पठेम ?

अस्मिन् वर्षे षष्ठकक्षायां भवन्तः इतिहासं पठिष्यन्ति । कैश्चित् अन्यैः विषयैः सह इतिहासः समाजिकविज्ञानस्य भागः मन्यते । समाजविज्ञानेन वयं सामाजिकविश्वस्य कार्यप्रणाल्याः विषये सरलतया अवगच्छामः । समाजविज्ञानम् अस्मान् जीवनस्य विभिन्नपक्षाणां विषये बोधयति, वयं अनेन समाजविज्ञानेन अर्थव्यवस्थायाः सामाजिकराजनैतिक-जीवनयोः व्यवस्थाविषये अपि ज्ञास्यामः । इतिहासम् अतिरिच्य समाजिकविज्ञानस्य अन्ये विषयाः प्रायः वर्तमानसंसारस्य विषये एव सूचयन्ति । इतिहासः बोधयति यत् वर्तमानसंसारः कथं विकसितः । इतिहासः अस्मान् वर्तमानकालस्य यः अतीतः अस्ति तस्मिन् विषये बोधयति ।

वयं यस्मिन् समाजे निवसामः तस्य परिवेशे वासस्य अस्माकं स्वभावः जायते। वयं मन्यामहे यत् संसारः सर्वदा एतादृशः एव आसीत् । वयं विस्मरामः यत् जीवनं सर्वदा एतादृशं नासीत् यादृशम् अद्य दृश्यते। उदाहरणार्थं किं भवन्तः एतादृशस्य संसारस्य कल्पनां कुर्तुं शक्नुवन्ति यत्र वह्निः न स्यात् ? कथं वासः स्यात् एतादृशे संसारे यत्र कृषिकार्यस्य आविष्कारः न कृतः स्यात् ? अथवा तस्मिन् युगे जीवनं कीदृशं स्यात् यदा जनाः लम्बतराः यात्राः तु कर्तुं शक्नुवन्ति स्म परन्तु न राजमार्गाः आसन् न रेलयानानि आसन् ? इतिहासः आस्मान् तादृशान् अतीतान् प्रति अस्मान् नेतुं शक्नोति ।

अनेन प्रकारेण इतिहासः काचित् रोमाञ्चकयात्रा अस्ति । इयं यात्रा भवतः संसारविषये सर्वं सूचयति । इयम् अस्मान् पृथक्संसारे पृथक्युगे च नयति यत्र जनानां जीवनं पृथगासीत् । तेषाम् अर्थव्यवस्था-समाज-मान्यता-विश्वास-वस्त्र–गृह-निवास-कला-शिल्पानि इति एतानि सर्वाणि पृथक् आसन् । इतिहासः एतादृशस्य संसारस्य विषये अस्मान् बोधयितुं शक्नोति ।

भवताम् एतस्मिन् विषये अस्वीकृतिः भवितुं शक्नोति यत् वयं अतीतकालस्य घटनाः वार्ताः वा किमर्थं जानीयाम ताः चिन्तयित्वा किमर्थं चिन्तामग्नाः भवेम याः अधुना न सन्ति ।

परन्तु इतिहासः केवलम् अतीतकालस्य विषये नास्ति परन्तु वर्तमानस्य विषये अपि अस्ति । अद्य वयं यस्मिन् संसारे स्मः तस्य निर्माणं अस्मत्पूर्वजाः कृतवन्तः । तेषां जीवने ते यानि सुखदुःखानि सोढवन्तः तात्कालिकसमस्याः समाधातुं तेषां प्रयासाः आविष्काराः च आसन् एतेषां कारणात् एव मानवसमाजस्य परिवर्तनम् अभूत् । एतानि परिवर्तनानि प्रायः शनैः शनैः भवन्ति स्म तस्मात् तात्कालिकजनाः अपि तेषां विषये न जानन्ति स्म । अधुना अतीतकालस्य उपरि इतिहासविषयं पठित्वा यदा वयं दृष्टिपातं कुर्मः तदा वयं जानीमः यत् परिवर्तनानि कथम् अभवन् । इतिहासं पठित्वा एव वयं चिरकालात् शनैः शनैः जातानां परिवर्तनानां प्रभावं द्रष्टुं शक्नुमः । इतिहासं पठित्वा एव वयम् अवगन्तुं शक्नुमः यत् आधुनिकसंसारः यत् दृश्यते तत् अनेकशताब्देषु जातपरिवर्तनानां परिणामः अस्ति ।

वयम् एतस्मिन् वर्षे यत् पुस्तकं पठिष्यामः तत् अस्मान् सर्वप्राचीनातीतान् प्रति नेष्यति। अग्रिमयोः द्वयोः वर्षयोः भवताम् इयं यात्रा पश्चात्जात-कालखण्डेभ्यः गमिष्यति। अस्मिन् पुस्तके भवन्तः केवलं साम्राज्ञी-सम्राजाम् अपि च तेषां विजयानां नीतीनां च विषये एव न पठिष्यन्ति अपितु भवन्तः व्याध-कृषक-शिल्पकार-व्यापारिणां च विषये ज्ञास्यन्ति । भवन्तः अग्नेः लोहाविष्कारस्य च विषये अपि ज्ञास्यन्ति गोधूम-धान्यकयोः च कृषिकार्यं कदा आरब्धं ग्रामनगराणि च कदा विकसितानि ? भवन्तः तीर्थयात्रिणां साधूनां भवनानां चित्राणां धर्माणां विश्वासानां च विषये अपि पठिष्यन्ति भवन्तः द्रक्ष्यन्ति, यत् इतिहासः केवलं महाजनानां जीवनवृत्तान्तं नास्ति। इतिहासः सामान्यस्त्रीणां पुरुषाणां बालानां च जीवनक्रियाकलापयोः विषये अपि अस्ति । इतिहासः केवलं राजनैतिकघटनानां विषये नास्ति अपि तु समाजे जायमानस्य प्रत्येकं घटनाक्रमस्य विषये अपि अस्ति।

एतत् पुस्तकं पठित्वा भवन्तः एतस्मिन् विषये ज्ञातुं शक्ष्यन्ति यत् इतिहासकाराः कथम् अतीतस्य विषये जानन्ति। गुप्तचराः इव इतिहासकाराः अपि अतीतकालिकैः जनैः यानि यानि कार्याणि कृतानि तेषां कार्याणां यानि अवशिष्टानि चिह्नानि वा भवन्ति तेषाम् चिह्नानाम् अध्ययनं कुर्वन्ति । अतीतस्य प्रत्येकम् अवशेषाः यथा पाषाणमयोपकरणानि पादपानाम् अवशेषाः अस्थीनि लिखितसामाग्री चित्राणि आभूषणानि उपकरणानि अभिलेखाः नाणकानि भवनानि मूर्तयः पात्राणि इत्येतानि सर्वाणि पुरातनकालस्य विषये बोधयतुं शक्नुवन्ति । इतिहासकाराः पुरातत्त्वविदः च एतेषां स्रोतसाम् अध्ययनं कृत्वा एतानि अवगन्तुं प्रयतन्ते । अस्मिन् पुस्तके एतादृशानि स्रोतांसि दर्शयिष्यन्ते तथा च भवन्तः एतस्मिन् विषये अपि ज्ञास्यन्ति यत् इतिहासकाराः एतेषां सर्वेषाम् उपकरणानां मूल्याङ्कनं कथं कुर्वन्ति।

परन्तु इतिहासस्य अध्ययनं वयं केवलम् अतीतं ज्ञातुम् एव न कुर्मः। इतिहासः अस्माकं साहाय्यं योग्यताविकासाय कौशलविकासाय च अपि करोति । अतीतसंसारं गभीरतया ज्ञातुं कस्यचित् एतादृशसंसारस्य जनानां विषये ज्ञातुं यस्य संसारस्य जीवनम् अस्मभवं सर्वथा भिन्नम् आसीत् नूतनाः उपायाः शिक्षणीयाः भवन्ति । यदा वयं एतत् कार्यं कुर्मः तदा अस्माभिः जागरूकतया इदं ज्ञातव्यं भवति अपि च वर्तमानकालिकजगतः किञ्चित् बहिः आगन्तव्यं भवति। अयं कश्चित् प्रारम्भः भवति अपरान् जनान् ज्ञातुम् अपि च तेषां क्रियकलापान् ज्ञातुम्। अस्माकं कृते अयं कश्चन शिक्षाप्रद-संवर्धकानुभवः भवितुं शक्नोति अतः स्वस्कन्ध-परिचालनात् प्राक् आत्मनः कञ्चित् प्रश्नं पृच्छतु किम् अहम् एतत् जिज्ञासामि यत् अहं कः अस्मि ? किं अहं एतत् अवगन्तुम् इच्छामि यत् समाजः कथं चलति ? अहं यस्मिन् जगति अस्मि किं तत् ज्ञातुं जिज्ञासामि ? यदि त्वं जिज्ञाससि तर्हि तव कृते आवश्यकता भविष्यति इदं ज्ञानस्य यत् अस्माकं समाजः कथं विकसितः अभवत् अपि च कथम् अस्माकम् अतीताः अस्माकं वर्तमानाय आकारं दत्तवन्तः।

नीलाद्रि-भट्टाचार्यः
इतिहासस्य मुख्यपरामर्शदाता

आभारः

इदं पुस्तकं बहुभ्यः मासेभ्यः लिख्यते स्म । एतस्य पुस्तकस्य सज्जीकरणदले अनेके विद्यालयीयाः शिक्षकाः, महाविद्यालस्य विश्वविद्यालयस्य च विशेषज्ञाः अपि च राष्ट्रियानुसन्धान-प्रशिक्षण-परिषदः संकायसदस्याः च सम्मिलिताः आसन् । चित्राणां चयने अभ्यासप्रश्नानां च सज्जीकरणे एतस्य दलस्य सर्वे सदस्याः सहयोगं कृतवन्तः । विभिन्नविषयेषु अस्माभिः परस्परं गहना विस्तृता च चर्चा कृता अस्ति ।

अस्माभिः स्वस्य बालपाठकानाम् – अपूर्व-अवराम-मल्लिका-विश्वनाथन-मीराविश्वनाथनानां च परामर्शैः टिप्पणीभिः च बहु लाभः अभवत् । पुस्तकलेखन-प्रक्रियायाम् एतस्य प्रारूपेषु बहवः जनाः परामर्शान् दत्तवन्तः । अस्माभिः ते परामर्शाः अस्मिन् पुस्तके संयोजनस्य प्रयासः कृतः । विशेषतया वयं राष्ट्रियनिरीक्षण-समितेः सदस्यान् प्रति आभारिणः स्मः । ते बहून् परामर्शान् दत्तवन्तः सन्ति । एतस्य पुस्तकस्य प्रारूपविषये आलोचनात्मक-परामर्शानां कृते वयं प्रोफेसर-रोमिलाथापर-उमाचक्रवर्ती-जायरस-बानाजी-उपिन्दर-सिंह-एकलव्यकेसी-एन-सुब्रह्मण्यम्-मेरीजानान् प्रति आभारिणः स्मः । प्रोफेसर-बी-डी-चट्टोपाध्याय-प्रोफेसर-कुणाल-चक्रवर्ती-प्रोफेसरविजयारामास्वामी-प्रोफेसर-एस-आर-वालिंबे-नैनादयालाः च अस्य पुस्तकस्य केषाञ्चित् भागानां विषये परामर्शं दत्तवन्तः । प्रोफेसरनारायणीगुप्ता नैरन्तर्येण अस्माकं सहयोगं कृतवती ।

अभिलेख-नाटक-स्मारक-मूर्ति-चित्र-पुरातात्त्विक-ऐतिहासिकस्थल-रेखाचित्र-प्राप्तखननमृण्मयपात्रोपकरणान्य-वस्तु-चित्राणां कृते वयं निम्नलिखितानाम् आभारिणः स्मः – महानिदेशक-भारतीयपुरातत्त्वसर्वेक्षण-सुरेन्द्रकौलस्य सांस्कृतिक-स्रोतप्रशिक्षणकेन्द्र-नवदेहल्याः पूर्णिमामेहतायाः अमेरिकन-इंस्टीट्यूट्-आफ-इंडियन-स्टडीज-हरियाणायाः सहकर्मिणः के.पी.रावस्य हैदराबाद-विश्वविद्यालयस्य अपि च भारतीजगन्नाथनस्य । वयं पाण्डुलिपिचित्रदानाय गीताञ्जलिसेरेन्द्रनस्य अपि च नेशनल-मैनुस्क्रिप्ट-मिशन-देहल्याः सहकर्मिणां आभारिणः स्मः । कैथरीन-जारीजः मेहरगढस्थ-रेखाचित्रांकनस्य अनुमतिं दत्तवान् । वयं बालकानां चित्रदानाय यूनिसेफ-नवदेहल्याः उमेशमत्तामहोदयस्य राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषदः आर.सीदासस्य अपि च स्प्रिंगडेल्सविद्यालयस्य आभारिणः स्मः ।

अस्य पुस्तकस्य मानचित्राणि जवाहरलालनेहरुविश्वविद्यालयस्य के.वर्गीजेन अपि च जम्मू-विश्वविद्यालयस्य इतिहासविभागस्य श्यामनारायणलालेन रचितानि सन्ति । वैज्ञानिक-तकनीकी-शब्दावली-आयोग-नवदेहल्याः प्राप्तावकाशानुसन्धानाधिकारी (इतिहासः पुरातत्वं च) राजेन्द्रप्रसादतिवारीमहोदयः पुस्तके विद्यमानतकनीकीशब्दानां शुद्धीकरणे योगदानं कृतवान् । विजय-कुमारशर्मा पुस्तकस्य प्रतिलिपिसम्पादनं कृतवान् अपि च पाण्डुलिपेः अशुद्धिसंशोधनं कृतवान् । अनिमेषरायः ऋतुटोपा च आर्टक्रिएशन्स-नवदेहली अस्य पुस्तकस्य आकारस्य सज्जायाः

टङ्कणव्यवस्थापनस्य कार्यं कृतवन्तौ। हिन्दीटङ्कणस्य कार्यं विजयकम्प्यूटर इति कृतवान्। वयम् एतेषां सर्वेषाम् कृतज्ञाः स्मः।

अस्माभिः प्रत्येकं चित्रस्य मूलस्रोतसः उल्लेखः कृतः अस्ति,परन्तु यदि असावधानतया काचित् त्रुटिः जाता।

स्यात् तर्हि वयं क्षमाप्रार्थिनः स्मः। आशास्महे एतस्य पुस्तकस्य कृते बहवः परामर्शाः आगमिष्यन्ति ये भविष्ये अपि एतस्य पुस्तकस्य सम्यक्-संस्करण-प्रकाशनस्य कृते सहायकाः भविष्यन्ति।

एतस्य पुस्तकस्य सज्जीकरणे सहयोगार्थं वयं सवितासिन्हा-प्रोफेसराध्यक्ष-सामाजिकविज्ञान-मानविकीशिक्षाविभाग-राष्ट्रियानुसन्धान-प्रशिक्षणपरिषदः च धन्यवादं कुर्मः।

एतस्य पुस्तकस्य विकासस्य विभिन्नचरणेषु सहयोगाय ज्योतिगोयलस्य डी.टी.पी.आपरेटर-सुनयना-तिवारी-सीनियर-प्रूफ-रीडरस्य विशेषाभारिणः स्मः। प्रकाशनविभागद्वारा पूर्णसहयोग-सौविध्यानि च अस्माभिः प्राप्तानि। एतदर्थं वयं विशेषरूपेण आभारिणः स्मः।

अनुवादकः → रूपलालशर्मा

विषय-सूची

आमुखम्	3
वयं किमर्थम् इतिहासम् अध्येयम् ?	7
अध्यायः १ किम्, कदा, कुत्र कथं च ?	13
अध्यायः २ आरम्भिक-मानवस्य अन्वेषणे	22
अध्यायः ३ भोजनसङ्ग्रहात् उत्पादनं यावत्	32
अध्यायः ४ आरम्भिकनगराणि	41
अध्यायः ५ पुस्तकानि प्रेतभूमयः च अस्मान् किं बोधयतः	51
अध्यायः ६ राज्यं राजा कञ्चित् प्राचीनगणराज्यं च	61
अध्यायः ७ नूतनाः प्रश्नाः नूतनाः विचाराः	71
अध्यायः ८ अशोकः कश्चित् अद्भुत-सम्राट् यः युद्धं त्यक्तवान्	79
अध्यायः ९ सुखिनः ग्रामाः समृद्धनगराणि च	89
अध्यायः १० व्यापारिणः राजानः तीर्थयात्रिणः च	100
अध्यायः ११ नूतन-साम्राज्यानि राज्यानि च	111
अध्यायः १२ भवनानि चित्राणि पुस्तकानि च	121

अस्मिन् पुस्तके

परिभाषा

- प्रत्येकम् अध्याये भवतां परिचयः केनचित् बालकेन कयाचित् बालिकया वा कारितः अस्ति।

स्रोतः

- प्रत्येकम् अध्यायः अनेकेषु विभागेषु विभक्तः अस्ति । एतान् विभागान् पठित्वा परस्परं वार्तालापं कृत्वा अपि च सम्यक् प्रकारेण ज्ञात्वा एव अग्रिमस्य अध्यायस्य प्रारम्भं कुर्वन्तु।

अतिरिक्त-सूचना

- केषुचित् अध्यायेषु काश्चन परिभाषाः प्रदत्ताः सन्ति।
- केषुचित् अध्यायेषु स्रोतस्सु कश्चित् अंशः प्रदत्तः अस्ति । एतस्य आधारेण एव इतिहासकाराः इतिहासं लिखन्ति । एतान् ध्यानेन पठित्वा एतेषु प्रदत्तप्रश्नानाम् उपरि चर्चां कुर्वन्तु।

अन्यत्र

- अस्माकं बहूनि स्रोतांसि चित्राणां रूपेण सन्ति। प्रत्येकं चित्रस्य स्वस्य पृथक्काचित् कथा अस्ति।

उपयोगि-शब्दः

- भवन्तः केषुचित् अध्यायेषु मानचित्राणि अपि प्राप्स्यन्ति । एतानि सावधानं दृष्ट्वा स्वाध्याये उक्तस्थानानि अन्वेषयन्तु।
- केषुचित् अध्यायेषु मञ्जूषायां काश्चन सूचनाः प्रदत्ताः सन्ति। एताः रोचकाः अतिरिक्तसूचनाः च सन्ति।

काश्चन-महत्त्वपूर्ण-तिथयः

- प्रत्येकम् अध्यायस्य अन्ते "अन्यत्र" नामकः कश्चित् भागः अस्ति । भवन्तः स्वपाठे याः घटनाः पठन्ति तेषु दिनेषु संसारस्य अन्येषु भागेषु काः घटनाः जायमानाः आसन्, तासां किञ्चित् दृश्यं दर्शयितुम् एतत् विवरणं प्रदत्तम् अस्ति । कुत्रचित् "अन्यत्र" इत्यस्य भागः कस्यचित् महत्वपूर्ण-परिवर्तनाय अपि प्रदत्तः अस्ति।

कल्पनां कुर्वन्तु

- प्रत्येकम् अध्यायस्य अन्ते भवन्तः उपययोगिशब्दानां काञ्चित् सूचीं प्राप्स्यन्ति एषा भवतः पाठे आगतविचाराणां विषयाणां च सन्दर्भे स्मारयिष्यति।

आगच्छन्तु

- प्रत्येकम् अध्यायस्य अन्ते तिथीनाम् अपि काचित् सूची अस्ति।
- प्रत्येकम् अध्याये पाठस्य मध्ये मध्ये अपि केचन प्रश्नाः गतिविधयः च प्रदत्ताः सन्ति । पठनकाले एतेषु अपि कञ्चित् कालं व्ययीकुर्वन्तु।

आगच्छन्तु कृत्वा पश्यामः

- कश्चित् लघुविभागः अस्ति "कल्पनां कुर्वन्तु"। अधुना भवतां क्रमः अस्ति अतीतं गत्वा तस्मिन् समये जीवनस्य विषये निरीक्षणस्य।

आगच्छन्तु कृत्वा पश्यामः

- प्रत्येकम् अध्यायस्य अन्ते त्रिविधकार्याणां सूची प्रदत्ता अस्ति- आगच्छन्तु स्मराम,आगच्छन्तु चर्चायामः अपि च आगच्छामः कृत्वा पश्यामः।

अनेन प्रकारेण भवतां कृते पठितुं द्रष्टुं चिन्तयितुं कर्तुं च बहु किमपि अस्ति । वयम् आशास्महे यत् भवन्तः महान्तम् आह्लादं प्राप्स्यन्ति।

अध्यायः 1

किम्,कदा,कुत्र कथं च ?

रशीदायाः प्रश्नः
रशीदा उपविश्य वार्त्ता-पत्रं पठन्ती आसीत् सहसा तस्याः दृष्टिः वार्तापत्रस्य कस्मिंश्चित् शीर्षके अपतत् "शतवर्षेभ्यः पूर्वम्"। सा चिन्तयितुम् आरब्धवती यत् इदं कश्चित् कथं ज्ञातुं शक्नोति यत् एतावद्भ्यः वर्षेभ्यः पूर्वं किम् अभवत् ?

कथं जानीमः

इदं ज्ञातुं यत् ह्यः किम् अभवत्, भवन्तः आकाशवाणीं श्रोतुं शक्नुवन्ति, दूरदर्शनं द्रष्टुं शक्नुवन्ति अथवा पुनः वार्त्तापत्रं पठितुं शक्नुवन्ति । सार्धम् एव इदं ज्ञातुं यत् गतवर्षे किम् अभवत् भवन्तः केनचित् एतादृशेन जनेन वार्त्तां कर्तुं शक्नुवन्ति यः तात्कालिकघटनाः स्मरति । परन्तु अतीतकाले किम् अभवत् इदं कथं ज्ञातुं शक्यते ?

अतीतस्य विषये वयं किं ज्ञातुं शक्नुमः?

अतीतस्य विषये बहुकिमपि ज्ञातुं शक्यते – यथा जनाः किं खादन्ति स्म, कीदृशानि वस्त्राणि धरन्ति स्म, कीदृशेषु गृहेषु निवसन्ति स्म ? वयम् आखेटक-पशुपालक-कृषक-शासक-व्यापारि-पुरोहित-शिल्पकार-कलाकार-संगीतकार-वैज्ञानिकानां वा जीवनविषये सूचनाः प्राप्तुं शक्नुमः । इदम् एव न वयं इदम् अपि ज्ञातुं शक्नुमः यत् तस्मिन् काले बालाः काः काः क्रीडाः क्रीडन्ति स्म, कीदृशीः कथाः शृण्वन्ति स्म, कानि नाटकानि पश्यन्ति स्म अथवा पुनः कीदृशानि गीतानि गायन्ति स्म ।

जनाः कुत्र निवसन्ति स्म?

प्रथमे मानचित्रे (पृष्ठ-२) नर्मदानद्याः विषये जानन्तु । लक्षाधिकेभ्यः वर्षेभ्यः जनाः एतस्याः नद्याः तटे निवसन्ति । अत्र वास्तव्येषु आरम्भिकेषु जनेषु केचन कुशलसङ्ग्राहकाः आसन् ये पार्श्वस्थवनानां विशालसम्पदः परिचिताः आसन् । स्वभोजनार्थं ते मूलानां फलानां अन्यवनोत्पादानां च इतः एव सङ्ग्रहणं कुर्वन्ति स्म । ते पशूनाम् आखेटम् अपि कुर्वन्ति स्म ।

अधुना भवन्तः उत्तर-पश्चिमयोः सुलेमान-किरथरोपत्यकाः अन्वेषयन्तु।

एतस्मिन् क्षेत्रे एव कानिचन एतादृशानि स्थानानि सन्ति यत्र प्रायः अष्टौ सहस्रवर्षेभ्यः पूर्वं स्त्रीपुरुषाः आदौ गोधूम-यवसदृशानां सस्यानां प्ररोहणम् आरब्धवन्तः। ते ,मेष-अजा-गौ-वृषभसदृशानां पशूनां पालनम् आरब्धवन्तः । एते जनाः ग्रामेषु निवसन्ति

स्म । उत्तरपूर्वयोः गारो इत्येतं मध्यभारते च विंध्योपत्यकानाः अन्वेषयन्तु । एतानि कानिचन अन्यानि एतादृशानि क्षेत्राणि आसन् यत्र कृषेः विकासः अभवत् । यत्र आदौ तण्डुलकृषिः जाता तानि स्थानानि विंध्यस्य उत्तरे स्थिताः आसन्।

मानचित्रे सिन्धुनद्याः एतस्याः च सहायकनदीनाम् अन्वेषणस्य प्रयासं कुर्वन्तु । सहायकनद्यः ते उच्यन्ते याः कस्याञ्चित् महानद्यां विलीनाः भवन्ति । प्रायः ४७००वर्षेभ्यः प्राक् एतासां नदीनां तटेषु कानिचन आरम्भिकनगराणि विकसितानि । गंगायाः एतस्याः च सहायकनदीनां तटे समुद्रतटवर्ति-क्षेत्रेषु च नगराणां विकासः प्रायः २५०० वर्षेभ्यः प्राक् अभवत् ।



गंगायाः एतस्याः च सहायकनद्याः सोन इत्यस्याः अन्वेषणं कुर्वन्तु।

गङ्गायाः दक्षिणे एतयोः नद्योः पार्श्वस्थं क्षेत्रं प्राचीनकाले "मगध इति नाम्ना (वर्तमाने बिहारे वर्तते) ज्ञायते स्म। एतस्य शासकाः बहुशक्तिशालिनः आसन् अपि च ते किञ्चित् विशालं राज्यं स्थापितवन्तः आसन् । देशस्य अन्येषु भागेषु अपि एतादृशानां राज्यानां स्थापना कृता आसीत् ।

जनाः सदैव उपमहाद्वीपस्य एकस्मात् भागात् अपरं भागं यावत् यात्रां कृतवन्तः । कदाचित् हिमालयसदृशोच्चपर्वतोपत्यका-मरुस्थल-नदीनां समुद्राणां च कारणतः यात्रा दुर्गमा भवति स्म पुनरपि एषा यात्रा तेषां कृते असम्भवभूता न आसीत् । अतः कदाचित् जनाः कार्यस्य उपवेशने अपि च कदाचित् प्राकृतिकापत्कारणात् एकस्मात् स्थानात् अपरस्थानं प्रति गमनं कुर्वन्ति स्म । कदाचित् सेनाः अपरेषां क्षेत्राणाम् उपरि विजयं प्राप्तुं गच्छन्ति स्म । एतदतिरिच्य सार्थाः कदाचित् जलयानेषु आत्मभिः सह मूल्यवन्ति वस्तूनि स्वीकृत्य स्थानात् स्थानानन्तरं प्रति गच्छन्ति स्म । धार्मिकगुरवः जनान् शिक्षयन् परामृशन् च ग्रामात् ग्रामानन्तरं प्रति गच्छन्ति स्म। केचन जनाः नूतनानि रोचकानि च स्थानानि अन्वेष्टुं औत्सुक्यकारणात् अपि यात्रां कुर्वन्ति स्म। एताभिः यात्राभिः जनाः अन्योऽन्येषां विचारान् ज्ञातुम् अवसरान् प्राप्नवन्तः।

अद्यत्वे जनाः यात्राः किमर्थं कुर्वन्ति ?

एकदा पुनः प्रथमं मानचित्रं पश्यन्तु । उपत्यकाः पर्वताः समुद्राः च एतस्य उपमहाद्वीपस्य प्राकृतिक-सीमायाः निर्माणं कुर्वन्ति। यद्यपि जनैः सीमानां पारे गमनं सरलं नासीत् यैः यादृशम् इष्टं तैः तादृशं कृतम्, ते पर्वतानाम् औन्नत्यं स्प्रष्टुं शक्तवन्तः। उपमहाद्वीपस्य बहिस्तात् अपि जनाः अत्र आगतवन्तः अपि च अत्रैव वासं कृतवन्तः । जनानाम् अनेन आवागमनेन अस्माकं सांस्कृतिक-परम्पराः समृद्धिं नीताः । बहुभ्यः वर्षेभ्यः जनाः पाषाणानाम् अल्पांशकर्तनस्य (तराशना) सङ्गीतरचनस्य एतदतिरिच्य भोजनपाकस्य च नूतनानाम् प्रकाराणाम् उपायानाम् अथवा विधीनां विषये अन्योऽन्येषां विचाराणाम् आदानं प्रदानं च कुर्वन्ति स्म।

प्रथमं मानचित्रं दक्षिणेशियां (आधुनिक-भारत-पाकिस्तान-बांग्लादेश-नेपाल-भूटान-श्रीलंकाः) अफगानिस्तानं ईरानं चीनं म्यांमारं च दर्शयति एते भारतस्य प्रतिवेशिनः देशाः सन्ति। दक्षिणैशिया एकस्मात् द्वीपात् लघुः अस्ति, परन्तु विशालतायाः दृष्ट्या शेष-एशियातः समुद्रोपत्यका-पर्वतेषु विभाजनकारणात् प्रायः एतत् उपमहाद्वीपम् इति उच्यते।

देशस्य नामानि

अस्माकं देशाय वयं प्रायः 'इण्डिया-भारत-सदृशयोः' शब्दयोः प्रयोगं कुर्मः । इण्डिया इति शब्दः इण्डस इति शब्दात् निष्पन्नः यः संस्कृते सिन्धुः' इति उच्यते । स्वमानचित्रे ईरानस्य यूनानस्य च अन्वेषणं कुर्वन्तु । प्रायः पञ्चशताधिकद्विसहस्र-वर्षेभ्यः उत्तर-पश्चिमाभ्यां दिग्भ्यां आगम्यमानाः ईरानवासिनः यूनानवासिनः च सिन्धुं हिन्दोस अथवा इन्दोस तथा च अस्याः नद्याः पूर्वभागे स्थितं भूमिप्रदेशं इण्डिया इति उक्तवन्तः । भरत इति नाम्नः प्रयोगः उत्तर-पश्चिमयोः दिशि निवसतां जनानां

कस्यचित् समूहस्य कृते क्रियते स्म । अस्य समूहस्य उल्लेखः संस्कृतस्य आरम्भिकी-कृत्यां ऋग्वेदे अपि लभ्यते । अनन्तरम् अस्य प्रयोगः देशाय कृतः वर्तते।

अतीतस्य कालस्य विषये कथं ज्ञातुं शक्नुमः ?

अतीतस्य विषये वयं बहुविधरूपेण ज्ञातुं शक्नुमः । एतेषु एकः विधिः वर्तते यत् अतीतकाले लिखितानां पुस्तकानाम् अन्वेषणम्, अपि च पठनम् । एतानि पुस्तकानि हस्तेन लिखितानि इति कारणेन पाण्डुलिपिः इति उच्यते । आङ्ग्ले पाण्डुलिपये प्रयुक्तः 'मैन्यूस्क्रिप्ट्' इति शब्दः लैटिन् इत्यस्य 'मेनू' अर्थात् 'हस्तः' इति शब्दात् स्वीकृतः। एताः पाण्डुलिपयः प्रायः ताडपत्रेषु अथवा हिमालयस्य क्षेत्रेषु उत्पद्यमानेषु भूर्ज इति नामकेभ्यः वृक्षेभ्यः विशेषरीत्या लभ्यमानेषु पत्रेषु लिखितरूपेण लभन्ते ।

एतावत्सु वर्षेषु जातेषु सत्सु बह्व्यः पाण्डुलिपयः कीटैः खादिताः येन काश्चन नष्टाः अभवन् । तथापि काश्चन पाण्डुलिपयः अधुना अपि उपलभ्यन्ते । प्रायः एताः पाण्डुलिपयः मन्दिरेषु विहारेषु च प्राप्यन्ते । एतेषु पुस्तकेषु धार्मिक-मान्यतानाम् अथवा व्यवहाराणां, राज्ञां जीवनविषये, औषधीनां तथा विज्ञानादि-सर्वप्रकारक-विषयाणां चर्चा प्राप्यते । एवम् एतदतिरिच्य अत्र अस्माकं महाकाव्यानि कविताः, तथा च नाटकानि अपि सन्ति । एतासु अधिकाः संस्कृतभाषायां लिखिताः सन्ति तथापि काश्चन प्राकृतभाषायां अपि च तमिलभाषायां सन्ति । प्राकृतभाषायाः प्रयोगं सामान्यजनाः कुर्वन्ति स्म ।

वयम् अभिलेखानाम् अपि अभ्यासं कर्तुं शक्नुमः । एतादृशाः लेखाः पाषाणानाम् अथवा धातुसदृशानाम् अपेक्षया कठोरतलेषु उत्कीर्णाः सन्ति । यदा-कदा शासकः अथवा अन्यजनः स्वस्य आदेशान् अनेन प्रकारेण उत्कीर्णं कारयन्ति स्म, तथा जनाः तान् आदेशान् द्रष्टुं शक्नुवन्ति, पठितुं शक्नुवन्ति, तथा च पालनं कर्तुं

ताडपत्रनिर्मितायाः पाण्डुलिपेः किञ्चित् पृष्ठम्
इयं पाण्डुलिपिः प्रायः सहस्रवर्षेभ्यः प्राक् लिखिता आसीत् । पुस्तकं निर्मातुं ताडस्य पत्राणि कर्तयित्वा तेषां पृथक् पृथक् भागाः सहैव बध्यन्ते स्म। भूर्जपत्रत्वचा बद्धां एतादृशीं एव पाण्डुलिपिं भवती अत्र द्रष्टुं शक्नोति।



शक्नुवन्ति। केचन अन्यप्रकारकाः अभिलेखाः अपि लभ्यन्ते येषु राजभिः तथा च राज्ञीभिः सह अन्यैः स्त्रीपुरुषैः अपि स्वकीयानां कार्याणाम् आलेखनं कारितम्। उदाहरणार्थं प्रायः शासनानि युद्धेषु प्राप्तानां विजयानां विषये लेखालेखनं कुर्वन्ति स्म।

'किं भवान् वक्तुं शक्नोति यत् 'कठोरतले लेखस्य लेखनेन के के लाभाः आसन्? अपि च कानि कानि कष्टानि आसन्?'



एतदतिरिक्तम् अन्यानि बहूनि वस्तूनि पुरातनकाले निर्मितानि प्रयुक्तानि च आसन् । एतादृशानां वस्तूनाम् अध्ययनकर्ता 'पुरातत्त्वशास्त्रज्ञः' इति कथ्यते। पुरातत्त्वशास्त्रज्ञाः पाषाणैः अपि च इष्टिकाभिः निर्मितानां भवनानां अवशेषाणाम्, चित्राणां तथा च मूर्तीनाम् अध्ययनं कुर्वन्ति । ते उपकरणानाम्, शस्त्राणाम्, पात्राणाम्, आभूषणानां नाणकानां च कृते अन्वेषणानि तथा च खननम् अपि कुर्वन्ति। एतेषु कानिचन वस्तूनि पाषाणैः पक्वमृत्तिकाभिः धातुभिः च निर्मितानि भवितुं शक्नुवन्ति । एतादृशानि तत्त्वानि कठोराणि शीघ्रं च विनष्टशीलानि न भवन्ति।

पुरातत्त्वशास्त्रज्ञः पशूनाम्, पक्षिणां तथा च मीनानाम् अस्थ्नाम् अपि अन्वेषणं कुर्वन्ति । एतेन तेषां साहाय्यं भवति स्म यत्पुरातनकाले जनाः किं खादन्ति स्म इति। वनस्पतीनाम् अवशेषाः बहुकष्टरूपेण रक्षिताः भवन्ति। यदि अन्नकणस्य अथवा काष्ठस्य शाखायाः दहनं भवति चेत् दग्धरूपेण अवशिष्टानि भवन्ति।

किं



स्त्र

प्रायः २२५० वर्षपुरातनः अयम् अभिलेखः वर्तमानाफगानिस्तानस्य कंधारतः प्राप्तः अस्ति। अयम् अभिलेखः अशोकनामकस्य शासकस्य आदेशेन उत्कीर्णः कारितः आसीत्। अस्य शासकस्य विषये भवती अष्टमे अध्याये पठिष्यति। यदा वयं कस्याश्चित् लिपेः प्रयोगं कुर्मः। लिपयः अक्षरैः सङ्केतैः वा निर्मिताः भवन्ति। यदा वयं किञ्चित् लिखामः अथवा वदामः तदा वयं कस्याश्चित् भाषायाः प्रयोगं कुर्मः। अयम् अभिलेखः अस्मिन् क्षेत्रे प्रयुक्तयूनानी-अरामेइकनामकयोः द्वयोः भिन्नयोः लिप्योः अपि च भाषयोः वर्तते।

ज्ञेभ्यः अधिकतया अवशेषवस्त्राणि लभ्यन्ते ?

पाण्डुलिपिभिः, अभिलेखैः तथा च पुरातत्त्वेन लभ्यमानज्ञानस्य कृते इतिहासकाराः प्रायः 'स्रोत'इति शब्दस्य प्रयोगं कुर्वन्ति । 'इतिहासकाराः' ते एव कथ्यन्ते ये पुरातनस्य अध्ययनं कुर्वन्ति । स्रोतसः प्राप्तिमात्रेण एव पुरातनस्य विषये अध्ययनं बहु रोचकं भवति, यतो हि एतेषां स्रोतसां साहाय्येन वयं शनैः शनैः पुरातनस्य पुनर्निर्माणं कर्तुं शक्नुमः । अतः इतिहासकाराः तथा च पुरातत्त्वज्ञाः तेषा गुप्तचराणाम् इव सन्ति ये एतेषां सर्वेषां स्रोतसां प्रयोगः सरलरूपेण कृत्वा पुरातनस्य विषयस्य ज्ञानार्थं प्रयासं कुर्वन्ति ।

अतीतः, एकः अनेके वा?

वामतः – कस्माच्चित् प्राचीननगरात् प्राप्तानि पात्राणि एतादृशानां पात्राणां प्रयोगः 4700 वर्षपूर्वं भवति स्म । दक्षिणतः- किञ्चन पुरातनं रजतनाणकम् । एतादृशानां नाणकानां प्रयोगः प्रायः 2500 वर्षपूर्वं भवति स्म । अस्माभिः अद्यत्वे प्रयुज्यमानमुद्राभ्यः एताः मुद्राः कथं भिन्नाः सन्ति ?

किं त्वया अस्य पुस्तकशीर्षकस्य 'अस्माकम् अतीतः' इत्यस्य उपरि ध्यानं दत्तम् ? अत्र 'अतीतः' इति शब्दः यद्यपि एकवचने अस्ति तथापि अस्य प्रयोगः बहुवचनत्वेन कृतः अस्ति । एवम् अस्य तत्त्वस्य उपरि ध्यानं दापयितुं कृतम् अस्ति यत् भिन्न-भिन्न समूहजनानां कृते अस्य अतीतस्य भिन्न-भिन्न भावनाः आसन् । उदाहरणार्थं पशुपालकानाम् अथवा कृषकाणां जीवनं राज्ञां राज्ञीनां च जीवनेन सह एवं व्यापारीणां जीवनं शिल्पकाराणां जीवनेन सह बहु भिन्नम् आसीत् । यथा वयम् अद्यत्वे अपि पश्यामः तथैव तस्मिन् समये अपि देशस्य भिन्न-भिन्न स्थानेषु जनाः भिन्न-भिन्न रूपेण व्यवहाराणां रीतीनां पालनं कुर्वन्ति स्म । उदाहरणार्थम् अद्यत्वे अण्डमानद्वीपस्य अधिकांशजनाः तेषां भोजनं मीनानां सङ्ग्रहेण, आखेटेन, फल-पुष्पाणां सङ्ग्रहेण च प्राप्नुवन्ति । अस्य विपरीतरूपेण नगरेषु उषिताः जनाः खाद्यापूर्ति-निमित्तम् अन्यस्य उपरि आधारिताः भवन्ति । एतादृशाः भेदाः अतीते अपि विद्यमानाः आसन् ।

एतदतिरिक्तः एकः अन्यः भेदः अस्ति । तस्मिन् समये शासकाः स्वस्य विजयानां लेखा-आलेखनं स्थापयन्ति(कुर्वन्ति) स्म । एतदेव कारणम् अस्ति यत् वयं तान् शासकान् अपि च तैः युद्ध्यमानानां युद्धानां विषये बहु किमपि ज्ञातवन्तः। एवम् आखेटकः, धीवरः, सङ्ग्राहकः, कृषकः पशुपालकः च एवंप्रकारकाः सामान्यजनाः प्रायः स्वस्य
कार्याणां लेख-आलेखनं न कुर्वन्ति स्म । पुरातत्त्वस्य साहाय्येन वयं तेषां जीवनस्य विषये ज्ञानं प्राप्नुमः । यद्यपि अधुना अपि अस्य उपरि बहु किमपि ज्ञातुम् अवशिष्टं वर्तते ।

तिथीनाम् अभिप्रायः

यदि कश्चित् भवतीं तिथिविषये पृच्छेत् तर्हि प्रायः भवती तस्य दिनस्य दिनाङ्कं मासं वर्षं यथा २०००अथवा एवंविधं किञ्चित् वर्षं वदिष्यति । वर्षस्य इयं गणना क्रैस्तधर्म-प्रवर्तकस्य ईसामसीहस्य जन्मनः तिथेः क्रियते । अतः २०००वर्षं कथनस्य तात्पर्यम् ईशामसीहस्य जन्मनः २०००वर्षाणां पश्चात् अस्ति । ईसामसीहस्य जन्मनः पूर्वतनीयाः सर्वाः तिथयः ई.पू. (ईसातः प्राक्) इत्यस्य रूपेण ज्ञायन्ते। अस्मिन् पुस्तके वयं २००० इत्येतं स्वस्य आरम्भिकं बिन्दुं मन्यमानाः वर्तमानतः पूर्वेषां तिथीनाम् उल्लेखं करिष्यामः।

इतिहासः तिथयः च

आग्लभाषायां बी.सी(हिन्द्याम् ई.पू.) इत्यस्य तात्पर्यं "बिफ़ोर-क्राइस्ट"(ईसा-पूर्वम्) इति भवति।

कदाचित् भवती तिथिभ्यः प्राक् ए.डी(हिन्द्यां ई.) इति लिखितं पश्यति इदम् "एनो-डॉमिनी" नामकाभ्यां द्वाभ्यां लैटिन-शब्दाभ्यां निर्मितम् अस्ति। अस्य तात्पर्यं ईसामसीहस्य जन्मवर्षेण अस्ति।

कदाचित् ए.डी. इत्यस्य स्थाने सी.ई. इति तथा च बी.सी. इत्यस्य स्थाने बी.सी.ई. इत्यस्य प्रयोगः भवति। सी.ई. इति अक्षराणां प्रयोगस्य "कामन-एरा" अपि च बी.सी.ई इत्यस्य "बिफोर-कामन-एरा" इत्यस्य कृते भवति। वयम् एतेषां शब्दानां प्रयोगम् एतदर्थं कुर्मः यतो हि विश्वस्य अधिकांशदेशेषु अधुना एतस्य दिनदर्शिकायाः प्रयोगः सामान्यः अभवत्। भारते तिथीनाम् एतेषां रूपाणां प्रयोगः प्रायः द्विशतवर्षेभ्यः प्राक् आरब्धः आसीत्।

यदा-कदा आङ्ग्लस्य बी.पी.इति अक्षराणां प्रयोगः भवति येषां तात्पर्यं "बिफ़ोर-प्रेजेन्ट" (वर्तमानात् प्राक्) इति अस्ति।

तृतीये पृष्ठे द्वे तिथी स्तः तेषां विषये जानातु। एतदर्थं भवती कस्य अक्षरसमूहस्य प्रयोगं करिष्यति ?

अन्यत्र

यथा भवत्या पूर्वं पठितम्, अभिलेखाः दृढेषु तलेषु उत्कीर्णयन्ते। एतेषु केचन अभिलेखाः शताधिकवर्षेभ्यः पूर्वं लिखिताः आसन्। सर्वेषु अभिलेखेषु लिपीनां भाषाणां च प्रयोगः अभवत्। कालक्रमेण अभिलेखेषु प्रयुक्तभाषासु लिपिषु च बहु-परिवर्तनं जातम् अस्ति। विद्वाँसः इदं कथं ज्ञातुं पारयन्ति यत् किं लिखितम्



आसीत् ? एतस्य ज्ञानम् अज्ञातलिपेः अर्थावगमनस्य कयाचित् प्रक्रियया कर्तुं शक्यते ।

अनेन प्रकारेण अज्ञातलिपेः अवगमनस्य काचित् प्रसिद्धा कथा उत्तरी-अफ्रीकीदेशात् मिश्रतः लभते। प्रायः ५००० वर्षेभ्यः प्राक् अत्र राजा राज्ञी च निवसतः स्म ।

मिस्रस्य उत्तरीये तटे रोसेट्टानामकः कश्चित् महाग्रामः अस्ति । ततः कश्चित् एतादृशः उत्कीर्ण-पाषाणः प्राप्तः अस्ति यस्मिन् एकः एव लेखः तिसृषु भिन्नासु भिन्नासु भाषासु लिपिषु (यूनानीमिश्रीलिप्योः द्वयोः प्रकारयोः) च अस्ति । केचन विद्वाँसः यूनानीभाषां पठितुं शक्नुवन्ति स्म । ते उक्तवन्तः यत् अत्र राज्ञां राज्ञीनां च नामानि लघुषु लघुषु भित्तिचित्रेषु दर्शितानि सन्ति । सः 'कारतूशः' इति उच्यते । तदनन्तरं विद्वान्सः यूनानी-मिस्रीसेङ्केतान् पृथक् पृथक् स्थापयन्तः मिस्र्यक्षराणां समानार्थकध्वनीनां परिचयं प्राप्तवन्तः। यथा भवती द्रष्टुं शक्नोति अत्र एल इति अक्षरस्य कृते सिंहस्य अपि च ए इति अक्षरस्य कृते चटकायाः चित्राणि निर्मितानि सन्ति । एकदा यदा ते इदं ज्ञातवन्तः यत् विभिन्नाः अक्षराः केषां कृते प्रयुक्ताः सन्ति तर्हि ते अन्यान् अभिलेखान् अपि पठितुं शक्तवन्तः ।

उपयोगिशब्दाः

यात्रा, पाण्डुलिपिः, अभिलेखः, पुरातत्त्वम्, इतिहासकारः,स्रोतः, अज्ञात-लिपेः अर्थसङ्गतिकरणम्

कल्पनां कुर्वन्तु

भवत्या कस्यचित् पुरातत्त्वविदः साक्षात्कारः स्वीकरणीयः । भवती तेषां पञ्चानां प्रश्नानां काञ्चित् सूचीं सज्जीकरोतु यान् प्रश्नान् भवती पुरात्त्वविदः प्रष्टुम् इच्छति

आगच्छन्तु स्मरणं कुर्मः

१. निम्नलिखितानां सुमेलनं कुर्वन्तु

नर्मदा-घाटी	प्रथमं महत् राज्यम्
मगधः	आखेटः सङ्ग्रहणं च
गारो उपत्यकाः	प्रायः २५००वर्षपूर्वस्य नगरम्
सिन्धुः तथा च एतस्याः सहायकनद्यः	आरम्भिक-कृषिः
गङ्गा-घाटी	प्रथमनगरम्

२. पाण्डुलिपिषु अपि च अभिलेखेषु किञ्चित् प्रमुखम् अन्तरं ज्ञापयन्तु।

आगच्छन्तु कृत्वा पश्यामः

३. रशीदायाः प्रश्नं पुनः पठन्तु । एतस्य कानि उत्तराणि भवितुं शक्नुवन्ति?

४. पुरातत्त्वविद्भिः लभ्यमानानां सर्वेषां वस्तूनां काञ्चित् सूचीं रचयतु । एतेषु कानि वस्तूनि पाषाणमयानि भवितुं शक्नुवन्ति?

५. साधारणस्त्रियः अथवा साधारणपुरुषाः स्वकार्याणां विवरणं किमर्थं न स्थापयन्ति स्म ? एतस्मिन् विषये भवती किं चिन्तयति?

काश्चन महत्त्वपूर्णाः तिथयः

- कृषेः आरम्भः (८०००वर्षेभ्यः प्राक्)
- सिन्धु-सभ्यतायाः प्रथम-नगराणि(४७००वर्षेभ्यः पूर्वम्)
- गङ्गा-घाट्याः नगराणि,मगधस्य महत् राज्यम्(२५००वर्षेभ्यः पूर्वम्)
- वर्तमानं (प्रायः २०००वर्षेभ्यः पूर्वम्)

आगच्छन्तु चर्चां कुर्मः



६. न्यूनातिन्यूनं द्वयोः एतादृश्योः तथ्ययोः उल्लेखं कुर्वन्तु याभ्यां भवतः अनुसारं राज्ञां कृषकाणां च जीवनयोः भिन्नतायाः ज्ञानं भवति ।

७. प्रथमे पृष्ठे शिल्पकार-शब्दस्य विषये जानन्तु । वर्तमाने प्रचलितानां न्यूनातिन्यूनं पञ्चानां पृथक् पृथक् शिल्पानां सूचीं करोतु। किम् एते शिल्पकाराः (क) स्त्री (ख) पुरुषः (ग)स्त्रीपुरुषौ द्वौ वा भवन्ति ?

८. अतीतकाले पुस्तकानि केषु विषयेषु लिखितानि आसन् ? भवती एतेषु केषां पुस्तकानाम् अध्ययनं कर्तुम् एषिष्यति?

इति प्रथमोध्यायः

अध्यायः 2

आरम्भिकमानवस्य अन्वेषणे

तुषारस्य रेलयात्रा

तुषारः स्वस्य कस्यचित् सम्बन्धिनः विवाहस्य अवसरे देहलीतः चेन्नईनगरं प्रति गच्छन् आसीत्। रेलयाने सः वातायनपक्षीयं स्थानं प्राप्तवान्, यतः सः बहिष्ठं दृश्यं दर्शने व्यस्तः जात। तीव्रधावतः यानात् सः दृष्टवान् यत् वृक्षाः, पादपाः, क्षेत्राणि गृहाणि च तीव्रगत्या पृष्ठभागं प्रति गच्छन्ति स्म। तदा तस्य पितृव्यः तस्य स्कन्धे हस्तं स्थापयन् उक्तवान्, " जानाति भवान् यत् मात्रं सार्धैकशतवर्षेभ्यः प्राक् जनाः रेलयात्रां कर्तुम् आरब्धवन्तः ? बसयानं तु एतस्य केषाञ्चित् दशकानाम् अनन्तरं आगतम्"। तुषारः चिन्तितवान् यत् यदा जनानां समीपे गमनागमनाय तीव्रतमानि यानानि न आसन् तदा ते कथं यात्रां कुर्वन्ति स्म। किं ते स्वकीयं सम्पूर्णं जीवनम् एकस्मिन् स्थाने एव यापयन्ति स्म? नैव, इत्थं न आसीत्।

आरम्भिक-मानवः – अन्ततः ते इतस्ततः किमर्थं भ्रमन्ति स्म ?

वयं तेषां जनानां विषये जानीमः, ये अस्मिन् उपमहाद्वीपे विंशतिलक्षवर्षेभ्यः प्राक् निवसन्ति स्म। अद्य वयं तान् आखेटक-खाद्य-सङ्ग्राहकयोः रूपेण जानीमः। भोजनस्य व्यस्थाकरणस्य विध्यनुसारं ते आखेटकः खाद्यसङ्ग्राहकः च इति नामद्वयेन आहूयन्ते स्म। सामान्यतः ते भोक्तुं वन्यपशूनाम् आखेटं कुर्वन्ति स्म, मत्स्यान् चटकान् च निगृह्णन्ति स्म, फलानि मूलानि बीजानि पादपान् पर्णानि अण्डानि च एकत्रीकुर्वन्ति स्म। अस्माकम् उपमहाद्वीपसदृशेषु उष्णदेशेषु वृक्षाणां पादपानां च असङ्ख्यप्रजातयः च लभन्ते। अतः वृक्षेभ्यः पादपेभ्यः च प्राप्यमानाः खाद्यपदार्थाः भोजनस्य अत्यन्त-महत्त्वपूर्णानि स्रोतांसि आसन्।

एतस्य सर्वस्य सम्पादनं सर्वथा सरलं नासीत्। एतादृशाः बहवः पशवः सन्ति ये अस्मत्तः अपि तीव्रतया धावनं कर्तुं शक्नुवन्ति अपि च बहवः पशवः अस्मत्तः अपि शक्तिशालिनः भवन्ति। पशूनाम् आखेटाय चटक-मत्स्यादीनां ग्रहणाय जागरूकता अत्यावश्यकी भवति। यदा वयं पादपेभ्यः वृक्षेभ्यः च भोज्यस्य प्रबन्धं कुर्मः तदा एतत् ज्ञानम् आवश्यकं भवति यत् के पादपाः वृक्षाः वा भक्ष्याः सन्ति यतो हि अनेकविधाः पादपाः विषयुक्ताः अपि भवन्ति। सहैव फलानां पाककालस्य अपि ज्ञानम् आवश्यकं भवति।

एतादृशे समुदाये वसतां बालानां ज्ञानस्य गुणानां च वर्णनं करोतु । किं भवति एतादृशाः गुणाः ज्ञानं च अस्ति ?

एतेषाम् आखेटक-खाद्य-सङ्ग्राहक-समुदायस्य जनानाम् स्थानात् स्थानं भ्रमणस्य मूले न्यूनातिन्यूनं चत्वारि कारणानि भवितुं शक्नुवन्ति ।

प्रथमं कारणम् इदम् अस्ति यत् यदि ते एकस्मिन् स्थाने अधिकं कालं यावत् निवसन्ति स्म तर्हि तत्र समीपस्थान् वृक्षान् पादपान् पशून् च खादित्वा समापयन्ति स्म । अतः भोजनान्वेषणे तैः अन्यस्थानानि गन्तव्यानि भवन्ति स्म ।

अपरं कारणम् इदम् अपि आसीत् यत् पशवः अपि स्वभक्ष्यस्य अन्वेषणे यथा हरिणः अथवा मृगाः वा एकस्मात् स्थानात् पृथक्स्थानं प्रति गच्छन्ति स्म । अतः एतेषां पशूनाम् आखेटकाः अपि तान् अनुगच्छन्ति स्म ।

तृतीयं कारणम् इदम् अस्ति यत् वृक्षेषु पादपेषु च फलानि पुष्पाणि च पृथक् पृथक् ऋतौ आयान्ति, अतः जनाः तेषाम् अन्वेषणे उपयुक्तायाः ऋतोः अनुसारम् अन्येषु क्षेत्रेषु भ्रमन्तः स्युः।

अपि च चतुर्थं कारणम् इदम् अस्ति यत् जलं विना कस्यापि प्राणिनः पादपस्य वृक्षस्य च जीवनं न सम्भवति जलं च क्षुद्रतडागेभ्यः तडागेभ्यः नदीभ्यः च लभते । यद्यपि कासाञ्चित् नदीनां केषाञ्चित् च तडागानां जलं कदापि न शुष्यति, केषुचित् तडागेषु कासुचित् नदीषु च जलं वर्षाकाले एव उपलभ्यते। अतः एतादृशीनां नदीनां एतादृशानां च तडागानां तटेषु वसन्तः जनाः शुष्कताकाले जलस्य अन्वेषणार्थं इतस्ततः गच्छन्ति स्म । एतदतिरिच्य जनाः स्वज्ञातिभिः मित्रैः च सह मेलितुं गच्छन्ति स्म । अत्र एतत् ध्यातव्यं यत् एते सर्वे जनाः पदातियात्रां कुर्वन्ति स्म।

भवान् विद्यालयं कथं गच्छति?

गृहात् विद्यालयं प्रति गन्तुं भवतः कियान् कालः लगति ?

यदि भवान् द्विचक्रिकया बसयानेन वा विद्यालयं गच्छति तर्हि भवतः कियान् कालः लगिष्यति?

आरम्भिक-मानवस्य विषये सूचना कथं प्राप्यते ?

पुरातत्त्वविदः कानिचन एतादृशानि वस्तूनि प्राप्तवन्तः सन्ति येषां निर्माणम् उपयोगः च आखेटक-खाद्य-सङ्ग्राहकाः कुर्वन्ति स्म। इदं भवितुं शक्नोति यत् जनाः स्वस्य कृते पाषाणमयानि काष्ठमयानि अस्थिमयानि च शस्त्राणि उपकरणानि वा रचितानि स्युः । एतेषु पाषाणमयानि उपकरणानि अद्यापि उपलभ्यन्ते ।

अत्र पाषाणमयोपकरणानां केचन उपयोगाः दर्शिताः सन्ति । एतादृशानां कार्याणां काञ्चित् सूचीं रचयतु येषु एतादृशानि उपकरणानि कार्ये आनीयन्ते । ज्ञापयन्तु यत्

एतेषु कानि कानि कार्याणि सामान्यपाषाणैः कर्तुं शक्यन्ते । कारणसहितम् उत्तरं यच्छन्तु ।

एतेषु केषाञ्चित् उपकरणानाम् उपयोगः फलानि पुष्पाणि अस्थीनि मांसानि च कर्तयितुं वृक्षत्वचः पशुत्वचः च निःसारयितुं क्रियते स्म । कैश्चित् पाषाणमयोपकरणैः सह अस्थ्नां काष्ठानां च मुष्टकान् योजयित्वा कुन्ताः शराः उपकरणानि च निर्मीयन्ते स्म । कैश्चित् उपकरणैः काष्ठानि कर्त्यन्ते स्म । काष्ठानां प्रयोगः इन्धनेन सह कुटीरान् उपकरणानि च रचयितुम् अपि क्रियते स्म ।

पाषाणमयानि उपकरणानि

क) एतानि पाषाणमयानि प्राचीनानि उपकरणानि सन्ति।

ख) एतानि सहस्राधिक-वर्षाणां पश्चात् निर्मितानि सन्ति।

ग) एतानि इतोऽपि पश्चात्काले निर्मितानि सन्ति।

घ) एतानि प्रायः दशसहस्रवर्षेभ्यः पूर्वं निर्मितानि आसन्।

ङ) अपि च एतानि गुटिका इति (प्राकृतिक-ग्रावाः) सन्ति।



पाषाणमयानाम् उपकरणानाम् उपयोगः

वामतः – मनुष्यस्य भक्ष्य-मूलानि खनितुं एतेषां प्रयोगः क्रियते स्म, अपि च

दक्षिणतः – पशूनां चर्मणः निर्मितवस्त्राणि सीवितुं क्रियते स्म ।

वासस्थानकस्य निर्धारीकरणम्

द्वितीयं मानचित्रं पश्यतु । रक्तत्रिकोणस्थलानि तानि पुरातत्त्वस्थलानि सन्ति यत्र आखेटक-खाद्य-सङ्ग्राहकाः

आसन् इति प्रमाणी-भवति । एतानि अतिरिच्य अपि बहुषु स्थानेषु आखेटक-खाद्य-सङ्ग्राहकाः निवसन्ति स्म । मानचित्रे केवलं कानिचन चितस्थानानि एव चिह्नितानि सन्ति । कानिचित् पुरास्थलानि नदीनां क्षुद्रतडागानां च तटेषु प्राप्तानि सन्ति ।

यतो हि पाषाणमयानि उपकरणानि बहूनि महत्त्वपूर्णानि आसन् अतः जनाः एतादृशं स्थानम् अन्वेषयन्ति स्म यत् समीचीनाः पाषाणाः लभेरन् । यत्र जनाः पाषाणमयानि उपकरणानि निर्मान्ति स्म तानि स्थलानि उद्योगस्थलानि इति उच्यन्ते स्म ।



भीम-बेटका (आधुनिक-मध्यप्रदेशः) आवासीय-पुरास्थलानि तानि उच्यन्ते यत्र जनाः निवसन्ति स्म। एतेषु गुहाकन्दरावत् तानि स्थलानि भवन्ति यानि अत्र दर्शितानि सन्ति। जनाः एतेषु गुहासु एतदर्थं निवसन्ति स्म यतो हि ते अत्र प्रचण्डवायोः वर्षाभ्यः आतपात् च रक्षिताः भवन्ति स्म। एतादृश्यः गुहाः विंध्यदक्कनयोः पर्वतीयक्षेत्रेषु लभन्ते स्म याः नर्मदोपत्यकायाः समीपे सन्ति।

किं भवन्तः ज्ञापयितुं शक्नुवन्ति यत् वसितुं जनाः एतादृशं स्थानं किमर्थं चितवन्तः स्युः?

वयम् एतेषाम् उद्योगस्थलानां विषये कथं जानीमः ? सामान्यतया वयम् एतादृशेषु स्थलेषु पाषाणानां महतः खण्डान् लभामहे, अपि च एतादृशानि उपकरणानि अपि लभन्ते यानि जनाः एतेषु स्थलेषु त्यक्तवन्तः स्युः यतो हि समीचीनतया निर्मिताः न भवेयुः। अपि च उपकरणानां निर्माणस्य पश्चात् पाषाणानां लघुखण्डाः अपि एतेषु स्थस्थलेषु लभन्ते । कदाचित् जनाः एतेषु स्थलेषु किंचित् अधिकं कालं यावत् वसन्ति स्म। एतादृशानि स्थलानि आवासीयस्थलानि उद्योगस्थलानि वा उच्यन्ते।

यदि भवता स्वनिवासस्थानस्य विषये वक्तव्यं स्यात् तर्हि भवान् एतेषु किं नाम चेष्यति ?

(क) आवासः

(ख) उद्योग-स्थलम्

(ग) आवासः उद्योगस्थलं च

(घ) अन्यत्

पुरास्थलम्

पुरास्थलं तत् स्थानम् उच्यते यत्र उपकरण-पात्र-भवनादिवस्तूनाम् अवशेषाः लभन्ते । एतादृशानां वस्तूनाम् उपयोगं ते स्वकार्यार्थं कृतवन्तः आसन् अपि च पश्चात् ते तानि तत्र एव अत्यजन् । एतानि भूमौ, अन्तः कदाचित् समुद्रस्य नद्याः तले च अपि प्राप्यन्ते । एतेषां पुरास्थलनां विषये भवान् अग्रिमे अध्याये पठिष्यति ।

पाषाणमयोपकरणानां निर्माणम्

पाषाणमयानि उपकरणानि प्रायः द्वाभ्याम् उपायाभ्यां रच्यन्ते स्म ।

1. पाषाणेन पाषाणस्य विघटनम् । अर्थात् येन पाषाणेन कस्यचित् उपकरणस्य निर्माणं करणीयं भवति स्म तत् एकस्मिन् हस्ते स्वीक्रियते स्म अपि च अपरेण हस्तेन कस्यचित् पाषाणस्य प्रयोगः अयोघ्नरूपेण क्रियते स्म । इत्थम् आघातकारकेन पाषाणेन अपरस्मिन् पाषाणे तावत्पर्यन्तं शल्क इति निष्कास्यन्ते स्म यावत्पर्यन्तं वाञ्छिताकारवान् उपकरणं निर्मितं न स्यात्।

2. अपरः उपायः "दबाव-शल्क-अभियान्त्रिकी" इति उच्यते । एतस्यां क्रोडः कस्मिंश्चित् स्थिरतले स्थाप्यते अपि च अस्मिन् क्रोडे अस्थि पाषाणं च स्थापयित्वा तस्मिन् अयोघ्नाकारकस्य पाषाणेन शल्काः कृष्यन्ते विलिख्यन्ते वा । यतः अभीष्टोपकरणानि निर्मीयन्ते ।

पाषाणोपकरणानि कथं निर्मीयन्ते स्म । एतेषां निर्माणाय प्रयुक्तयोः उपाययोः एकः अत्र दर्शितः अस्ति । ज्ञापयतु एषः कः उपायः अस्ति ।

3. अग्नेः आविष्कारः

1. द्वितीये मानचित्रे कुरनूलगुहाम् अन्वेषयन्तु (पृष्ठम्- १४) अत्र भस्मावशेषाः अलभन्त । एतस्य अभिप्रायः अयम् अस्ति यत् आरम्भिकजनाः अग्नेः प्रज्वालनं ज्ञातवन्तः आसन् । अग्नेः प्रयोगः अनेकेषां कार्याणां कृते अभवत् स्यात् यथा प्रकाशाय मांसभूर्जनाय भयङ्करपशून् पलाययितुं च इत्यादीनां कृते कुर्वन्ति स्म ।

अद्य वयम् अग्नेः उपयोगं किमर्थं कुर्मः?

परिवर्तमानः जलवायुः

प्रायः १२०००सहस्रं वर्षेभ्यः प्राक् संसारस्य जलवाय्वोः महान्ति परिवर्तनानि आगतानि अपि च घर्मस्य वर्धनम् प्रारब्धम् । परिणामतः बहुषु क्षेत्रेषु घासयुक्त-क्षेत्राणि अजायन्त । एतस्मात् हिरण-द्वादशशृङ्गी-अवी-अजा-गोसदृशानां पशूनां सङ्ख्या वर्धितुम् आरब्धा ये घासं खादित्वा जीवितुं शक्नुवन्ति । ये जनाः एतेषां पशूनाम् आखेटं कुर्वन्ति स्म ते अपि तान् अन्वगच्छन् अपि च एते पशवः किं खादन्ति अपि च एतेषां प्रजननं कस्मिन् काले भवति एवंविधं ज्ञानं ते प्राप्तवन्तः । एतत् शक्यते यत् तदानीं जनाः स्वावश्यकतानाम् अनुसारं पशूनां पालनस्य विषये चिन्तितुम् आरब्धवन्तः स्युः । अपि च एतस्मिन् काले मत्स्याः अपि भोजनस्य

महत्त्वपूर्णरूपेण अङ्गभूताः जाताः । एतस्मिन् एव काले उपमहाद्वीपस्य पृथक्-पृथक्-क्षेत्रेषु गोधूम-यव-धान्यसदृशानि अन्नानि अपि प्राकृतिकरूपेण प्ररूढवन्तः। प्रायः महिलाः पुरुषाः बालाः च एतानि अन्नानि भोजनस्य रूपेण एकत्रीकर्तुम् आरब्धवन्तः स्युः । अपि च ते इदम् अपि शिक्षितुम् आरब्धवन्तः स्युः यत् अन्नानि कुत्र उत्पाद्यन्ते स्म अपि च कदा पक्वा भक्ष्यानि भवन्ति स्म । इत्थं कारं कारं जनाः एतानि अन्नानि स्वयम् उत्पादयितुम् आरब्धवन्तः स्युः।

किञ्चित् शैलचित्रम्। अस्य चित्रस्य विषये ज्ञापयतु।

शैलचित्रकला : एतया वयं किं ज्ञातुं शक्नुमः?

यासु गुहासु जनाः निवसन्ति स्म, तासु कासाञ्चित् भित्तीनां उपरि चित्राणि लब्धानि सन्ति । एतेषु कानिचन सुन्दरोदाहरणानि मध्यप्रदेशस्य दक्षिणोत्तरप्रदेशस्य च गुहाभ्यः प्राप्तानि चित्राणि सन्ति । एतेषु वन्यप्राणिनां महत्या कुशलतया सजीवचित्रणं कृतम् अस्ति ।

कः किं करोति स्म ?

नाम-तिथयः च

वयं यस्य कालस्य विषये पठामः, पुरातत्त्वविदः तस्य महान्ति पृथक्-पृथक्-नामानि स्थापितवन्तः सन्ति । आरम्भिककालं ते पुरापाषाणकालं कथयन्ति । अयं शब्दः द्वयोः शब्दयोः निर्मितः अस्ति पुरा अर्थात् प्राचीनं पाषाणः अर्थात् प्रस्तर इति । इदं नाम पुरास्थलेभ्यः प्राप्तपाषाणस्य उपकरणानां महत्त्वं ज्ञापयति । पुरापाषाणकालः विंशतिलक्षवर्षेभ्यः प्राक् १२०००वर्षेभ्यः प्राक्तनः कालः मन्यते । अयं कालः अपि त्रिषु भागेषु विभक्तः अस्ति- आरम्भिक-कालः, मध्यकालः, उत्तरपुरापाषाणयुगं च । मानवेतिहासस्य प्रायः प्रतिशतं ९९ कथाः एतस्मिन् कालावधौ एव घटिताः ।

यस्मिन् काले वयं पर्यावरणीय-परिवर्तनानि पश्यामः तत् 'मेसोलिथ' अर्थात् मध्यपाषाणयुगम् इति उच्यते । एतस्य समयः प्रायः १२०००वर्षेभ्यः पूर्वम् आरभ्य १००००वर्षेभ्यः पूर्वं यावत् मन्यते । एतस्य कालस्य पाषाणमयानि उपकरणानि सामान्यतः बहूनि लघूनि भवन्ति स्म । तानि 'माइक्रोलिथ' अर्थात् लघुपाषाणाः उच्यन्ते । प्रायः एतेषु उपकरणेषु अस्थ्नां काष्ठानां च हस्तकलाः अपि च हंसिया इति तथा च शस्त्रीसदृशानि उपकरणानि लभ्यन्ते स्म । सार्धम् एव पुरापाषाण-युगीयानि उपकरणानि अपि एतस्मिन् काले एव निर्मीयन्ते स्म ।

त्रयोदशपृष्ठे निर्मितचित्रं पश्यतु । एतस्मिन् कालावधौ निर्मितोपकरणेषु भवान् किमपि परिवर्तनं पश्यति?

अग्रिम-युगस्य प्रारम्भः प्रायः १०,०००वर्षेभ्यः प्राक् भवति । एतत् नवपाषाणयुगम् इति उच्यते । अग्रिमे अध्याये भवान् नवपाषाणयुगस्य विषये पठिष्यति।

नवपाषाणस्य कोऽर्थः स्यात्?

अस्माभिः केषाञ्चित् स्थानानां नामानि प्रदत्तानि सन्ति। अग्रिमेषु अध्यायेषु भवन्तः एतादृशानि बहूनि नामानि प्राप्स्यन्ति। प्रायः वयं पुरातनस्थानेभ्यः तेषां नाम्नां प्रयोगं कुर्मः, यानि अद्य प्रचलितानि सन्ति, यतो हि वयं न जानीमः यत तस्मिन काले एतेषां नामानि कानि स्यः।

अस्माभिः पठितं यत् आरम्भिकजनाः आखेटं फलमूलस्य च सङ्ग्रहणं कुर्वन्ति स्म । ते पाषाणमयानि उपकरणानि गुहासु च चित्राणि रचयन्ति स्म। किं वयं एतादृशानि साक्ष्याणि प्राप्नुमः येभ्यः ज्ञायते यत् महिलाः आखेटं कुर्वन्ति स्म अथवा पुरुषाः उपकरणानि निर्मान्ति स्म अथवा महिलाः चित्रकलां कुर्वन्ति स्म अपि च पुरुषाः फलानि मूलानि च सङ्गृह्णन्ति स्म ? वास्तविकतायाम् अस्माभिः एतत् न ज्ञायते। परन्तु द्वे तथ्ये भवितुम् अर्हतः महिलाः पुरुषाः च मिलित्वा बहूनि कार्याणि कृतवन्तः स्युः। इदम् अपि सम्भाव्यते यत् कानिचन एतादृशानि कार्याणि महिलाः एव कुर्वन्ति स्म कानिचन कार्याणि च केवलं पुरुषाः एव । एतदतिरिच्य उपमहाद्वीपस्य भिन्नेषु भिन्नेषु क्षेत्रेषु भिन्नाः भिन्नाः परम्पराः अपि स्युः ।

भारते उष्ट्रपक्षी!

भारते पुरापाषाणकालीनाः उष्ट्रपक्षिणः भवन्ति स्म । महाराष्ट्रस्य पटने इति पुरास्थालात् उष्ट्रपक्षिणः अण्डावशेषाः अलभन्त । एतेषां केषुचित् त्वक्षु चित्राङ्कनम् अपि लभते । एतैः अण्डैः मनके इत्यपि निर्मीयन्ते स्म ।

एतेषां मनके इत्येतेषां प्रयोगः किमर्थं कृतं स्यात्?

अद्य वयं उष्ट्रपक्षिणः कुत्र प्राप्नुमः ?

हुँस्गी इत्यस्याः सूक्ष्मपरीक्षणम्

द्वितीये मानचित्रे हुँस्गी इत्येताम् अन्वेषयन्तु (पृष्ठम्-१४)। अत्र पुरापाषाणयुगस्य अनेकानि पुरास्थलानि प्राप्तानि आसन् । केभ्यश्चित् पुरास्थलेभ्यः पृथक्-पृथक्-कार्येषु प्रयुक्तानि अनेकविधानि उपकरणानि प्राप्तानि आसन् । एते सम्भवतः आवासाः उद्योगस्थलानि वा स्युः । केषुचित् पुरास्थलेषु अपि उपकरणनिर्माणस्य प्रमाणानि अलभन्तः । एतेषु कानिचन पुरास्थलानि प्रपातानां समीपे आसन् । अधिकांशतः उपकरणानि चूनापाषाणैः निर्मीयन्ते स्म ।

किं भवान् अपरप्रकारकस्य पुरास्थलानां नामानि ज्ञापयितुं शक्नोति ?

अन्यत्र

स्वमानचित्रे फ्रांसम् अन्वेषयतु । इदं चित्रं फ्रांसस्य कस्यचित् गुहायाः अस्ति । एतस्य पुरास्थलस्य अन्वेषणं प्रायः शतं वर्षाणि पूर्वं चतुर्भिः विद्यालयच्छात्रैः कृतम् आसीत् । एतादृशानि चित्राणि प्रायः विंशतिं सहस्रं वर्षेभ्यः प्राक् आरभ्य दश सहस्रं वर्षाणां मध्ये निर्मितानि स्युः। एतेषु बहूनां पशूनां चित्राणि सन्ति । एतेषु वन्याश्च-गो-महिषी-गैंडा-रेनडियर-बारहसिंघा-सूकरादयः च गभीरद्युतिपूर्णैः वर्णैः चित्रिताः सन्ति ।

एतानि वर्णानि लौहायस्कैः चारकोलसदृशैः खनिजपदार्थैः च निर्मीयन्ते स्म । इदं सम्भाव्यते यत् एतानि चित्राणि उत्सवकाले निर्मीयन्ते स्म अथवा पुनः एतानि आखेटकैः आखेटात् प्राक् केषाञ्चित् अनुष्ठानानां कृते निर्मितानि स्युः।

किं भवान् एतेषां निर्माणस्य किञ्चित् कारणं ज्ञापयितुं शक्नोति ?



उपयोगि-शब्दः
आखेटक-खाद्य-सङ्ग्राहकः,
पुरास्थलम्,
उद्योगस्थलम्,
आवासीय-स्थलम्,
पुरापाषाणः,मध्यपाषणः,लघपाषाणः

काश्चन-महत्वपूर्ण-तिथयः

- मध्यपाषाण-युगम् (१२०००-१०००० वर्षेभ्यः पूर्वम्)
- नवपाषाणयुगस्य आरम्भः (१०,००० वर्षेभ्यः पूर्वम्)

कल्पनां कुर्वन्तु

भवान् अद्यारभ्य १२०००वर्षेभ्यः पूर्वं पाषाणमय-गुहायां निवसति । १५पृष्ठे पश्यतु। भवतः मातुलः गुहायाः कस्याञ्चित् अन्तःभितौ चित्राणि रचयति अपि च भवान् तस्य साहाय्यं कर्तुम् इच्छति। भवान् वर्णं रचयिष्यति रेखाः आकर्क्ष्यति अथवा पुनः तासु वर्णं पूरयिष्यति ? भवतः मातुलः भवन्तं काः काः कथाः श्रावयिष्यति?

आगच्छन्तु स्मरणं कुर्मः

१. एतानि वाक्यानि पूरयन्तु ।

क) आखेटक-खाद्य-सङ्ग्राहकाः गुहासु एतदर्थं निवसन्ति स्म यतो हि ___।

ख) घासस्य क्षेत्राणां विकासः _____वर्षेभ्यः पूर्वम् अभवत् ।

ग) आरम्भिकजनाः गुहानां_____चित्राणि विलिखितवन्तः ।

घ) हुँस्गीमध्ये _____उपकरणानि निर्मीयन्ते स्म ।

२. उपमहाद्वीपस्य आधुनिक-राजनैतिक-मानचित्रं १३६तमे पृष्ठे पश्यतु । तानि राज्यानि अन्वेषयतु यत्र भीमबेटका-हुँस्गी-कूरनूलाः च स्थिताः सन्ति । किं तुषारस्य रेलयानम् एतेभ्यः स्थानेभ्यः भूत्वा गतं स्यात्?

आगच्छन्तु चर्चां कुर्मः

३. आखेटक-खाद्य-सङ्ग्राहकाः एकस्मात् स्थानात् अपरस्मिन् स्थाने किमर्थं भ्रमन्ति स्म ? तेषां यात्रायाः कारणम् अपि च वर्तमानकालस्य अस्माकं यात्रायाः कारणेषु काः समानताः सन्ति अपि च काः विभिन्नताः सन्ति?

४. अद्य भवान् फलानि कर्तयितुं कस्य उपकरणस्य प्रयोगं करिष्यति? तत् उपकरणं केन वस्तुना निर्मितं स्यात् ?

५. आखेटक-खाद्य-सङ्ग्राहकाः अग्नेः उपयोगं केषां केषां वस्तूनां कृते कुर्वन्ति स्म? किं भवान् अद्य अग्नेः उपयोगं एतेषु कस्यचित् वस्तुनः कृते करिष्यति !

आगच्छन्तु कृत्वा पश्यामः



६. स्वपुस्तिकायाः पृष्ठे एकां पङ्क्तिं निर्माय एतस्याः कोष्ठकद्वयं रचयतु। वामभागस्य कोष्ठके तेषां खाद्यपदार्थानां सूचीं रचयतु यान् आखेटक-खाद्य-सङ्ग्राहकाः खादन्ति स्म (एकादशपृष्ठे पश्यतु) अपि च दक्षिणस्थे कोष्ठके भवान् यान् पदार्थान् खादति तेषु केषाञ्चित् नामानि लिखतु। किं भवान् एतयोः द्वयोः कामपि समानताम् अथवा भेदं पश्यति ?

७. यदि भवतः पार्श्वे काचित् गुटिका स्यात् (प्राकृतिक-पाषाण-खण्डः यथा त्रयोदश पृष्ठे दर्शितः अस्ति) तर्हि भवान् तस्य प्रयोगः कस्य कार्यस्य कृते करिष्यति?

८. एतादृशं कार्यद्वयं लिखतु ये अद्य महिलाः पुरुषाः च इति उभौ कुर्वतः। एतादृशं कार्यद्वयं ज्ञापयतु ये केवलं महिलाः एव कुर्वन्ति अपि च द्वे कार्ये ये केवलं पुरुषाः एव कुर्वन्ति। स्वसूच्याः स्वस्य द्वयोः मित्रयोः सूच्या सह तोलनां करोतु। किं भवान् एतयोः द्वयोः काञ्चित् समानताम् अथवा भेदं पश्यति ?

इति द्वितीयोऽध्यायः

अध्यायः 3

भोजनसङ्ग्रहात् उत्पादनपर्यन्तम् ?

नेइनुओ इत्यस्याः भोजनम्

अद्य नेइनुओ स्वस्य रुचिकरं भोजनं कुर्वती आसीत् – तत्र भोजने सा ओदनं, शीतलपेयं कुष्माण्डं माषाज्यं मांसं च खादति स्म । तस्याः मातामही स्वगृहस्य पृष्ठस्थभागे लघ्वोद्याने एव शीतलपेयं कुष्माण्डः माषाज्यम् इत्येतानि शाकानि च उत्पादितवती आसीत् । भोजनं कुर्वती नेइनुओ स्वस्याः गतदिनेषु विद्यालयपक्षतः कृतायाः यात्रायाः काले मध्यप्रदेशे भुक्तभोजनस्य स्मरणम् अकरोत् । तत् कियत् उपस्कारितम् आसीत् । परन्तु तत् एतादृशं कस्मात् कारणात् आसीत् ?

विभिन्नप्रकारकाणि भोजनानि

अद्यत्वे वयं स्वभोजनस्य अधिकांशं भागं प्ररोहितसस्येभ्यः पालितपशुभ्यः च प्राप्नुमः । भिन्नानि सस्यानि प्ररोहितुं भिन्नयोः जलवाय्वोः आवश्यकता भवति यथा धान्यस्य कृष्यर्थं गोधूमयवयोः तोलनायाम् अधिकजलस्य आवश्यकता भवति । अतः वयं पश्यामः यत् कृषकाः विशिष्टं सस्यं विशिष्टक्षेत्रेषु एव प्ररोहन्ति । एतद् एव न पशूनां कृते अपि स्वानुकूलं वातावरणस्य आवश्यकता भवति । उदाहरणार्थं वयं द्रष्टुं शक्नुमः यत् शुष्क-पर्वतीय-जलवायुषु पशूनां तोलनायां अजादयः सहजतया जीवितुं शक्नुवन्ति। परन्तु यथा भवती द्वितीये अध्याये पठितवती स्त्रीपुरुषाः स्वभोजनस्य उत्पादनं सर्वकाले न कृतवन्तः।

कृषेः पशुपालनस्य च प्रारम्भः

द्वितीयेऽध्याये अस्माभिः पठितं यत् संसारस्य जलवायू परिवर्तेते । जनाः च येषां वनस्पतीनां पशूनां च भोजनस्य रूपेण प्रयोगं कुर्वन्ति स्म ते अपि परिवर्तिताः। खाद्यवनस्पतयः कुत्र प्राप्तुं शक्यन्ते जनानां ध्यानं एतत् तथ्यं प्रति गतम् बीजानि कथं स्वडंठ्ल इत्यस्मात् कथं त्रोटित्वा अधः पतन्ति पतितबीजानाम् अङ्कुरणम् अपि च तेभ्यः पादपानां प्ररोहणम् इत्यादिः । अनेन एव प्रकारेण ते पादपानां संरक्षणम् आरब्धवन्तः स्युः । चटकाभ्यः वन्यपशुभ्यः च पादपानां सुरक्षा कृता स्यात् यतः ते समीचीनतया उत्पत्तिं गच्छेयुः तेषां बीजानि सम्यक्तया पक्वानि स्युः। अनेन प्रकारेण ते कालक्रमेण कृषकाः जाताः स्युः।

अनेन एव प्रकारेण जनाः गृहस्य पार्श्वे पशूनां कृते घासादिखाद्यं स्थापयित्वा लोभपाशे तान् पातयित्वा गृह्यपशून् इति कृतवन्तः स्युः । आदौ यः वन्यपशुः गृह्यपशुः इति कृतः सः कुक्कुरस्य वन्यपूर्वजः आसीत् । शनैः शनैः जनाः अजावि-गो-सूकरसदृशान् पशून् स्वगृहाणां समीपम् आगन्तुम् प्रेरितवन्तः । एतादृशः पशवः समूहेषु निवसन्ति स्म अपि च अधिकतराः घासं खादन्ति स्म । प्रायः जनाः अन्येभ्यः वन्यप्राणिभ्यः तेषां रक्षणं कुर्वन्ति स्म अनेन प्रकारेण ते शनैः शनैः पशुपालकाः जाताः स्युः ।

किं भवती ज्ञापयितुं शक्नोति यत् आदौ कुक्करान् एव गृहपोषितान् किमर्थं कृतवन्तः?

वासस्य प्रक्रिया

पादपानां प्ररोहणं पशूनानां च रक्षणम् यद् अस्ति जनैः तस्य कृते 'वासस्य प्रक्रिया' (बसने की प्रक्रिया) इति नाम प्रदत्तम् । गृहपोषिताः पादपाः अपि च पशवः प्रायः वन्यपादपेभ्यः जन्तुभ्यः च पृथक् भवन्ति । एतस्य कारणम् अस्ति यत् वासस्य प्रक्रियायाः दिशि गृहीतपादपानां पशूनां च जनाः चयनं कुर्वन्ति । उदाहरणार्थं जनाः तेषां पादपानां पशूनां च एव चयनं कुर्वन्ति येषां रुग्णतायाः सम्भावना न्यूना स्यात् । एतत् एव न, जनाः तेषां पादपानाम् एव चयनं कुर्वन्ति येभ्यः दीर्घबीजयुक्तानि अन्नानि उत्पद्यन्ते सार्धम् एव येषां बृन्तं दृढं स्यात् यः अन्नस्य पक्वबीजानां भारं सोढुं समर्थः स्यात् । एतादृशानां पादपानां बीजानि जागरूकतया स्थाप्यन्ते यतः पुनः प्ररोहितुं तेषां गुणाः सुरक्षिताः तिष्ठेयुः ।

ते एव पशवः अग्रे प्रजननार्थं चीयन्ते ये सामान्यतया अहिंसकाः भवन्ति । अतः वयं पश्यामः यत् पालिताः पशवः कृष्यर्थं गृहीतपादपाः च वन्यपशुभ्यः वन्यपादपेभ्यः च निरन्तरं भिन्नाः उपागताः । उदाहरणार्थं वन्यपशूनां तोलनायां पालितपशूनाम् अर्थात् ग्राम्यपशूनां च दन्ताः शृङ्गाः च लघवः भवन्ति ।

एतान् दन्तान् पश्यन्तु। एतेषु कः वन्यसूकरस्य अस्ति अपि च कः ग्राम्यसूकरस्य अथवा पालितसूकरस्य अस्ति ?

वासस्य प्रक्रिया आसंसारं शनैः शनैः अचलत् । इयं प्रायः १२०००वर्षेभ्यः प्राक् प्रारब्धा । वास्तविकतायाम् वर्तमानकाले वयं यद् भोजनं कुर्मः तत् अस्याः वासस्य प्रक्रियायाः कारणात् एव अस्ति । कृष्यर्थं स्वीकृतेषु सर्वप्राचीनसस्येषु गोधूमाः यवाः च आयान्ति तथैव आदौ पालितेषु पशुषु कुक्कुरेभ्यः पश्चात् मेषाः अजाः च सम्मिलिताः सन्ति ।

काचित् नवीनजीवन-शैली

भवती कस्यचित् पादप-बीजस्य रोपणं कृत्वा पश्यतु, भवती द्रक्ष्यति यत् एतस्य विकसने कञ्चित् कालः अपेक्षते । एतेषु कानिचन दिनानि मासाः अथवा वर्षाणि

अन्नस्य उपयोगाः

बीजरूपेण
खाद्यरूपेण
उपहाररूपेण
भण्डारणरूपेण

लगितुं शक्नुवन्ति । अतः यदा जनाः पादपानां प्ररोहणम् आरब्धवन्तः तदा तेषां रक्षणार्थं तैः एकस्मिन् एव स्थाने चिरकालं यावत् वसितव्यं भवति स्म । बीजवपनाद् आरभ्य सस्यानां पाकं यावत् पादपानां सेचनाय अवाञ्छिततृणानि अपाकर्तुं जन्तुभ्यः चटकाभ्यः च तेषां रक्षार्थं तैः तत्र एव वासः करणीयः भवति स्म । एतादृशानि बहूनि कार्याणि तत्र सम्मिलितानि आसन्। कर्तनस्य पश्चात् अन्नस्य उपयोगः जागरूकतया करणीयः भवति स्म ।

अन्नानां भोजनबीजरूपेण संरक्षणम् आवश्यकम् आसीत् अतः जनाः एतस्य भण्डारणस्य विषये चिन्तितवन्तः । बहुषु क्षेत्रेषु जनाः दीर्घाणि मृन्मयाणि पात्राणि रचितवन्तः कण्डोलाः निर्मिताः अथवा पुनः भूमौ गर्तं कृत्वा तत्र तानि स्थापितवन्तः।

किं भवती अनुभवति यत् आखेटकाः अथवा भोजनसङ्ग्राहकाः पात्राणि रचयन्ति स्म अपि च तेषां प्रयोगं कुर्वन्ति स्म ? स्वोत्तरस्य कारणं ज्ञापयतु।

पशवः : चलखाद्यभण्डाराः

पशवः प्रजननं कुर्वन्ति यस्मात् तेषां सङ्ख्या वर्धते । यदि पशूनां संरक्षणं भवेत् तर्हि तेषां सङ्ख्या तु वर्धते एव सार्धम् एव तेभ्यः दुग्धम् अपि प्राप्तुं शक्यते यत् भोजनस्य कश्चित् उत्तमं स्रोतः अस्ति । एतद् एव न पशुभ्यः अस्मभ्यं मांसम् अपि लभते । अपरेषु शब्देषु पशुपालनं भोजन-भण्डारणस्य कश्चित् उपायः अस्ति।

भोजनम् अतिरिच्य पशुभ्यः किं किं लब्धुं शक्यते?

अद्य पशूनाम् उपयोगः किमर्थं भवति?

आगच्छतु,आरम्भिकपशुपालकानां कृषकाणां च विषये जानीमः?

द्वितीयं मानचित्रं (पृष्ठसङ्ख्या-१४)पश्यतु। किं भवती तत्र बहून् नीलवर्गान् पश्यति ? जानाति, एतेषु प्रत्येकबिन्दुः तं स्थानं दर्शयति, यत्र पुरातत्त्वविदः प्रारम्भिककृषकाणां पशुपालकानां च भवनस्य साक्ष्याणि च प्राप्तवन्तः सन्ति। एतानि सम्पूर्णे उपमहाद्वीपे प्राप्तानि सन्ति । एतेषु सर्वथा महत्त्वपूर्णानि साक्ष्याणि पश्चिमोत्तरक्षेत्रे आधुनिककाश्मीरेषु पूर्वीदक्षिणभारते प्राप्तानि सन्ति।

वास्तविकतायां एतानि निर्दिष्टस्थानानि कृषकाणां पशुपालकानां च निवासाः आसन् अथवा न आसन् एतस्य निरीक्षणाय वैज्ञानिकाः प्राप्तखननपादपानां पशूनां च अस्थ्नाम् अवशेषान् स्वीकृत्य तेषाम् अध्ययनं कुर्वन्ति । एतेषु सर्वथा रोचकानि ज्वलितान्नस्य बीजानां च अवशेषाः सन्ति । इत्थं प्रतिभाति यत् एते प्रमादात् अथवा ज्ञात्वा ज्वलितानि स्युः। वैज्ञानिकाः एतेषाम् अन्नानां परिचयं प्राप्तुं शक्नुवन्ति ।

अनेन प्रकारेण वयं जानीमः यत् एतस्य उपमहाद्वीपस्य विभिन्नेषु भागेषु बहूनि सस्यानि प्ररोहितानि स्युः । वैज्ञानिकाः विभिन्नानां पशूनां अस्थ्नाम् अपि ज्ञानं प्राप्तुं शक्नुवन्ति ।

अधोलिखिततालिकातः भवती इदं ज्ञातुं शक्नोति यत् कुत्र कुत्र अन्नानां पालितपशूनां च अवशेषाः लब्धाः सन्ति ।

अन्नानि अस्थीनि च	पुरास्थलानि
गोधूम-यव-अजा-अवि-पशवः	मेहरगढम्(आधुनिक-पाकिस्तानम्)
तण्डुलाः पशूनाम् अस्थ्नां खण्डाः	कोल्डिहवा (आधुनिकोत्तरप्रदेशः)
तण्डुलाः,पशवः (मृत्तिकायां खुराणां चिह्नानि)	महागढा (आधुनिकोत्तरप्रदेशः)
गोधूमाः द्विदलानि च	गुफकालः (आधुनिक-काश्मीरम्)
गोधूमाः द्विदलानि कुक्कुराः पशवः महिषः अजा अविः	बुर्जहोमः (आधुनिक-काश्मीरम्)
गोधूमः हरितचणकाः यवाः महिषी वृषभः	चिरांदः (आधुनिक-बिहारः)
प्रियङ्गुः पशवः अजः अविः सूकरः	हल्लूरः (आधुनिक-आन्ध्रप्रदेशः)
कृष्णचणकाः प्रियङ्गवः पशवः अवयः सूकराः	पैय्यमपल्ली (आधुनिक-आन्ध्रप्रदेशः)
येषु स्थानेषु अन्नस्य अस्थ्नां च अवशेषाः प्राप्ताः सन्ति, एतानि तेषु केवलं कानिचन एव सन्ति ।	

स्थायिजीवनं प्रति

पुरातत्त्वविदः केषुचित् पुरास्थलेषु पर्णकुटीराणां गृहाणां च चिह्नानि प्राप्तवन्तः सन्ति । यथा बुर्जहोमे (वर्तमानकाश्मीरेषु) जनाः गर्तस्य अधः गृहाणि निर्मान्ति स्म । ये गर्तवासाः इति उच्यन्तेव । एतेषु अधः अवतर्तुं सोपानानि भवन्ति स्म । यतः ते शैत्यकालेषु सुरक्षिताः भवन्ति स्म । पुरातत्त्वविदः पर्णकुटीराणाम् अन्तः बहिः च अग्निप्रज्वालनस्य स्थानं प्राप्तवन्तः सन्ति । इत्थं प्रतिभाति यत् जनाः वातावरणस्य अनुसारं गृहस्य अन्तः बहिश्च भोजनं पचन्ति स्म ।

कस्यचित् गर्तवासस्य चित्रं रचयतु ।

बहुभ्यः स्थानेभ्यः पाषाणमयानि उपकरणानि अपि प्राप्तानि सन्ति । एतेषु कानिचन एतादृशानि सन्ति यानि पुरापाषाणयुगीनैः उपकरणैः भिन्नानि सन्ति ।

अतः तानि नवपाषाणयुगस्य मन्यन्ते । एतेषु तानि उपकरणानि अपि सन्ति येषां तीक्ष्णतायै तेषु वर्णलेपः क्रियते स्म । उलूखलस्य मुसलस्य च प्रयोगः अन्नेभ्यः वनस्पतिभ्यः च प्राप्तानि अन्यानि वस्तूनि पेष्टुं क्रियते स्म । अद्य सहस्राधिकवर्षाणाम् पश्चात् अपि उलूखलस्य मुसलस्य च प्रयोगः अन्नं पेष्टुं क्रियते । तथैव प्राचीन-

नवपाषाणयुगस्य कानिचन उपकरणानि। एतेषां तोलनां त्रयोदश पृष्ठे द्वितीये अध्याये दर्शितोपकरणैः सह करोतु । भवती एतेषु काः समानताः काः विभिन्नताः च पश्यति ?

स्तरयुगीनोपकरणानां निर्माणः प्रयोगः च निरन्तरं भवति । कानिचन उपकरणानि अस्थिभिः अपि निर्मीयन्ते स्म ।

नवपाषाणयुगस्य पुरास्थलेभ्यः बहुविधानि मृण्मयपात्राणि अलभन्त । कदाचित् एतेषु अलङ्करणम् अपि क्रियते स्म । पात्राणाम् उपयोगः वस्तूनि स्थापयितुं क्रियते स्म । शनैः शनैः जनाः पात्राणां प्रयोगं भोजनं पक्तुं अपि आरब्धवन्तः । तण्डुल-गोधूम-द्विदलसदृशानि अन्नानि अधुना आहारस्य महत्त्वपूर्णभागभूतानि जातानि आसन् । जनाः अधुना वस्त्रस्य वयनम् अपि आरब्धवन्तः आसन् । एतन्निमितं कार्पाससदृशानां पादपानाम् प्ररोहणम् अपि कर्तुं शक्यते स्म ।

किम् एतानि परिवर्तनानि प्रत्येकं स्थाने सहैव जातानि स्युः ? इत्थं नास्ति । एकतः यत्र बहुषु स्थानेषु स्त्रीपुरुषाः आखेटं भोजनसङ्ग्रहणस्य च कार्यं कर्तुम् आरब्धवन्तः आसन् तत्र एव अन्ये जनाः सहस्रं वर्षेषु शनैः शनैः पशुपालनम् अङ्गीकृतवन्तः । अनेकेषु स्थानेषु जनाः ऋत्वनुसारं परिवर्त्य स्वाजीविकाः चालयन्ति स्म ।



किं भवती कल्पनां कर्तुं शक्नोति यत् एतस्मिन् पात्रे किं स्थापितं स्यात्?

अन्याः परम्पराः

पुरातत्त्वविदः बहु स्पष्टतया एतस्मिन् विषये न किमपि वक्तुं शक्नुवन्ति । विद्वान्सः एतादृशानां कृषकाणाम् अध्ययनं कृतवन्तः । एतेषु प्रायः कृषकाः पशुपालकाः च समूहेषु निवसन्ति सा एव जनजातिः कथ्यते । विद्वान्सः अनुभूतवन्तः यत् एते जनाः काश्चन एतादृशीः परम्पराः मन्यन्ते स्म याः सम्भवतः पूर्वतः एव प्रचलिताः सन्ति ।

जनजातिः

प्रायः जनजातीयाः जनाः लघुनिवासेषु निवसन्ति । अधिकतराः परिवाराः परस्परं सम्बन्धिताः भवन्ति अपि च एतादृशानां परिवाराणां समूहाः सम्भूय जनजातेः निर्माणं कुर्वन्ति ।

जनजातेः सदस्याः आखेट-भोजनसङ्ग्रह-कृषि-पशुपालन-मत्स्यग्रहणसदृशान् व्यवसायान् कुर्वन्ति । प्रायः महिलाः कृषेः सम्पूर्णं कार्यं कुर्वन्ति । एतेषु भूमिं सज्जीकृत्य बीजवपनात् पादपरक्षणात् च आरभ्य सस्यकर्तनं यावत् कार्यं सम्मिलितम् अस्ति । बालाः पादपानां संरक्षणं कुर्वन्ति अपि च चटकान् पशून् दूरं पलाययन्ते यतः ते पादपानां सस्यानां च हानिं न कुर्युः । महिलाः सस्यस्य वपनं कृत्वा अन्नस्य पेषणं कुट्टनं च कुर्वन्ति । सामान्यतः पुरुषाः पशूनां महान्तं समूहं चारयन्ति अपरञ्च बालाः लघुसमूहान् चारयन्ति । अत्र पशूनां स्वच्छतां दुग्धनिष्कासनं अर्थात् दोहनं स्त्रीपुरुषाः मिलित्वा कुर्वन्ति। तथैव द्वौ मिलित्वा पात्रनिर्माणस्य कण्डोलनिर्माणस्य उपकरणनिर्माणस्य पर्णकुटीराणां निर्माणस्य च कार्यं कुर्वन्ति । गानं नृत्यं गृहसज्जाकार्यम् अपि तेषां जीवनस्य कश्चित् महत्त्वपूर्णः भागः अस्ति ।

- केचन जनाः नेतारः इति मन्यन्ते । ते अनुभवि-वृद्ध-जनाः, युव-योद्धारः, अथवा पुरोहिताः भवितुं शक्नुवन्ति । वयस्कमहिलानां कृते अपि तासां ज्ञानाय अनुभवाय च विशिष्टसम्मानं दीयते ।
- जनजातीयानां सांस्कृतिक-परम्पराः बहु समृद्धाः विशिष्टाः च भवन्ति । एतासु तेषां भाषाः,सङ्गीतं कथाः चित्रकला अपि सम्मिलिताः सन्ति । तेषां स्वकीयाः देवताः भवन्ति।
- भूमि-जंगल-घासक्षेत्राणि अपि च जलं कुटुम्बस्य सम्पत्तिः मन्यते येषाम् उपयोगः सर्वे सहैव कुर्वन्ति । एतेषु निर्धनधनिकयोः मध्ये कश्चित् विशिष्टम् अन्तरं न भवति । अतः जनजातीयसमाजः अन्येभ्यः समाजेभ्यः पृथक् भवति । एतेषाम् अन्येषां समाजानां विषये भवती अग्रे पठिष्यति।

पुरुषैः क्रियमाणानां कार्याणां काञ्चित् सूचीं निर्मातु । महिलाः कानि कानि कार्याणि कुर्वन्ति ? कानि तादृशानि कार्याणि सन्ति यानि स्त्रीपुरुषाः मिलित्वा कुर्वन्ति ?

सूक्ष्मनिरीक्षणम्

(क) मेहरगढे जीवन-मृत्यू

द्वितीये मानचित्रे चतुर्दशे पृष्ठे मेहरगढम् अन्वेषयतु । अयम् ईरानगमनार्थं यः महत्तमः मार्गः अस्ति तन्मध्ये बोलन इति स्थानस्य पार्श्वे कश्चित् हरितिमायुक्तं समतलं स्थानम् अस्ति । मेहरगढं सम्भवतः तत् स्थानम् अस्ति यत्र स्त्रीपुरुषाः आदौ यव-गोधूमयोः प्ररोहणम् अपि च अजावीनां पालनम् शिक्षितवन्तः।

अत्र खनने सर्वादौ पूर्वतनेभ्यः स्तरेभ्यः पुरातत्त्वविदः विभिन्नप्रकारकाणां पशूनाम् अस्थीनि प्राप्तवन्तः । एतेषु हरिणसूकरसदृशानां वन्यप्राणिनाम् अस्थीनि अपि सम्मिलितानि सन्ति । पश्चात्जातेभ्यः स्तरेभ्यः अजावीनां च अस्थीनि आधिक्येन लब्धानि सन्ति। ततः परम् आधिक्येन पशूनाम् एव अस्थीनि लब्धानि सन्ति इत्थं प्रतिभाति यत् एते जनाः पशूनां पालनम् आरब्धवन्तः आसन् ।

ग्रामः
ग्रामाणाम् इयं विशेषता अस्ति यत् तत्र वास्तव्याः अधिकतराः जनाः भोजनस्य उत्पादने संलग्नाः भवन्ति ।

पूर्वतनकालस्य पश्चात् जातस्य च कालस्य स्तराः

यदा पुरातत्त्वविदः कस्य स्थानस्य खननं कुर्वन्ति तदा ते कथम् अवगच्छन्ति यत् के स्तराः पूर्वतनीयाः सन्ति अपि च के स्तराः पश्चात्तनीयाः सन्ति ?

एतत् चित्रं पश्यतु।

मन्यतां जनाः सर्वादौ समतलभूमौ (स्तरः- ४) वासम् आरब्धवन्तः। सामान्यतया जनाः यत्र निवसन्ति गृहे त्रुटिते सति तत्रैव पुनः गृहं निर्मान्ति। जीर्णानि शीर्णानि वस्तूनि अवकराः च अपि गृहाणां पार्श्वे सङ्गृहीताः भवन्ति। एतस्मात् कारणात् वासस्य भूमिः उन्नता भवति अपि च सहस्रस्य वर्षाणां पश्चात् तत्र कश्चित् उच्चस्थानं (टीला) निर्मितं भवति। अतः यदा



तस्य टीला इत्यस्य खननं क्रियते तदा तस्य अधस्तनं स्थानं पुरातनतमं भवति तत्पश्चात् स्तरः पश्चात्जातानां युगानां भवन्ति। एतानि नतोन्नतानि तलानि एव सामान्यरूपेण स्तराणां रूपेण ज्ञायन्ते।

द्वितीयं तृतीयं च स्तरं पश्यतु। एतयोः स्तरयोः कः पुरातनतरः अस्ति ?

मेहरगढे एतद् अतिरिच्य चतुराकाराणां तथा च आयताकार-गृहाणाम् अवशेषाः अपि प्राप्ताः सन्ति। प्रत्येकं गृहेषु चत्वारः अथवा ततोऽधिकाः प्रकोष्ठाः सन्ति, येषु केचन सम्भवतः भाण्डारणस्य कार्ये प्रयुक्ताः स्युः।

मृत्योः पश्चात् तस्य परिजनाः तस्य सम्मानं कुर्वन्ति। जनानाम् आस्था वर्तते यत् मृत्योः पश्चात् अपि जीवनं भवति। अतः प्रेतभूमिषु मृतकैः सह कानिचन वस्तूनि अपि स्थाप्यन्ते स्म। मेहरगढे एतादृशानि बहूनि स्थानानि लब्धानि सन्ति। एकस्मिन् प्रेतभूमौ मृतकेन सार्धं काचित् अजा अपि भूमिसात् कृता आसीत्। सम्भवतः इयं परलोके मृतकस्य जनस्य कृते भक्षणाय स्थापिता स्यात्।



मेहरगढस्थस्य गृहस्य चित्रम्।

मेहरगढस्य गृहाणि प्रायः एवं दृश्यमानानि स्युः। त्वं यस्मिन् गृहे निवससि तेन सह एतस्य गृहस्य का समानता अस्ति ?

मेहरगढस्थस्य प्रेतभूमेः चित्रम्।

किं त्वम् अजायाः अस्थिपञ्जरं परिचेतुं शक्नोषि ?

(ख) दाओजली-हेडिंगः

द्वितीये मानचित्रे (पृष्ठम्- १४) दोओजली-हेडिंगम् अन्वेषयतु । इदं पुरास्थलं चीनम्यांमारौ प्रति गमनशीले मार्गे ब्रह्मपुत्रस्य उपत्यकायाः कस्मिंश्चित् पर्वते अस्ति । अत्र खरल-मुसल-सदृशानां पाषाणानाम् उपकरणानि प्राप्तानि सन्ति । एतेभ्यः ज्ञायते यत् अत्र जनाः भोजनार्थं अन्नानि प्ररोहन्ति स्म । सहैव अत्र जेडाइटपाषाणः अपि अलभत । सम्भवतः अयं पाषाणः चीनतः आगतः स्यात् । एतत् अतिरिच्य एतस्मात् पुरास्थलात् काष्ठाश्मनः (अतिप्राचीनं काष्ठम् यत् दृढं भूत्वा पाषाणः इति जातम्) उपकरणानि पात्राणि च अपि उपलब्धानि सन्ति ।

अन्यत्र

मानचित्रे तुर्कीम् अन्वेषयतु । नवपाषाणयुगस्य सर्वप्रसिद्धपुरास्थलेषु कश्चित् चलात-ह्यूकः तुर्क्याम् अस्ति । अत्र दूरस्थेभ्यः स्थानेभ्यः अनेकानि वस्तूनि आनीयन्ते स्म अपि च तेषाम् उपयोगः क्रियते स्म । यथा सीरियातः आनीतः चकमकपाषाणः, रक्तसागरस्य कौडियाँ इति, भूमध्यसागरस्य च सीपियाँ इति । ध्यातव्यं यत् तत्कालं यावत् चक्र-युक्तस्य वाहनस्य आविष्कारः विकासः वा न अभवत् आसीत् । जनाः वस्तूनि स्वयं स्वस्कन्धयोः पशूनां च पृष्ठभागेषु स्थापयित्वा आरोहयित्वा च नयन्ति स्म ।

बोधयतु यत् कौडियाँ सीपियाँ इत्येतेषां च प्रयोगः किमर्थं जातं स्यात् ?

कल्पनां करोतु

यदि भवत्याः पार्श्वे कश्चित् भूखण्डः भवेत् तदा भवती तस्मिन् किं सस्यं प्ररोहिष्यति। बीजानि कुतः लप्स्यन्ते ? अपि च तानि कथम् उप्स्यति ? स्वपादपानां निरीक्षणं भवती कथं करिष्यति ? अपि च कथम् इदं ज्ञास्यति यत् अधुना सस्यं कर्तनीयम् अस्ति न वा ?

उपयोगि-शब्दाः
कृषकः,
पशुपालकः,
नवपाषाणयुगम्,
पात्रम्,
जनजातिः,
ग्रामः,
गृहम्,
प्रेतभूमिः

काञ्चन महत्त्वपूर्णतिथयः

- वासस्य प्रक्रियायाः आरम्भः (प्रायः १२००० वर्षेभ्यःप्राक्)
- मेहरगढे वासस्थानकस्य आरम्भः(प्रायः ८००० वर्षेभ्यः प्राक्)

आगच्छन्तु स्मरणं कुर्मः

१. कृषकाः चिरकालं यावत् एकस्मिन् एव स्थाने किमर्थं निवसन्ति स्म ?

२. पञ्चविंशतितमे पृष्ठे प्रदत्तां तालिकां पश्यतु । नेइनुओ यदि ओदनं बुभुक्षति तर्हि तया कानि स्थानानि गन्तव्यानि ?

३. पुरातत्त्वविदः इत्थं किमर्थं मन्यन्ते यत् मेहरगढस्य जनाः आदौ केवलं मांसभक्षिणः आसन्, अपि च अनन्तरकाले तेषां कृते पशुपालनं महत्त्वपूर्णं जातम् ?

४. उचितम् अथवा अनुचितं ज्ञापयतु ।

(क) हल्लूरे प्रियङ्गुः लब्धः अस्ति ।

(ख) बुर्जहोमे जनाः आयताकारगृहेषु निवसन्ति स्म ।

(ग) चिरांदः काश्मीरस्य कश्चित् पुरास्थलम् अस्ति ।

(घ) जेडाइटः यः दाओजलीहेंडिगे प्राप्तः अस्ति, चीनतः आनीतः स्यात् ।

आगच्छन्तु चर्चां कुर्मः

५. कृषक-पशुपालकानां जीवनस्य अपेक्षया आखेटक-खाद्य-सङ्ग्राहकानां जीवनं कियत् भिन्नम् आसीत्, अन्तरत्रयं ज्ञापयतु ।

६. २५तमे पृष्ठे प्रदत्ततालिकायां पशूनां सूचीं कुर्वन्तु अपि इदम् अपि ज्ञापयतु यत् एतेषां प्रयोगः केन रूपेण क्रियते स्म ।

आगच्छन्तु कृत्वा पश्यामः

७. भवती यानि अन्नानि खादति तेषां सूचीं निर्मातु ।

८. सप्तमस्य प्रश्नस्य उत्तरे लिखितान्नानि किं भवन्तः स्वयं प्ररोहयन्ति ? यदि आम्, तर्हि काञ्चित् तालिकां निर्माय तेषां कृषेः विभिन्नावस्थाः दर्शयन्तु । यदि नैव, तर्हि काञ्चित् तालिकां निर्माय दर्शयन्तु यत् एतानि अन्नानि कृषकाद् आरभ्य भवत्पर्यन्तं कथम् आगतानि ।

इति तृतीयोऽध्यायः

अध्यायः 4

आरम्भिक-नगराणि



पुरातन-भवनस्य संरक्षणम्

जसपालः हरप्रीतः च स्वगृहस्य पार्श्वस्थवीथिकायां क्रिकेट्क्रीडां कुर्वन्तौ आस्ताम्। तौ अपश्यतां यत् केचन जनाः तस्य जीर्णस्य शीर्णस्य च गृहस्य प्रशंसां कुर्वन्तः आसन्, यत् गृहं वीथिकायाः बालाः भुतहागृहम् इति कथयन्ति स्म।
काचित् अवदत् "एतस्य वास्तुकलां पश्यन्तु !"
किं भवत्या काष्ठे एतादृशी सुन्दरचित्रकला दृष्टा अस्ति ?" अपरा महिला उक्तवती, "अस्माभिः मन्त्रिमहोदयः पत्रं लिखित्वा वक्तव्यः यत् सः एतत् सुन्दरगृहं संरक्षयितुं एतस्य जीर्णोद्धारस्य व्यवस्थां कुर्यात्।
इदं सर्वं श्रुत्वा जसपालः हरप्रीतः च अचिन्तयताम्, यत् अस्मिन् पुरातनजीर्णभवने जनानाम् एतादृशी प्रीतिः कस्मात् कारणात् भवितुं शक्नोति ?

हडप्पायाः कथा

प्रायः पुरातनभवनं स्वकथां बोधयति। प्रायः १५० वर्षेभ्यः पूर्वं यदा पञ्जाबराज्ये प्रथमवारं रेलमार्गस्य विस्तारः क्रियमाणः आसीत्, तदा तस्मिन् कर्मणि रताः अभियान्त्रिकाः सहसा हडप्पापुरास्थलं प्राप्नुवन्, यत् च आधुनिक-पाकिस्ताने अस्ति। ते चिन्तितवन्तः यत् एषः एतादृशः ध्वंसावशेषः अस्ति यतः समीचीनाः इष्टिकाः लप्स्यन्ते। इत्थं विचिन्त्य ते हडप्पायाः ध्वंसावशेषेभ्यः सहस्राधिकाः इष्टिकाः उत्पाट्य आनयन् याभिः ते रेलमार्गं निर्मितवन्तः। एतस्मात्कारणात् अनेकानि भवनानि पूर्णतः नष्टानि अभवन्।
तदनन्तरं प्रायः ८० वर्षेभ्यः पूर्वं पुरातत्त्वविदः एतत् स्थलम् अन्विष्टवन्तः तदा ज्ञानम् अभूत् यत् एषः ध्वंसावशेषः उपमहाद्वीपस्य सर्वपुरातनेषु नगरेषु कश्चित् अस्ति। यतो हि एतस्य नगरस्य अन्वेषणं सर्वादौ अभवत् अतः अनन्तरकाले प्राप्तेषु एतादृशेषु पुरास्थलेषु यानि भवनानि अपि च वस्तूनि लब्धानि सन्ति तानि हडप्पासभ्यतायाः भवनानि इति उक्तानि। एतेषां नगराणां निर्माणं प्रायः ४७०० वर्षेभ्यः प्राक् अभवत्।
प्रायः पुरातनानि भवनानि त्रोटयित्वा तेषां स्थाने नूतनानि भवनानि निर्मीयन्ते। किं भवन्तः अनुभवन्ति यत् पुरातनानि भवनानि सुरक्षितानि स्थापनीयानि ?

एतानि नगराणि आधुनिक-पाकिस्तानस्य पञ्जाबसिन्धप्रान्तयोः भारतस्य गुर्जर-राजस्थान-हरियाणा-पञ्जाबप्रान्तेषु च लब्धानि सन्ति। एतेभ्यः सर्वेभ्यः स्थलेभ्यः पुरातत्त्वविदः विचित्राणि वस्तूनि प्राप्तवन्तः। यथा मृण्मयानि रक्तपात्राणि येषु कृष्णवर्णीयानि चित्राणि लिखितानि आसन्, पाषाणमयानि भारमानानि मुद्राः मणीकाः ताम्रमयोपकरणानि पाषाणस्य लम्बतराणि क्षुरपत्रादीनि च आसन्।

एतेषां नगराणां का विशेषता आसीत् ?

एतेषु नगरेषु अनेकानि नगराणि द्वयोः अथवा द्वयाधिकभागेषु विभक्तानि आसन्। प्रायः पश्चिमी भागः लघुः आसीत् परन्तु उन्नते स्थाने निर्मितम् आसीत् अपि च पूर्वीभागः दीर्घः आसीत् परन्तु अयं निम्ने क्षेत्रे आसीत्। उन्नतभागः पुरातत्त्वविद्भिः नगरदुर्गः इति उक्तः अपि च निम्नभागः निम्ननगरम् इति उक्तम् अस्ति। द्वयोः भागयोः प्राकाराः पक्वेष्टिकाभिः निर्मीयन्ते स्म। एतेषाम् इष्टिकाः शोभनप्रकारेण पक्वाः भवन्ति स्म यत् सहस्रं वर्षाणां पश्चात् अपि अद्यावधि तेषां भित्तयः स्थिराः आसन्। भित्तिं निर्मातुम् इष्टिकानां चयनं स्थापनं वा अनया रीत्या कुर्वन्ति स्म यत् भित्तयः सुदृढाः तिष्ठेयुः।

केषाञ्चित् नगराणां नगरदुर्गेषु कानिचन विशिष्टानि भवनानि रचितानि आसन्। उदाहरणार्थं मोहनजोदडो इत्यस्मिन् कश्चित् विशिष्टः तडागः निर्मितः आसीत्, यः पुरातत्त्वविद्भिः दीर्घं स्नानागारम् इति उक्तम् अस्ति। एतस्य तडागस्य निर्माणार्थं इष्टिकानां प्लास्टर इत्यस्य च प्रयोगः कृतः आसीत्। जलस्य स्रवणं वारयितुं प्लास्टरस्य उपरि चारकोलस्य लेपः स्थापितः आसीत्। एतं तडागं प्रति गन्तुं द्वयोः भागयोः सोपानानि रचितानि आसन् अपि च परितः प्रकोष्ठाः निर्मिताः आसन्। कूपतः यत्र जलं पूर्यते स्म उपयोगस्य पश्चात् एषः रिक्तः क्रियते स्म। प्रायः अत्र विशिष्टाः जनाः विशिष्टेषु अवसरेषु स्नानं कुर्वन्ति स्म।

कालीबंगा अपि च लोथलसदृशेषु अन्येषु नगरेषु अग्निकुण्डानि प्राप्तानि सन्ति, यत्र सम्भवतः यज्ञानि विहितानि स्युः। हडप्पा-मोहनजोदडो-लोथलसदृशेषु केषुचित् नगरेषु महान्ति सञ्चयगृहाणि प्राप्तानि सन्ति।





महान् स्नानागारः

भवनं नलिकाः राजमार्गाः च

हडप्पायाः नगरेषु इष्टिकानां स्थापनं चयनं वा।

तेषां नगराणां गृहाणि सामान्यतया तल-युक्तानि अथवा तलद्वयसहितानि भवन्ति स्म । गृहस्य प्राङ्गणं परितः प्रकोष्ठाः निर्मीयन्ते स्म । अधिकांशगृहेषु कञ्चित् पृथक् स्नानागारम् भवति स्म, अपि च केषुचित् गृहेषु कूपाः अपि भवन्ति स्म।

बहुषु नगरेषु आच्छादिताः नालिकाः आसन् । तासां निर्माणं सावधानं सरलपङ्क्तौ क्रियते स्म । प्रत्येकं नालिकायां स्वल्प-नमनता भवति स्म यतः जलं सरलतया प्रवहेत् । प्रायः गृहनालिकाः राजमार्गनालिकाभिः योज्यन्ते स्म याः अनन्तरकाले दीर्घनालिकाभिः सह संयुज्यन्ते स्म । प्रणालिकानाम् आच्छादनत्वात्स्थाने स्थाने मुख्यछिद्राणि क्रियन्ते स्म येषां माध्यमेन एतासां संरक्षणं स्वच्छता च भवितुं शक्नुयात् । गृहाणां नालिकानां राजमार्गाणां च निर्माणं योजनाबद्धरूपेण सहैव क्रियते स्म।

अत्र वर्णितेषु गृहेषु अपि च गताध्याये वर्णितेषु गृहेषु भवन्तः कां भिन्नतां पश्यन्ति ? केचन द्वे भिन्नते वदतु।

नगरीयं जीवनम्

हडप्पायाः नगरेषु महान् प्रतिस्वरः स्यात् तदानीम् । अत्र तादृशाः जनाः निवासं कुर्युः ये नगरस्य विशिष्टानि भवनानि निर्मातुं योजनायां संलग्नाः भवन्ति स्म। ये सम्भवतः अत्रत्याः शासकाः आसन् । इदम् अपि सम्भाव्यते यत् ते शासकाः जनान् प्रेष्य सुदूरदेशात् धातून् बहुमूल्य-पाषाणान् अन्यानि उपयोगीनि वस्तूनि च आनाययन्ति स्म। शक्यते यत् शासकाः सुन्दराणि रत्नानि सुवर्ण-रजताभूषण-सदृशानि बहुमूल्यानि वस्तूनि स्वस्य पार्श्वे स्थापयन्ति स्म । एतेषु नगरेषु लिपिकाः अपि भवन्ति स्म, ते मुद्रासु तु लिखन्ति एव अपि च प्रायः अन्येषु वस्तुषु अपि लेखयन्ति स्म यानि अवशिष्टानि न सन्ति।

एतत् अतिरिच्य नगरेषु शिल्पकाराः स्त्री-पुरुषाः अपि निवसन्ति स्म ये गृहेषु अथवा उद्योगस्थलेषु बहुविधानि वस्तूनि निर्मान्ति स्म। जनाः सुदूरदेशानां यात्राः अपि कुर्वन्ति स्म अपि च ततः उपयोगीनि वस्तूनि आनयन्ति,

उपरितमे भागे मोहनजोदडो इत्यस्य कश्चित् राजमार्गः वर्तते तस्मिन् च काचित् नालिका निर्मिता अस्ति। उपरि कश्चित् कूपः।
वामतः अधः हडप्पायाः काचित् मुद्रा।
एतस्याः मुद्रायाः उपरि टङ्कितानि चिह्नानि कस्याञ्चित् विशिष्टलिप्यां सन्ति। उपमहाद्वीपे प्राप्तलेखनस्य इदं प्राचीनतमम् उदाहरणम् अस्ति। विद्वांसः एतत् पठितुं प्रयासं कृतवन्तः परन्तु अधुना यावत् इदं स्पष्टं न अभवत् यत् एतस्य कः अर्थः अस्ति।
दक्षिणतः अधः- पक्वमृण्मयानि क्रीडनकानि सन्ति।



उपरि- पाषाणमयान् भारमापकान् पश्यन्तु। कियता ध्यानेन उपयुक्तोपायेन च एतेषां निर्माणं कृतम् अस्ति। एतेषां निर्माणं चर्ट-पाषाणेन कृतम् आसीत्। एतेषां निर्माणं प्रायः बहुमूल्यकानां पाषाणानां धातूनां च तोलनाय कृतं स्यात्।
मध्ये वामतः मणिकाः। एतेषु बहूनि कार्नीलियन-पाषाणैः निर्मितानि आसन्।

स्म, अपि च सहैव आनयन्ति स्म सुदूरदेशानां कथाः आख्यायिकाः च। मृण्मयानि बहूनि क्रीडनकानि च प्राप्तानि सन्ति यैः बालाः क्रीडन्तः स्युः।
नगरीयजनानां काञ्चित् सूचीं रचयन्तु। किम् एतेषु केचन एतादृशाः जनाः सन्ति, ये मेहरगढसदृशग्रामेषु निवसन्ति स्म ?

नगराणि नूतनशिल्पानि च

आगच्छन्तु अधुना केषाञ्चित् एतादृशानां वस्तूनां विषये पठामः यानि हडप्पायाः नगरेभ्यः प्राप्तानि सन्ति। पुरातत्त्वविदः यानि वस्तूनि तत्र प्राप्तवन्तः तेषु अधिकतराणि पाषाणमय-शङ्खमय-ताम्रमय-सुवर्णमय-रजतमयानि च आसन्। ताम्र-कांस्याभ्यां च उपकरणानि शस्त्राणि आभूषणानि पात्राणि च निर्मीयन्ते स्म। सुवर्णरजताभ्यां च आभूषणानि पात्राणि च निर्मीयन्ते स्म।
अत्र प्राप्तेषु आकर्षकवस्तुषु रत्नानि उत्तोलकाः फलकानि च सन्ति।



हडप्पासभ्यतायाः जनाः पाषाणमयाः मुद्राः निर्मान्ति स्म । एतेषु आयताकारासु मुद्रासु सामान्यतः पशूनां चित्राणि लभन्ते । हडप्पा-सभ्यतायाः जनाः कृष्णवर्णेन अलङ्कृतानि रक्तमृत्तिकायाः पात्राणि निर्मान्ति स्म । पश्यन्तु ६पृष्ठे ।

तृतीये अध्याये भवन्तः येषां ग्रामाणां विषये पठितवन्तः किं तत्रापि धातोः उपयोगः भवति स्म ?

किं ते पाषाणमयान् भारमापकान् निर्मान्ति स्म ?

सम्भवतः ७००० वर्षेभ्यः पूर्वं मेहरगढे कार्पासस्य कृषिः भवति स्म । मोहनजोदडोतः वस्त्रखण्डानाम् अवशेषाः रजतस्य कस्यचित् पुष्पधान्याः ढौकनानि तथा च अन्यैः ताम्रस्य वस्तुभिः संश्लिष्टानि आसन् तानि प्राप्तानि सन्ति । पक्वमृत्तिकया तथा च फेयन्स इत्यनेन निर्मित-तन्तु-कीलाः कार्पासवयनं सङ्केतयन्ति ।

एतेषु अधिकांशवस्तूनां निर्माणं विशेषज्ञाः कृतवन्तः आसन् । विशेषज्ञः सः उच्यते यः कस्यचित् विशिष्टवस्तुनः निर्माणार्थं विशिष्टरूपेण प्रशिक्षितः भवति यथा- पाषाणस्य विलेखनम्, रत्नानां द्युतिकरणम् अथवा पुनः मुद्रासु विशिष्टविलेखनम् । षड्त्रिंशत्तमे पृष्ठे चित्रं पश्यन्तु यत् प्रतिमायाः मुखं कियताकर्षकरूपेण रचितम् अस्ति अपि च तस्य श्मश्रूणि कियता शोभनप्रकारेण दर्शितानि सन्ति । इदं कार्यं कस्यचित् विशेषज्ञमूर्तिकारस्य एव भवितुं शक्नोति ।

प्रत्येकं जनः विशेषज्ञः न भवितुं शक्नोति स्म । अस्माभिः इदं न ज्ञातं यत् केवलं पुरुषाः एव एतादृशानां कार्याणां कृते प्रशिक्षणं स्वीकुर्वन्ति स्म अथवा पुनः केवलं महिलाः एव । प्रायः काश्चन महिलाः अपि च केचन पुरुषाः द्वौ एव एतस्मिन् कर्मणि दक्षाः आसन् ।

पाषाणान् कर्तयित्वा विलेख्य आकृष्य च मणिकाः निर्मिताः। एताः मध्यभागात् छिद्रिताः आसन् यतः सूत्रं स्थापयित्वा मालायाः निर्माणं कर्तुं शक्नुयात्।

मध्ये दक्षिणतः तीक्ष्णफलकम्

अधः वामतः – चित्रितं अलङ्कृतवस्त्रं वा ।

कस्यचित् महत्त्वपूर्णस्य जनस्य पाषाणमयी प्रतिमा या मोहनजोदडोतः लब्धा आसीत् । एतस्यां सः जनः अलङ्कृतवस्त्रेषु दर्शितः अस्ति ।

फेयन्स

पाषाणाः शङ्खाः च प्राकृतिकरूपेण प्राप्यन्ते परन्तु फेयन्सं कृत्रिमरूपेण सज्जीक्रियते । सिकतायाः अथवा स्फटिकपाषाणानां चूर्णं निर्यासे मेलयित्वा तेन वस्तूनि निर्मीयन्ते स्म । तदनन्तरं तेषु वस्तुषु कश्चित् स्निग्धलेपः आरोप्यते स्म । एतस्य स्निग्धलेपस्य वर्णाः प्रायः नीलाः अथवा समुद्रवर्णीयाः भवन्ति स्म । फेयन्स इत्यनेन रत्नानि वलयानि बाले इति लघूनि पात्राणि च रच्यन्ते स्म ।

असंशोधितसामग्र्याः अन्वेषणे

असंशोधितसामग्री ते पदार्थाः उच्यन्ते ये प्राकृतिकरूपेण लभ्यन्ते अथवा कृषकाः पशुपालकाः च तेषाम् उत्पादनं कुर्वन्ति यथा काष्ठधातूनां अयस्काः प्राकृतिकरूपेण उपलब्धाः असंशोधितपदार्थाः सन्ति । एतैः पुनः अनेकप्रकारकाणि वस्तूनि निर्मीयन्ते । उदाहरणार्थं कृषकैः उत्पादितकार्पासः असंशोधितपदार्थः इति उच्यते यतः वयनस्य पश्चात् वस्त्रं सज्जीक्रियते । हडप्पायां जनाः बहूनि वस्तूनि तत्र एव प्राप्नुवन्ति स्म परन्तु ताम्र-लौह-सुवर्ण-रजत-बहूमूल्यपाषाणसदृशानां पदार्थानां आनयनं ते दूरदेशात् कुर्वन्ति स्म ।



हडप्पायाः जनाः ताम्रस्य आनयनं सम्भवतः वर्तमान-राजस्थानतः कुर्वन्ति स्म । पश्चिमैशियादेशात् ओमानतः अपि ताम्रस्य आनयनं क्रियते स्म । कांस्यस्य निर्माणार्थं ताम्रे मिश्रयितुं टिन इति धातोः आनयनम् आधुनिक-ईरानतः अफगानिस्तानतः च क्रियते स्म । सुवर्णस्य आनयनम् आधुनिककर्णाटकात् बहुमूल्यपाषाणस्य च आनयनं गुर्जरात् ईरानतः अफगानिस्तानतः च क्रियते स्म ।

वस्तूनि एकस्मात् स्थानात् अपरं स्थानं प्रति कथं नीयन्ते स्म ?

एतानि चित्राणि पश्यन्तु । कञ्चित् क्रीडनकम् अस्ति अपि च अपरा काचित् मुद्रा ।

किं भवन्तः वक्तुं शक्नुवन्ति यत् हडप्पायाः जनाः यातायाताय केषां साधनानां प्रयोगं कुर्वन्ति स्म ?

किं गताध्यायेषु चक्रयुक्तवाहनानां विषये भवद्भ्यः सूचनाः प्रदत्ताः सन्ति ?

बालानां क्रीडनकं हलम् । अद्य हलचालकाः अधिकतराः कृषकाः पुरुषाः भवन्ति । अस्माभिः न ज्ञातं यत् किं हडप्पायाम् अपि एषा एव प्रथा आसीत् ।

नगरीयाणां कृते भोजनम्

जनाः नगराणि अतिरिच्य ग्रामेषु अपि निवसन्ति स्म । ते अन्नानि उत्पादयन्ति स्म अपि च पशून् पालयन्ति स्म । कृषकाः पशुचारकाः एव नगरेषु जीवमानानां शासकानां लेखकानां शिल्पकाराणां च कृते भोज्यपदार्थान् यच्छन्ति स्म । पादपानाम् अवशेषेभ्यः ज्ञायते यत् हडप्पायाः जनाः गोधूम-यव-द्विदल-हरेणु-ब्रीहि-तिल-सर्षपादीनाम् उत्पादनं कुर्वन्ति स्म ।

भूमेः कर्षणार्थं हलस्य प्रयोगः किञ्चित् नूतनम् आसीत् । हडप्पाकालीनाः हलाः तु अवशिष्टाः न सन्ति यतो हि प्रायः काष्ठमयाः भवन्ति स्म परन्तु हलाकारकाणि क्रीडनकानि लब्धानि सन्ति । क्षेत्रेऽस्मिन् वर्षाः न्यूनाः भवन्ति अतः सेचनाय जनैः केचन उपायाः कृताः स्युः । सम्भवतः जलस्य सञ्चयः क्रियते स्म अपि च आवश्यकतायां सत्यां ततः सस्यानां सेचनं क्रियते स्म ।

हडप्पायाः जनाः गो-महिषी-अजावीनां च पालनं कुर्वन्ति स्म । ग्रामाणां समीपे तडागाः चारणस्थानानि च भवन्ति स्म । परन्तु शुष्कमासेषु पशूनां समूहाः भोजनस्य अन्वेषणे दूरदेशं प्रति नीयन्ते स्म । ते बदरीसदृशानि फलानि एकत्रीकुर्वन्ति स्म मत्स्यग्रहणं कुर्वन्ति स्म अपि च हरिणसदृशानां पशूनाम् आखेटं कुर्वन्ति स्म ।

गुजरे हडप्पाकालीनस्य नगरस्य सूक्ष्मनिरीक्षणम्

कच्छक्षेत्रे खदिरबेतस्य तटे धौलावीरानामकं नगरम् आसीत् । तत्र स्वच्छं जलं लभ्यते स्म अपि च भूमिः उर्वरा आसीत् । यत्र हडप्पासंस्कृतेः नगरद्वयं द्वयोः भागयोः विभक्तम् आसीत् तत्र च धौलावीरानगरं त्रिषु भागेषु विभाजितम् आसीत् । एतस्य प्रत्येकं भागं परितः पाषाणमयी उन्नतभित्तिः निर्मिता आसीत् । एतस्य अन्तः प्रवेष्टुं च बृहन्ति द्वाराणि आसन् । एतस्मिन् नगरे कश्चित् अनाच्छादितक्षेत्रम् अपि आसीत् यत्र सार्वजनिककार्यक्रमाः आयोज्यन्ते स्म । अत्र प्राप्तेषु केषुचित् अवशेषेषु हडप्पालिपेः दीर्घाक्षराणि पाषाणेषु विलिखितानि आसन् । एते अभिलेखाः प्रायः काष्ठालङ्कृताः आसन् । अयं कश्चित् विचित्रः अभिलेखः अस्ति यतो हि सामान्यतया हडप्पायाः लेखाः मुद्रासदृशेषु लघुवस्तुषु प्राप्यन्ते ।

लोथलस्य पोतस्थानकम् । अयं गरीयान् तडागः लोथलस्य पोतस्थानकं स्यात्, यत्र समुद्रमार्गीयाः नावः तिष्ठन्ति स्म । सम्भवतः अत्र सामग्रीणाम् अवरोहणम् आरोहणं क्रियते स्म ।

गुर्जरस्य खम्भातस्य आखाते प्राप्यमाणा साबरमत्याः कस्याश्चित् उपनद्याः तटे स्थितं लोथलनगरम् एतादृशे स्थाने स्थितम् आसीत्, यत्र बहुमूल्य-पाषाण-सदृशासंशोधित-पदार्थः सरलतया लभ्यते स्म । एतत् पाषाण-शङ्ख-धातुभिः निर्मितवस्तूनां किञ्चित् महत्त्वपूर्णं केन्द्रम् आसीत् । एतस्मिन् नगरे कश्चित् सञ्चयगृहम् अपि आसीत् । एतस्मात् सञ्चयगृहात् अनेकाः मुद्राः मुद्राङ्कनम् अथवा मुद्राचिह्नानि (क्लिन्नमृत्तिकायां नोदनात् जातचिह्नानि) लब्धानि सन्ति ।

मुद्रा(मुहर)अपि च मुद्राङ्कनं अथवा मुहरबन्दी
मुद्राणां प्रयोगः सामग्र्या पूरितानि तानि पुटकानि अथवा तान् स्यूतान् च चिह्नीकर्तुं क्रियते स्म यानि एकस्मात् स्थानात् पृथक्स्थानं प्रति प्रेष्यन्ते स्म । स्यूतानां पिधानस्य पश्चात् मुखेषु क्लिन्नमृत्तिकां लेपयित्वा तेषु मुद्रांकनं क्रियते स्म । मुद्रायाः अङ्कनम् एव मुहरबन्दी इति उच्यते ।
यदि एतत् अङ्कनं त्रुटितं न भवति स्म तर्हि ततः अनुमीयते स्म यत् वस्तु यथावत् अस्ति वस्तुना सह न कापि कुचेष्टा जाता ।
अद्य अपि मुद्रायाः प्रयोगः भवति । अन्वेषयन्तु यत् मुद्राणां प्रयोगः किमर्थं भवति स्म ।

अत्र किञ्चन भवनं प्राप्तम् अस्ति, यत्र सम्भवतः मनके इति निर्माणस्य कार्यं भवति स्म । पाषाणस्य खण्डाः, अर्धसाधितानि मनके इति, मनके इति निर्माणस्य उपकरणानि निर्मितानि मनके इति च अत्र अलभ्यन्त ।

सभ्यतायाः समाप्तेः रहस्यम्

प्रायः ३९००वर्षेभ्यः पूर्वं कश्चित् महत्परिवर्तनं दृष्टिगोचरं भवति । सहसा जनाः एतानि नगराणि अत्यजन् । लेखन-मुद्रा-भारमापकानां च प्रयोगः व्यवहारपथात् अपगतः । दूरदेशात् असंशोधितसामग्र्याः आनयनं न्यूनम् अभवत् । मोहनजोदडो राजमार्गेषु अवकरचयाः जाताः । जलनिकासप्रणाली नष्टा जाता, राजमार्गेषु एव पर्णकुटीरसदृशानि गृहाणि निर्मातुं जनाः आरभन्त ।
एतत् सर्वं कस्मात् कारणात् अभवत् ? न किञ्चित् ज्ञायते । केषाञ्चित् विदुषां मान्यता अस्ति यत् नद्यः शुष्काः जाताः आसन् । अपरेषां कथनम् अस्ति यत् वनानां नाशः जातः आसीत् । एतस्य कारणम् इदं भवितुं शक्नोति यत् इष्टिकानां दार्ढ्यार्थं ईन्धनस्य आवश्यकता भवति । एतत् अतिरिच्य पशूनां व्यापकसङ्ख्यायां समूहाः घासक्षेत्रेषु चरन्ति स्म ततः घासक्षेत्राणि समाप्तानि जातानि स्युः । केषुचित् क्षेत्रेषु जलप्लावनं जातम् । परन्तु एतैः कारणैः इदं स्पष्टं न जातं यत् सर्वेषां नगराणाम् अन्तः समाप्तिः वा कथं जाता । यतो हि जलौघस्य शुष्क-नदीनां च प्रभावः केषुचित् एव क्षेत्रेषु जातः स्यात् ।

इत्थम् अनुभूयते यत् शासकानां नियन्त्रणं समाप्तं जातम् । यत्किमपि जातं स्यात् परिवर्तनस्य प्रभावः स्पष्टतया दृश्यते । आधुनिकपाकिस्तानस्य सिन्ध-पञ्चनदयोः निवासाः (वस्तियां) भूमिसात् जाताः आसन् । बहवः जनाः पूर्वदक्षिण-क्षेत्रेषु नूतनेषु निवासेषु लघुनिवासेषु च गत्वा अवसन् ।

एतस्याः घटनायाः प्रायः १४०० वर्षाणां पश्चात् नूतननगराणां विकासः अभवत् । एतेषां विषये भवन्तः षष्ठाध्याये नवमाध्याये च पठिष्यन्ति ।

अन्यत्र

स्वमानचित्रे मिस्रम् अन्वेषयन्तु । नीलनद्याः पार्श्वस्थानि क्षेत्राणि परित्यज्य मिश्रस्य अधिकांशभागः मरुस्थलीयः अस्ति ।

प्रायः ५०००वर्षेभ्यः पूर्वं मिश्रस्य शासकाः सुवर्ण-रजत-हस्तिदन्त-काष्ठ-हीरक-रत्नानि च आनेतुं स्वसेनाः सुदूरदेशान् प्रति प्रेषिता आसीत् । ते दीर्घाणि स्मारकाणि निर्मापितवन्तः यानि पिरामिड इति नाम्ना ज्ञायन्ते ।

नृपेषु मृतेषु सत्सु तेषां शवाः एतेषु पिरामिड इत्येतेषु भूमिसात् कृत्वा सुरक्षिताः स्थाप्यन्ते स्म । एतेषां शवानां कृते ममी इति शब्दस्य प्रयोगः भवति स्म । तैः शवैः सार्धं इतोऽपि अन्यानि वस्तूनि भूमिसात् क्रियन्ते स्म । एतेषु खाद्यान्न-पेय-वस्त्राभूषण-पात्र-वाद्ययन्त्र-शस्त्र-पशवः सम्मिलिताः सन्ति । यदा कदा शवेन सह तेषां सेवकाः सेविकाः च अपि भूमिसात् क्रियन्ते स्म । विश्वस्य इतिहासे शवानां भूमिसात्करणस्य परम्परां पश्यन् मिश्रे सर्वाधिकानि धनानि सम्पत्तयः च व्ययीक्रियन्ते स्म ।

किं भवन्तः अनुभवन्ति यत् मृत्योः पश्चात् एतेषां नृपाणां कृते एतेषां वस्तूनाम् आवश्यकता जाता स्यात्?

कल्पयन्तु

भवन्तः स्वमातृ-पितृभ्यां सह ४००० वर्षेभ्यः पूर्वं लोथलतः मोहनजोदडो इत्यस्य यात्रां कुर्वन्ति । भवन्तः ज्ञापयन्तु यत् भवन्तः कथं यात्रां करिष्यन्ति, भवतां मातापितरौ यात्रायाः कृते आत्मभिः सह किं किं नेष्यन्ति ? अपि च मोहनजोदडो इत्यत्र भवन्तः किं द्रक्ष्यन्ति ?

उपयोगि-शब्दाः
नगरम्
नगरदुर्गः
शासकः
लिपिकः
मुद्रा (मुहर)
शिल्पकारः
धातुः
विशेषज्ञः
असाधितसामग्री (कच्चा माल)
हलम्
सेचनम्

आगच्छन्तु स्मरणं कुर्मः



1. पुरातत्त्वविदः कथं ज्ञातवन्तः यत् हडप्पासंस्कृतेः काले वस्त्रस्य उपयोगः भवति स्म ?
2. निम्नलिखितस्य सुमेलनं कुर्वन्तु-

ताम्रम्	गुर्जरः
सुवर्णम्	अफगानिस्तानम्
टिनधातुः	राजस्थानम्
बहुमूल्यपाषाणः	कर्नाटकः

3. हडप्पायाः जनानां कृते धातु-लेखन-चक्र-हलानि च किमर्थं महत्त्वपूर्णानि आसन् ?

आगच्छन्तु चर्चयामः

4. अस्मिन् अध्याये पक्वमृत्तिकया (टेरा-कोटा) निर्मितानां सर्वेषां क्रीडनकानां सूचीं कुर्वन्तु। एतेषु कानि क्रीडनकानि बालकेभ्यः आधिक्येन रुचितानि स्युः ?
5. हडप्पायाः जनानां भोजनसामग्र्याः सूचीं कुर्वन्तु। वर्तमानकाले एतासु भवन्तः किं किं खादन्ति ? चिह्नीकृत्य ज्ञापयन्तु।
6. हडप्पायाः कृषकाणां पशुपालकानां च जीवनं किं तेभ्यः कृषकेभ्यः भिन्नम् आसीत्, येषां विषये भवन्तः गताध्यायेषु पठितवन्तः सन्ति ? स्वकीये उत्तरे एतस्य कारणं ज्ञापयन्तु।

काश्चन महत्त्वपूर्णतिथयः

- मेहरगढे कार्पासस्य कृषिः(प्रायः ७००० वर्षेभ्यः प्राक्)
- नगराणाम् आरम्भः (प्रायः ७००वर्षेभ्यः पूर्वम्)
- हडप्पायाः नगराणाम् अन्तस्य अर्थात् समाप्तेः प्रारम्भः (प्रायः ३९०० वर्षेभ्यः प्राक्)
- अन्येषां नगराणां विकासः (प्रायः २५०० वर्षेभ्यः प्राक्)

आगच्छन्तु कृत्वा पश्यामः

7. स्वस्य नगरस्य अथवा ग्रामस्य त्रयाणां महत्त्वपूर्णभवनानां विवरणं यच्छन्तु। किं तानि निवासस्य महत्त्वपूर्णेषु क्षेत्रेषु निर्मितानि आसन् । एतेषां भवनानाम् उपयोगः किमर्थं क्रियते ?
8. भवतां क्षेत्रे किं कश्चित् पुरातनं भवनम् अस्ति ? इदं जानन्तु यत् तत् कियत् पुरातनम् अस्ति अपि च एतस्य संरक्षणं कः करोति ?

इति चतुर्थाध्यायः

अध्यायः 5

पुस्तकानि प्रेतभूमयः च अस्मान् किं बोधयन्ति

पुस्तकालये मेरी



घण्टानाद-समनन्तरम् एव शिक्षकः छात्रान् आत्मना सह आगन्तुम् अवदत् । अद्य ते प्रथमवारं पुस्तकालयं गच्छन्तः आसन् । मेरी अपश्यत् यत् पुस्तकालयः तस्याः कक्षायाः अपेक्षया बहुविशालः आसीत् अपि च तत्र अनेकाः पुस्तकैः पूरिताः कपाटिकाः आसन् । तत्र कोणे एका कपाटिका आसीत् या स्थूलपुस्तकैः पूरिता आसीत् । कस्याश्चित् कपाटिकायाः उद्घाटनस्य प्रयासं कुर्वतीं मेरीं दृष्ट्वा अध्यापकः ताम् अवदत् "तस्यां कपाटिकायां विभिन्नधर्मसम्बद्धानि अनेकानि पुस्तकानि सन्ति । किं भवती जानाति यत् अस्माकं पार्श्वे वेदानाम् अपि कश्चित् सङ्ग्रहः अस्ति ?"

मेरी चिन्तयितुम् आरभत । "वेदः इति किम् ?" अधुना जानीमः ।

संसारस्य प्राचीनतमेषु ग्रन्थेषु कश्चित् एकः

प्रायः भवती वेदानां विषये श्रुतवती स्यात् । चत्वारः वेदाः सन्ति – ऋग्वेदः सामवेदः यजुर्वेदः अथर्ववेदश्च । प्राचीनतमः वेदः ऋग्वेदः अस्ति, यस्य रचना प्रायः ३५००वर्षेभ्यः प्राक् अभूत् । ऋग्वेदे सहस्राधिकाः प्रार्थनाः सन्ति याः सूक्तयः इति कथ्यन्ते, सूक्तस्य अभिप्रायः अस्ति समीचीनप्रकारेण उक्तम् इति । एतानि सूक्तानि विभिन्नदेवीनां देवतानां च स्तुतिरूपेण रचितानि सन्ति । एतेषु देवतात्रयं बहुमहत्त्वपूर्णम् अस्ति - अग्निः इन्द्रः सोमः च । अग्निः वह्नेः देवता, इन्द्रः युद्धस्य देवता अपि च सोमः कश्चित् पादपविशेषः अस्ति येन किञ्चित् विशिष्टपेयं निर्मीयते स्म ।

वैदिकप्रार्थनानां रचनां ऋषयः कृतवन्तः आसन् । आचार्याः एताः प्रार्थनाः अक्षर-शब्द-वाक्येषु च विभज्य सस्वरपाठद्वारा कण्ठस्थं कारयन्ति स्म । अधिकांशसूक्तानां रचयितारः शिक्षार्थिपुरुषाः शिक्षकपुरुषाः च आसन् । काषाञ्चित् प्रार्थनानां रचनां महिलाः अपि कृतवत्यः आसन् । ऋग्वेदस्य भाषा प्राक्-संस्कृतं अथवा वैदिकसंस्कृतम् इति उच्यते । भवती विद्यालये यत् संस्कृतं पठति तस्य अपेक्षया इदं किञ्चित् भिन्नम् अस्ति ।

संस्कृतम् अन्यभाषाः च

संस्कृतभाषा भारोपीय-भाषा-परिवारस्य भागभूता अस्ति । भारतस्य अनेकाः भाषाः असमिया-गुजराती-हिन्दी-काश्मीरी-सिन्धी-भाषाः एशियाई-भाषाः यथा फारसी यूरोपस्य च बहव्यः भाषाः यथा आङ्ग्ल–फ्रांसीसी-जर्मन-यूनानी-इतालवी-स्पैनिशादयः भाषाः अनेन परिवारेण एव सम्बद्धाः सन्ति । ताः एकभाषापरिवारः एतस्मात् कारणात् उच्यन्ते यतोहि आरम्भे तासु अनेके शब्दाः सदृशाः आसन् । उदाहरणार्थं मातृ" इति संस्कृतशब्दः माँ इति हिन्द्याम् अपि च मदर इति आङ्ग्लभाषायाम् उच्यते एतान् शब्दान् पश्यन्तु ।

किं भवती एतासु भाषासु परस्परं काञ्चित् समानतां पश्यति ?

उपमहाद्वीपे अन्यभाषापरिवाराणाम् अपि भाषाः भाष्यन्ते । उदाहरणार्थं पूर्वोत्तरप्रदेशेषु तिब्बत-बर्मापरिवारयोः भाषाः भाष्यन्ते । तमिल-तेलगु-कन्नड-मलयालमभाषाः द्रविड-भाषापरिवारस्य भाषाः सन्ति । यद्यपि झारखण्डमध्यभारतयोः अनेकेषु भागेषु भाष्यमाणाः भाषाः आस्ट्रो-एशियाटिक-परिवार-सम्बद्धाः सन्ति ।

तासां भाषाणां सूचीं निर्मातु यासां विषये भवती श्रुतवती अस्ति । तासां भाषापरिवारान् परिचेतुं प्रयासं करोतु ।

वयं यानि पुस्तकानि पठामः तानि लिखितानि उट्टङ्कितानि च सन्ति । ऋग्वेदस्य उच्चारणं क्रियते स्म अपि च श्रवणं क्रियते स्म, न तु पठ्यते स्म । रचनायाः बहूनां शताब्दीनां पश्चात् प्रथमवारम् एतस्य लेखनं कृतम् । एतस्य मुद्रणस्य कार्यं प्रायः प्रायः द्विशतवर्षेभ्यः पूर्वम् अभवत् ।

इतिहासकाराः ऋग्वेदस्य अध्ययनं कथं कुर्वन्ति ?

इतिहासकाराः पुरात्तत्वविदाम् इव अतीतस्य विषये सूचनाः एकत्रीकुर्वन्ति । परन्तु भौतिकावशेषान् अतिरिच्य ते लिखितस्रोतसाम् अपि उपयोगं कुर्वन्ति । आगच्छन्तु पश्यामः यत् ते ऋग्वेदस्य अध्ययनं कथं कुर्वन्ति ।

ऋग्वेदस्य कानिचन सूक्तानि वार्त्तालापस्य रूपेण सन्ति । विश्वामित्रर्षेः देवी-स्वरूपयोःपूजित-नद्योः(विपाशा-शतद्रोः)मध्ये कश्चित् संवादः एतादृशस्य एव सूक्तस्य अंशः अस्ति ।

एतयोः द्वयोः नद्योः अन्वेषणं प्रथमे मानचित्रे (पृष्ठम्-२)करोतु अपि च पुनः पठतु ।

ऋग्वेदस्य पाण्डुलिपेः किञ्चन पृष्ठम् । भूर्जवृक्षस्य त्वचि लिखितः इयं पाण्डुलिपिः काश्मीरेषु प्राप्ता आसीत् । प्रायः १५० वर्षेभ्यः पूर्वं ऋग्वेदस्य मुद्रणार्थम् एतस्य प्रयोगः कृतः आसीत् । एतं पाण्डुलिपिं दृष्ट्वा एव ऋग्वेदस्य आङ्ग्लानुवादः जातः आसीत् । अयं पाण्डुलिपिः पुणे-महाराष्ट्रस्य कस्मिंश्चित् पुस्तकालये सुरक्षिता अस्ति ।



विश्वामित्रः नद्यौ च

विश्वामित्रः- हे नद्यौ ! द्युतिमत्योः गावोः इव वत्सान् स्निह्यन्त्यौ अपि च जवयुक्ताश्वयोः गतिः इव पर्वतेभ्यः नीचैः अवतरताम् । इन्द्रेण प्रदत्तशक्त्या स्फूर्तिमत्यौ भवत्यौ रथानां गत्या इव सागरं प्रति वहन्त्यौ स्तः । जलेन परिप्लुते भवत्यौ परस्परं मेलितुम् इच्छतः ।

नद्यः – जलेन परिपूर्णाः वयं देवनिर्मितमार्गेण चलामः । एकदा निर्गते सति अस्मान् कोऽपि न रोद्धुं शक्नोति । ऋषे ! किमर्थं भवान् आवां प्रार्थयति ?

विश्वामित्रः- भगिन्यौ ! गायकस्य मम प्रार्थनां श्रृणुताम् । अहं रथैः वाहनसहितः सुदूरात् आगतवान् अस्मि । कृपां कृत्वा स्वजलानि अस्माकं रथेभ्यः अक्षेभ्यः च उपरि न उत्थापयन्तु यतः वयं सरलतया तस्मिन् पारं गन्तुं पारयेम ।

नद्यः- वयं भवतां प्रार्थनाः श्रोष्यामः यतः भवन्तः सर्वे सुरक्षिताः सन्तः तस्मिन् तटे गन्तुं शक्नुयुः ।

इतिहासकाराः ज्ञापयन्ति यत् इयं प्रार्थना तस्मिन् क्षेत्रे रचिता स्यात् यस्मिन् क्षेत्रे एते नद्यौ प्रवहतः । ते इदम् अपि बोधयन्ति यत् यस्मिन् समाजे ऋषयः निवसन्ति स्म तत्र अश्वानां गवां च कृते बहु महत्त्वं दीयते स्म । अतः नदीनां सादृश्यं अश्वगोभिः सह दर्शिता अस्ति ।

किं भवती अनुभवति यत् रथाः अपि महत्त्वपूर्णाः आसन् ? उत्तरप्राप्तये कारणं वदन्तु । प्रार्थनायाः पङ्क्तीः पुनः पठित्वा बोधयन्तु यत् तासु परिवहणस्य कृते केषां केषां साधनानाम् उल्लेखः अस्ति ।

ऋग्वेदस्य प्रार्थनासु अन्यापरनदीनां विशेषतया सरस्वती-सिन्ध्वोः तयोः च सहायकनदीनाम् अपि वर्णनम् अस्ति । गङ्गा-यमुनयोः उल्लेखः केवलम् एकस्मिन् स्थले कृतः अस्ति ।

प्रथमं मानचित्रं पश्यन्तु अपि च एतादृशीनां पञ्चनदीनां सूचीं कुर्वन्तु यासां नामानि ऋग्वेदे न सन्ति ।

पशवः अश्वाः रथाः च

ऋग्वेदे पशूनां बालानाम् (विशेषतया पुत्राणाम्) अश्वानां च प्राप्तये अनेकाः प्रार्थनाः सन्ति । अश्वाः युद्धे रथान् कर्षणस्य कार्ये आनीयन्ते स्म । एतेषु युद्धेषु पशवः विजित्य आनीयन्ते स्म । युद्धानि कदाचित् भूमेः उपरि आधिपत्यस्थापनाय अपि क्रियन्ते स्म अपि च सुगोचारणानि भवेयुः अथवा यत्र यवसदृशानि शीघ्रं पक्त्वा जायमानानि सस्यानि उत्पादयितुं शक्नुयुः । कानिचन युद्धानि जलस्य स्रोतनिमित्तानि अपि च जनान् कारागारे निग्रहीतुम् अपि क्रियन्ते स्म ।

युद्धेषु जितधनस्य कश्चन भागः सेनानायकाः स्वस्य समीपे स्थापयन्ति स्म अपि च कश्चित् भागः पुरोहिताय दीयते स्म । अवशिष्टं धनं सामान्यजनेषु वण्ट्यते स्म । किञ्चित् धनं यष्टुं प्रयुज्यते स्म । यज्ञस्य अग्नौ आहुतयः दीयन्ते स्म । एताः आहुतयः देवानां देवीनां च कृते दीयन्ते स्म । घृतस्य अन्नस्य कदाचित् च पशूनाम् अपि आहूतयः दीयन्ते स्म।

अधिकांशपुरुषाः एतेषु युद्धेषु भागं गृह्णन्ति स्म । काचित् स्थायिनी सेना न भवति स्म परन्तु जनाः सभासु परस्परं मिलन्ति स्म अपि च युद्धस्य शान्तेः च विषये परामर्शं यच्छन्ति स्म । तत्र एतादृशाः जनाः स्वसेनानायकान् चिन्वन्ति स्म ये परमयोद्धारः वीराः च भवेयुः ।

जनानां विशेषतानां अभिधायकाः शब्दाः

जनानां वर्गीकरणं कार्य-भाषा-परिवार-समुदाय-निवासस्थान-सांस्कृतिक-परम्पराणां च आधारेण क्रियते स्म। ऋग्वेदे जनानां विशेषता-प्रतिपादकान् केचन शब्दान् पश्यतु।

एतादृशौ द्वौ समूहौ स्तः ययोः वर्गीकरणं कार्यस्य आधारेण कृतम् अस्ति पुरोहिताः ये कदाचित् ब्राह्मणाः अपि उच्यन्ते स्म विभिन्न-यज्ञानुष्ठानानि कुर्वन्ति स्म। अपरे जनाः आसन्- राजानः।

एते राजानः तादृशाः न आसन् येषां विषये भवती पश्चात् पठिष्यति। एते न तु विशालराजधानीषु अथवा प्रासादेषु निवसन्ति स्म न एतेषां समीपे सेनाः आसन् न तु एते राजस्वं स्वीकुर्वन्ति स्म। प्रायः राज्ञः मृत्योः पश्चात् तस्य पुत्रः स्वयमेव शासकः न भवति स्म।

गतानुभागं एकदा पुनः पठतु अपि च एतत् अवगमनस्य प्रयासं करोतु यत् राजानः किं कुर्वन्ति स्म।

जनतायाः सम्पूर्णस्य समुदायस्य च कृते द्वयोः शब्दयोः प्रयोगः भवति स्म। एकः शब्दः आसीत् जनः इति यस्य प्रयोगः हिन्दीभाषायाम् अन्यभाषायां च अद्य अपि भवति। अपरः आसीत् विश् इति यतः वैश्यः इति शब्दस्य उत्पत्तिः जाता अस्ति। एतस्मिन् विषये भवती विस्तरेण षष्ठाध्याये पठिष्यति।

ऋग्वेदे विश्, जन इति शब्दयोः च नामानि लभ्यन्ते। अतः वयं तत्र पुरू-जन इति अथवा विश् इति, भरत-जन इति अथवा विश्,यदु-जन इति अथवा विश्सदृशानाम् अनेकेषां नाम्नाम् उल्लेखं प्राप्नुमः।

किं भवत्यै एतेषु नामसु किञ्चन नाम परिचितम् इव प्रतिभाति ?

यैः जनैः एताः प्रार्थनाः रचिताः ते कदाचित् आत्मनः कृते आर्यः इति शब्दस्य व्यवहारं कुर्वन्ति स्म तथा च स्वविरोधिभ्यः दासः अथवा दस्युः इति शब्दस्य प्रयोगं कुर्वन्ति स्म। दस्यवः ते जनाः आसन् ये न यजन्ते स्म अपि च प्रायः अन्यासां भाषाणां प्रयोगं कुर्वन्ति स्म। अनन्तरकाले दास इति शब्दस्य अर्थः गुलाम इति अभवत् स्त्रीलिङ्गे दासी च इति अभवत्। दासाः दास्यः च इति ते स्त्रीपुरुषाः भवन्ति स्म ये युद्धेषु निगृह्यन्ते स्म निगठ्यन्ते वा स्म। ते तस्य स्वामिनः सम्पत्तिरूपाः इति मन्यन्ते स्म। तैः च तत् सर्वं कार्यं करणीयं भवति स्म यत् यत् स्वामी इच्छति स्म।

यस्मिन् काले उपमहाद्वीपस्य उत्तरपश्चिमयोः भागयोः ऋग्वेदस्य रचना जायते स्म तस्मिन् एव समये अन्येषु स्थानेषु कश्चित् भिन्नप्रकारकः विकासः जायते स्म। पश्यतु, तत्र किं भवति स्म।

मौनप्रहरी – महापाषाणानां कथा

अग्रिमपृष्ठस्य चित्राणि पश्यतु।

एते शिलाखण्डाः महापाषाण-नाम्नः अवगम्यन्ते । एते पाषाणाः शवस्य भूमिसात्काले तस्मिन् स्थाने जनैः महत्या सुव्यवस्थया संश्लिष्यन्ते स्म । महापाषाण-शवस्थाननिर्माणस्य प्रथा प्रायः ३०००वर्षेभ्यः पूर्वम् आरब्धा । इयं प्रथा दक्कन-दक्षिण-भारतोत्तरपूर्वभारतेषु काश्मीरेषु च प्रचलिता आसीत्।

कानिचन महत्त्वपूर्णानि महापाषाण-पुरास्थलानि द्वितीये मानचित्रे दर्शितानि सन्ति । केचन महापाषाणाः भूमेः उपरि एव दृष्टाः भवन्ति । केचन महापाषाणाः भूमेः अन्तः अपि भवन्ति।

बहुधा पुरातत्त्वविदः गोलाकारान् पाषाणान् प्राप्नुवन्ति । कदाचित् एकाकी स्थिरः पाषाणः लभ्यते । एतानि एव एकमात्रं प्रमाणानि सन्ति यानि भूमिम् अधः शवस्थानानि दर्शयन्ति।

महापाषाणानां निर्माणाय जनैः अनेकप्रकारकाणि कार्याणि करणीयानि भवन्ति स्म । अस्माभिः येषां कार्याणां सूची रचिता अस्ति तानि क्रमबद्धानि करोतु । गर्तखननम्, ऊढ्वा शिलाखण्डानां आनयनम्, महापाषाणानां विलेखनं अपि च मृतानां भूमिसात्करणम्।

उपरि-एतादृशस्य महापाषाणस्य कृते ताबूत-शवाधानं (सिस्ट) इति उच्यते। अत्र दर्शिते शवाधाने कश्चित् पोर्ट-होल (महान् गर्तः छिद्रः वा) अस्ति यः प्रायः पाषाणनिर्मितप्रकोष्ठं गन्तुं मार्गः आसीत्।

एतेषु शवाधानेषु काश्चन समानताः सन्ति । सामान्यतः मृतकाः विशिष्टप्रकारस्य मृत्तिकायाः पात्रैः सह भूमौ स्थाप्यन्ते स्म ये कृष्ण-रक्त-मृत्तिकायाः पात्रैः ज्ञायन्ते स्म । एतेन सार्धम् एव तत्र लौहस्य शस्त्राणि अश्वस्य अस्थिपञ्जराः अपि च वस्तूनि पाषाणाः सुवर्णस्य च आभूषणानि अपि सन्ति।





किं हड़प्पायाः नगरेषु लौहस्य प्रयोगः भवति स्म ?

महापाषाणप्रेतभूमिभ्यः प्राप्तलौहस्य उपकरणानि

वामतः – अश्वस्य उपकरणानि

अधः वामतः – परशवः

अधः - काचित् असिः



जनानां सामाजिकासमानतानां विषये अवबोधनम्

पुरातत्त्वविदः इदं मन्यन्ते यत् अस्थिपञ्जरेण सह प्राप्यमानानि वस्तूनि अवशेषाः वा मृतस्य जनस्य एव स्युः । कदाचित् एकस्य शवस्थानस्य अपेक्षया अपरस्मिन् शवस्थाने अधिकानि वस्तूनि लभ्यन्ते । द्वितीये मानचित्रे ब्रह्मगिरिम् अन्विष्यन्तु । अत्र कस्यचित् जनस्य शवाधानस्थाने (कब्र) ३३सुवर्णमणिकाः अपि च शङ्खाः प्राप्ताः सन्ति । अपरेषाम् अस्थिपञ्जराणां पार्श्वे केवलं कानिचन मृत्पात्राणि एव प्राप्तानि सन्ति । इदं श्मशाने स्थापितजनानां सामाजिकस्थितौ भिन्नतां दर्शयति । केचन जनाः धनिकाः आसन् अपि च केचन जनाः निर्धनाः आसन् केचन जनाः नायकाः आसन् अपि च अन्ये अनुयायिनः आसन् ।

किं काश्चन शवशयनकिं काश्चन प्रेतभूमयः विशिष्टकुटुम्बानां कृते आसन् ?

क्वचित् क्वचित् महापाषाणेषु एकाधिकाः अस्थिपञ्जराः अलभ्यन्त । ते इदं दर्शयन्ति यत् प्रायः एकस्य एव परिवारस्य जनाः एकस्मिन् एव स्थाने पृथक्-पृथक्-काले श्मशाने स्थापिताः आसन् । अनन्तरकाले मृताः जनाः पोर्ट-होलस्य मार्गेण प्रेतस्थानेषु आनीय स्थाप्यन्ते स्म । एतादृशे स्थाने गोलाकार-संश्लिटपाषाणाः अथवा महाप्रस्तराः (चट्टान) चिह्नानां कार्याणि कुर्वन्ति स्म यत्र जनाः आवश्यकतानुसारं शवानां भूमौ स्थापनाय निखननाय वा पुनः आगन्तुं शक्नुवन्ति स्म ।

कस्यचित् इनामग्रामस्य विशिष्टजनस्य समाधिस्थलम्

द्वितीये मानचित्रे चतुर्दशे पृष्ठे च इनामग्रामम् अन्विष्यन्तु । इदं भीमायाः सहायकनद्याः घोडस्य तटे किञ्चित् स्थानम् अस्ति । यस्मिन् स्थाने ३६००तः २७०० वर्षेभ्यः पूर्वं जनाः निवसन्ति स्म । अत्र वयस्कजनाः प्रायः गर्ते

ऋजुतया शाययित्वा भूमौ स्थाप्यन्ते स्म । तेषां शिरांसि उत्तरदिशां प्रति भवन्ति स्म । बहुधा ते गृहस्य अन्तः एव भूमौ स्थाप्यन्ते स्म । एतादृशानि पात्राणि येषु प्रायः भोजनं जलं वा स्यात् भूमौ स्थापितस्य शवस्य समीपे स्थाप्यन्ते स्म ।

कश्चित् जनः पञ्चप्रकोष्ठात्मकस्य भवनस्य प्राङ्गणे चतुष्पादयुक्त-मृण्मयपेटिकायां भूमेः अधः स्थापितः आसीत् । ग्रामस्य मध्ये स्थितम् एतत् गृहं ग्रामस्य सर्वेषु गृहेषु दीर्घतमम् आसीत्। अस्मिन् गृहे कश्चित् अन्नभाण्डागारम् आसीत् । शवस्य पादौ आकुञ्चितौ आस्ताम् ।

किं भवती अनुभवति यत् अयं कस्यचित् नायकस्य शवः आसीत् ? स्वस्य उत्तरं सकारणं वदतु ।

अस्थिपञ्जराणाम् अध्ययनम् अस्मान् किं बोधयति

लघ्वाकारस्य आधारेण कस्यचित् शिशोः अस्थिपञ्जरं सरलतया परिचेतुं शक्नुमः । परन्तु कस्याश्चित् बालिकायाः कस्यचित् बालकस्य च अस्थिपञ्जरे कश्चन महान् भेदः न भवति ।

किं वयं ज्ञातुं शक्नुमः यत् अस्थिपञ्जरः कस्यचित् पुरुषस्य आसीत् अथवा कस्याश्चित् महिलायाः आसीत् ?

कदाचित् जनाः अस्थिपञ्जरेण सह प्राप्तवस्तूनाम् आधारेण ऊहां कुर्वन्ति । उदाहरणार्थं यदि अस्थिपञ्जरेण सह आभूषणानि लभ्यन्ते तर्हि बहुधा एवं मन्यते यत् अयम् अस्थिपञ्जरः कस्याश्चित् महिलायाः अस्ति । परन्तु एतादृशया ऊहया सह समस्याः अपि सन्ति । प्रायः पुरुषाः अपि आभूषणानि धरन्ति स्म ।

अस्थिपञ्जरस्य लिङ्गज्ञानाय कश्चित् सरलः उपायः अस्ति तस्य अस्थ्नां निरीक्षणम् । यतो हि महिलाः शिशून् सूयन्ते तस्मात् कारणात् तासां कटिप्रदेशः नितम्बः वा पुरुषाणाम् अपेक्षया गुरुतरः भवति ।

इदम् अवगमनम् अस्थिपञ्जराणाम् आधुनिकाध्ययने आधारितम् अस्ति ।

वर्तमान-कालात् प्रायः २०००वर्षेभ्यः पूर्वं चरकनामकः कश्चित् प्रसिद्धवैद्यः बभूव । सः चिकित्साशास्त्र-सम्बद्धं चरक-संहिता-नामकं पुस्तकं लिलेख । सः कथयति यत् मनुष्यस्य शरीरे ३६०अस्थीनि भवन्ति । एतानि आधुनिक-शरीर-रचना-विज्ञानेन परिगणितेभ्यः २०६ अस्थिभ्यः अधिकानि सन्ति । सम्भवतः चरकः स्वस्य गणनायां दन्त-अस्थिसन्धीः कार्टिलेजं च योजयित्वा इमां सङ्ख्यां बोधयामास ।

भवत्याः अनुसारं शरीरस्य विषये सः एतावतीं विस्तृतसूचनां कथम् एकत्रीकृतवान् स्यात् ?

इनामग्रामस्य जनानां व्यवसायाः

इनामग्रामे पुरातत्त्ववैज्ञानिकाः गोधूम-यव-तण्डुल-द्विदल-प्रियङ्गु-हरेणु-तिलानां च बीजानि प्राप्नुवन् । अनेकेषां पशूनां अस्थीनि अपि ते प्राप्तवन्तः सन्ति । अनेकेषु अस्थिषु कर्तन-चिह्नैः ऊह्यते यत् जनाः पशून् खादन्ति स्म । गो-वृषभ-महिषी-अजा-अवि-कुक्कुर-घोटक-गर्दभ-सूकर-हरिण-चित्रमृग-कृष्णमृग-खरहा-नकुल-चटका-मकर-कच्छप-कर्क-मत्स्यानां च अस्थीनि प्राप्तानि सन्ति । एतादृशानि साक्ष्याणि अलभ्यन्त यत् बदरी-जम्बु-खर्जूराः अपि च अनेकविधानि रसपूर्णफलानि अपि एकत्रीक्रियन्ते स्म ।

अस्य प्रमाणस्य आधारेण इनामग्रामस्य जनानां व्यवसायानां सूचीं निर्मातु ।

अन्यत्र

मानचित्रे चीनदेशं पश्यतु । प्रायः ३५०० वर्षेभ्यः पूर्वं वयं तत्रत्य-लेखनकलायाः प्राचीनतमानि उदाहरणानि प्राप्नुमः ।

एषः लेखः पशूनाम् अस्थिषु लिखितः आसीत् । एतानि अस्थीनि भविष्यवक्तृणि अस्थीनि उच्यन्ते स्म यतो हि इयं मान्यता आसीत् यत् एतानि भविष्यं ज्ञापयन्ति । राजानः लिपिकारैः एतेषु अस्थिषु प्रश्नान् लेखयन्ति स्म- किं ते युद्धानि जेष्यन्ति ? किं सस्यानि समीचीनानि भविष्यन्ति ? किं ते पुत्रवन्तः भविष्यन्ति ? पुनः तानि अस्थीनि अग्नौ निपात्यन्ते स्म यत्र औष्ण्यत्वात् तेषु विभेदनं भवति स्म दैवज्ञाः भेदान् ध्यानेन दृष्ट्वा भविष्यत्कथनस्य प्रयासं कुर्वन्ति स्म । यथा प्रायः भवत्याः अपि चिन्तनं स्यात् यत् ते भविष्यवक्तारः कदाचित् दोषान् अपि आचरन्ति स्म ।

एते राजानः नगरेषु प्रासादान् निर्माय निवसन्ति स्म । ते प्रकूतधनसम्पदः एकत्रीकृतवन्तः आसन् यत्र विशालानि कांस्यपात्राणि विलिख्य स्थापितानि आसन् । परन्तु ते लौहं प्रयोक्तुं न जानन्ति स्म ।

ऋग्वेदकालिक-राज्ञाम् एतेषां राज्ञां च मध्ये कञ्चित् पार्थक्यं ज्ञापयतु ।



उपयोगिशब्दाः
वेदः, प्रार्थना
भाषा
रथः, यज्ञः
राजा, दासः
महापाषाणः,
प्रेतभूमिः
अस्थिपञ्जरः,

कल्पनां करोतु

भवती ३०००वर्षेभ्यः पूर्वतने इनामग्रामे निवसति । गतनिशि नायकस्य मृत्युः अभवत् । अद्य भवत्याः मातापितरौ तं प्रेतभूमौ स्थापितुं सज्जां कुरुतः। इदं ज्ञापयन्ती सम्पूर्णस्य दृश्यस्य वर्णनं करोतु यत् अन्तिम-संस्काराय कीदृशं भोजनं सज्जीक्रियते । भवती किम् अनुभवति, भोजने किं दास्यते ?

आगच्छन्तु स्मरणं कुर्मः

१. निम्नलिखितानां सुमेलनं करोतु-

सूक्तम्	अलङ्कृतपाषाणाः
रथः	अनुष्ठानम्
यज्ञः	समीचीनतया उक्तम्
दासः	युद्धे प्रयुज्यते स्म
महापाषाणः	गुलाम पराधीनः इति

२. वाक्यानि पूरयतु

(क) _____ दासानां प्रयोगः क्रियते स्म।

(ख) _____ महापाषाणाः प्राप्यन्ते।

(ग) भूमौ गोलके संश्लेषितपाषाणाः अथवा महाप्रस्तराः _____कार्यं कुर्वन्ति स्म।

(घ) पोर्ट-होलस्य प्रयोगः _____ भवति स्म।

(ङ) इनामग्रामस्य जनाः _____खादन्ति स्म।

काश्चन महत्त्वपूर्णतिथयः

- वेदानां रचनायाः आरम्भः(प्रायः ३५००वर्षेभ्यः पूर्वम्)
- महापाषाणानां निर्माणस्य प्रारम्भः (प्रायः 3000 वर्षेभ्यः पूर्वम्)
- इनामग्रामे कृषकाणां निवासः (३६००तः २७००वर्षेभ्यः पूर्वम्)
- चरकः (प्रायः २०००वर्षेभ्यः पूर्वम्)

आगच्छतु चर्चां कुर्मः

३. अद्य वयं यानि पुस्तकानि पठामः तानि ऋग्वेदतः कथं भिन्नानि सन्ति ?

४. पुरातत्त्वविज्ञानिभिः प्रेतभूमौ स्थापितजनानां मध्ये सामाजिकस्य भेदस्य ज्ञानं कथं क्रियते ?

५. कस्यचित् राज्ञः जीवनं दासदास्योः जीवनात् कथं पृथक् आसीत् ?

आगच्छतु कृत्वा पश्यामः



६. जानातु यत् भवत्याः विद्यालयस्य पुस्तकालये धर्मस्य विषये पुस्तकानि सन्ति अथवा न सन्ति । तस्मात् सङ्ग्रहात् केषाञ्चित् पञ्च पुस्तकानां नामानि ज्ञापयतु।

७. काञ्चित् कवितां किञ्चित् गीतं वा लिखतु। भवती तां कवितां तत् गीतं च श्रुत्वा स्मृतवती आसीत् अथवा पठित्वा ?

८. ऋग्वेदे जनानां वर्गीकरणं तेषां कार्याणाम् भाषायाः च आधारेण क्रियते । अधोलिखित-तालिकायां भवती षड् परिचितजनानां नामानि पूरयतु । एतेषु तिस्रः महिलाः त्रयः पुरुषाः च भवेयुः । प्रत्येकं जनस्य व्यवसायं भाषां च लिखतु। किं भवती तस्मिन् विवरणे इतोऽपि कञ्चित् विषयं योक्तुम् इच्छति ?

नाम	कार्यम्	भाषा	अन्यः

इति पञ्चमोऽध्यायः

अध्यायः 6

राज्यं राजा कश्चित् प्राचीन-गणराज्यं च

निर्वाचनस्य दिनम्

यदा शंकरनः जागृतः तदा सः दृष्टवान् यत् तस्य मातामहीमातामहौ मतदानं कर्तुं गच्छतः स्म। वस्तुतः तौ निर्वाचनकेन्द्रे सर्वेभ्यः पूर्वं प्राप्तुम् इच्छतः स्म। शंकरनः जिज्ञासते स्म यत् वस्तुतः तौ तावन्तौ उत्साहितौ किमर्थम् आस्ताम्। तस्य मातामहः तं शीघ्रतया बोधनस्य प्रयासं कृतवान् अपि च उक्तवान् "अद्य वयं स्वशासकान् चेतुं गच्छामः"।

केचन जनाः शासकाः कथं जाताः ?

प्रायः पञ्चाशतः वर्षेभ्यः वयं स्वशासकानां निर्वाचनं मतदान-माध्यमेन कुर्वन्तः स्मः। परन्तु प्राचीनतमे काले जनाः शासकाः कथं जायन्ते स्म ? अस्माभिः पञ्चमाध्याये पठितम् अस्ति यत् केचन राजानः सम्भवतः जनैः चीयन्ते स्म। परन्तु प्रायः ३०००वर्षेभ्यः पूर्वं राजा भवितुम् एतस्यां प्रक्रियायां कानिचन परिवर्तनानि जातानि दृष्टानि वा। केचन जनाः महतः यज्ञान् आयोज्य नृपरूपेण प्रतिष्ठिताः अभवन्।

अश्वमेधयज्ञः कश्चित् एतादृशम् एव आयोजनम् आसीत्। एतस्मिन् कश्चित् घोटकः नृपस्य जनानां संरक्षणे स्वतन्त्रविचरणाय त्यज्यते स्म। यदि एतं घोटकं कश्चित् अपरः राजा अवरुणद्धि तर्हि तेन अश्वमेधकर्त्रा राज्ञा सह युद्धं करणीयं भवति स्म। यदि ते तथा न कुर्युः तर्हि तस्य अर्थः अस्ति यत् अश्वमेधकर्ता राजा अपरेषां नृपाणाम् अपेक्षया आधिक्येन शक्तिशाली अस्ति इति अवगम्यते स्म। तदनन्तरं ते राजानः यज्ञे आमन्त्र्यन्ते स्म। सः यज्ञः विशिष्टपुरोहितैः सम्पद्यते स्म। एतदर्थं ते उपहारैः सम्मानिताः क्रियन्ते स्म। अश्वमेधकर्ता राजा बहुशक्तिशाली इति मन्यते स्म। यज्ञे आमन्त्रिताः सर्वे राजानः तस्मै उपहाराणि आनयन्ति स्म।

एतेषु सर्वेषु आयोजनेषु नृपस्य मुख्यं स्थानं भवति स्म। सः राजसिंहासने अथवा व्याघ्रचर्ममये विशिष्टे आसने उपवेश्यते स्म। युद्धक्षेत्रे नृपस्य सारथी एव तस्य सहचरः भवति स्म। यज्ञस्य अवसरे सः नृपस्य विजयानां अन्यगुणानां च गानं करोति स्म। नृपस्य सुहृदः सम्बन्धिनः च विशेषतया तस्य महिषीभिः पुत्रैः अपि कानिचन लघ्वनुष्ठानानि करणीयानि भवन्ति स्म। अन्येषां आमन्त्रितराज्ञां कार्यं केवलम् उपविश्य यज्ञप्रक्रियादर्शनम् आसीत्। राजानम् उपरि पुरोहितः पवित्रजलस्य सेचनेन सह एव अन्यानि अनुष्ठानि करोति स्म। विश् अथवा वैश्यसदृशाः सामान्यजनाः उपहाराणि

आनयन्ति स्म । यान् पुरोहिताः शूद्रान् इति मन्यन्ते स्म ते अनेकेषु अनुष्ठानेषु न आहूयन्ते स्म अथवा न सम्मेल्यन्ते स्म ।

एतस्मिन् यज्ञे सम्मिलितानां काञ्चित् सूचीं निर्मातु । व्यवसायस्य आधारेण तत्र के के वर्गाः सम्मिलिताः आसन् ?

वर्णः

तस्मिन् काले उत्तरभारते विशेषतया गङ्गायुमनाक्षेत्रे अनेके ग्रन्थाः रचिताः । एतेषां रचना ऋग्वेदस्य पश्चात् जाता तस्मात् कारणात् एते उत्तर-वैदिक-ग्रन्थाः उच्यन्ते । एतेषाम् अन्तर्गतं सामवेदः यजुर्वेदः अथर्ववेदः अन्ये ग्रन्थाः च सम्मिलिताः सन्ति । पुरोहितैः रचितेषु एतेषु ग्रन्थेषु विभिन्नप्रकारकाणाम् अनुष्ठानानां तेषां सम्पादनस्य च विधयः बोधिताः सन्ति । एतेषु सामाजिकनियमानां विषये अपि वर्णितम् अस्ति ।

तस्मिन् समये समाजे अनेके समूहाः आसन् येषु पुरोहित-योद्धृ-कृषक-पशुपालक-व्यापारि-शिल्पकार-श्रमिकाः मत्स्यग्राहिणः वन्यजनाः च सम्मिलिताः आसन् । यत्र केचन पुरोहिताः योद्धारः च वैभवशालिनः आसन् तत्र एव केचन कृषकाः व्यपारिणः च अपि धनवन्तः आसन् । अपरस्मिन् पक्षे पशुपालक-शिल्पकार-श्रमिक-मत्स्यग्राहि-आखेटकाः भोजनसङ्ग्राहकाः च निर्धनाः आसन् ।

पुरोहिताः जनान् चर्तुषु भागेषु विभक्तवन्तः ये वर्णाः इति उच्यन्ते । तेषाम् अनुसारं प्रत्येकं वर्णस्य पृथक् पृथक् कार्याणि निर्धारितानि आसन् । प्रथमः वर्णः ब्राह्मणानाम् आसीत् । तेषां कार्यं वेदानाम् अध्ययनम् अध्यापनं यजनं याजनं च आसीत् यस्य कृते तेभ्यः उपहारस्वरूपेण वस्तूनि लभन्ते स्म । द्वितीयं स्थानं शासकानाम् आसीत् ये क्षत्रियाः इति उच्यन्ते स्म । तेषां कार्यं युद्धं जनानां रक्षणं च आसीत् । तृतीये स्थाने विशः वैश्याः वा आसन् । यत्र कृषक-पशुपालक-व्यापारिणः च आगच्छन्ति स्म । क्षत्रियाः वैश्याः च यष्टुम् अधिकारिणः आसन् । वर्णेषु अन्तिमं स्थानं शूद्राणाम् आसीत् । तेषाम् कार्यं अन्येषां त्रयाणां वर्णानां सेवनम् आसीत् । एते अनुष्ठानं कर्तुम् अधिकारिणः नासन् । प्रायः महिलाः अपि शूद्रवत् अमन्यन्त । महिलाः शूद्राः च वेदान् अध्येतुम् अधिकारिणः न आसन्।

पुरोहितानाम् अनुसारं सर्वेषां वर्णानां निर्धारणं जन्मनः आधारेण भवति स्म । उदाहरणार्थं ब्राह्मणपित्रोः सन्ततिः ब्राह्मणः एव भवति स्म । पश्चात् केचन जनाः अस्पृश्याः इति अमन्यन्त । अस्पृश्यवर्गेषु केचन शिल्पकाराखेटक-भोजनसङ्ग्राहकाः सम्मिलिताः आसन् । सहैव तेषु तेषां जनानाम् अपि समावेशः आसीत् ये शवान् प्रेतभूमौ स्थापयन्ति स्म ज्वालयन्ति स्म च । एतादृशैः जनैः सह सम्पर्कः स्पर्शः वा अपवित्रता इति मन्यते स्म ।

कैश्चित् जनैः ब्राह्मणैः प्रकल्पिता एषा वर्णव्यवस्था न अङ्गीकृता । केचन जनाः आत्मानं पुरोहितेभ्यः वयं श्रेष्ठाः इति मन्यन्ते स्म । केचन जनाः जन्माधारितं वर्णनिर्धारणं समीचीनं न मन्यन्ते स्म । एतद् अतिरिच्य केचन जनाः व्यवसायस्य आधारेण जनानां मध्ये भेदभावम् समीचीनं न मन्यन्ते स्म । यद्यपि केचन जनाः इच्छन्ति स्म यत् अनुष्ठानसम्पन्नकरणस्य अधिकारः सर्वेषां भवेत् । केचन जनाः अस्पृश्यतायाः आलोचनां कृतवन्तः। अस्य उपमहाद्वीपस्य पूर्वोत्तरक्षेत्रेषु यथा बहुषु क्षेत्रेषु सामाजिकार्थिकासमानताः अल्पाः आसन् । अत्र पुरोहितानां प्रभावः अपि बहु सीमितम् आसीत् ।

जनाः वर्णव्यवस्थायाः विरोधं किमर्थं कृतवन्तः?

जनपदाः

महायज्ञकर्तारः राजानः अधुना जनस्य राजानः न भूत्वा जनपदानां राजानः इति अमन्यन्त। जनपदस्य शाब्दिकार्थः जनवासस्य स्थानं भवति स्म। केचन महत्त्वपूर्णाः जनपदाः चतुर्थे मानचित्रे ५७ पृष्ठे च दर्शिताः सन्ति।

पुरातत्त्वविदः एतेषां जनपदानाम् अनेकेषां वसतीनां खननं कृतवन्तः। देहल्यां पुरातनदुर्गः उत्तरप्रदेशे मेरठस्य पार्श्वे हस्तिनापुरम् एटायाः च समीपे अतरंजीखेडाः एतेषु प्रमुखाः सन्ति। खननेन अवगतं यत् जनाः पर्णकुटीरेषु निवसन्ति स्म अपि च पशूनाम् अन्यप्राणिनां च पालनं कुर्वन्ति स्म। ते तण्डुल-गोधूम-धान्य-यव-द्विदल-इक्षु-तिल-सर्षपसदृशानां सस्यानाम् उत्पादनं कुर्वन्ति स्म।

किं भवान् एतस्यां सूच्यां कस्यचित् एतादृशस्य सस्यस्य नाम प्राप्तवान् यस्य चित्रित-धूसर-पात्रम् एतादृशेषु पात्रेषु अधिकांशतः स्थालिकाः कटोरिकाः च एव प्राप्ताः सन्ति। एतानि पात्राणि कृशसतहस्य सुन्दराणि स्निग्धानि च सन्ति। प्रायः एतेषां प्रयोगः विशिष्टावसरेषु महत्त्वपूर्णजनानां कृते भोजनं परिवेषयितुं क्रियते स्म।

उल्लेखः चतुर्थाध्याये नास्ति ?

जनाः मृत्पात्राणि अपि निर्मान्ति स्म। एतेषु कानिचन बभ्रुवर्णीयानि कानिचन च रक्तवर्णीयानि भवन्ति स्म। एतेषु पुरास्थलेषु केचन विशेषप्रकारकाणि पात्राणि अलभन्त। यानि चित्रितबभ्रुपात्राणां रूपेण ज्ञायन्ते। यथा एतेषां नामभिः एव स्पष्टम् अस्ति, एतेषु पात्रेषु चित्रकलाकृतिः वर्तते। एतेषु पात्रेषु सामान्यतया चित्रकला सरलरेखाणां ज्यामितीयाकृतीनां च रूपेण कृता वर्तते।

महाजनपदाः

प्रायः २५००वर्षेभ्यः पूर्वं केचन जनपदाः अधिकाः महत्त्वपूर्णाः आसन्। एते महाजनपदाः इति उक्ताः। चतुर्थे मानचित्रे केचन महाजनपदाः दर्शिताः सन्ति। प्रायः महाजनपदानां काचित् राजधानी भवति स्म। कासुचित् राजधानीषु दुर्गाभित्तेः निर्माणम् अपि कृतम् आसीत् अर्थात् एताः परितः काष्ठेष्टिका-पाषाणनिर्मितानां उच्चभित्तीनां निर्माणं कृतम् आसीत्।

इत्थम् अनुभूयते यत् अन्येषां राज्ञाम् आक्रमणतः भीत्वा स्वसुरक्षायै एतेषां दुर्गाणां निर्माणं राजानः कृतवन्तः। केचन राजानः स्वस्य राजधानीं परितः विशालानां प्रभावशालिनीनां

भित्तीनां च निर्माणं कारयित्वा स्वसमृद्धेः शक्तेश्चापि प्रदर्शनं कुर्वन्ति स्म । अनेन प्रकारेण दुर्गस्य अन्तः उषितानां जनानां तस्मिन् क्षेत्रे च अपि नियन्त्रणं सरलं भवति स्म । एतादृशीनां विशालभित्तीनां निर्माणाय व्यापकयोजनायाः आवश्यकता आसीत् अपि च लक्षाधिकसङ्ख्यायाम् इष्टिकानां पाषाणानां च प्रबन्धः करणीयः भवति स्म । सहस्राधिकाः स्त्रीपुरुषाः बालकाः च एतस्य कृते अजस्रं परिश्रमं कृतवन्तः स्युः । एतस्य कृते संसाधनानाम् आवश्यकता स्यात् ।

अधुना राजानः सेनायाः स्थापनम् आरब्धवन्तः आसन् । सैनिकेभ्यः नियमितवेतनं



दत्त्वा ते आवर्षं स्थाप्यन्ते स्म । कञ्चित् देयः सम्भवतः आहतमुद्राणां रूपेण भवति स्म । ९२ पृष्ठे चित्रं पश्यतु । एतेषां नाणकानां विषये भवान् नवम्यां कक्ष्यायां पठिष्यति ।
महाजनपदीयाः राजानः ऋग्वेदोल्लिखितराजभ्यः कथं भिन्नाः आसन् । भेदद्वयं ज्ञापयतु ।
कौशाम्बीदुर्गस्य भित्तिः ।



इदं चित्रम् आधुनिकोत्तरप्रदेशस्थस्य इलाहाबादस्य समीपात् लब्धायाः इष्टिकाभित्तेः अवशिष्टम् अस्ति। एतस्य एकस्य भागस्य निर्माणं सम्भवतः २५०० वर्षेभ्यः पूर्वम् अभवत् ।

राजस्वम्

महाजनपदीयाः राजानः विशालदुर्गाणि निर्मापयन्ति स्म अपि च महतीं चमूं स्थापयन्ति स्म, अतः तेषां कृते प्रचुरसंसाधनानाम् आवश्यकता भवति स्म। एतदर्थं तेषां कृते कर्मचारिणाम् अपि आवश्यकता भवति स्म । अतः महजनपदीयाः राजानः जनैः प्रदत्तानाम् उपहारवस्तूनाम् उपरि अनाश्रिताः भूत्वा अधुना नियमितरूपेण राजस्वग्रहणम् आरब्धवन्तः।

- सस्यानाम् उपरि प्रवर्तित-राजकराः महत्त्वपूर्णतमाः आसन् यतो हि आधिक्येन जनाः कृषकाः एव आसन्। प्रायः उत्पादनस्य १/६इति भागः राजस्वस्य रूपेण निर्धार्यते स्म यः भागः इति उच्यते स्म।
- शिल्पकाराणाम् उपरि राजकराः स्थापिताः ये प्रायः श्रमस्य रूपेण प्रत्यर्प्यन्ते स्म। यथा केनचित् तन्तुवायेन लौहकारेण सुवर्णकारेण च राज्ञः कृते मासि एकस्मिन् दिने कार्यं करणीयं भवति स्म।
- पशुपालकैः पशूनां रूपेण अथवा तेषाम् उत्पादस्य रूपेण राजधनं दातव्यं भवति स्म।
- व्यापारिभिः अपि क्रयणे विक्रयणे वा राजधनं दातव्यं भवति स्म।
- आखेटकैः सङ्ग्राहकैः च वनात् प्राप्तवस्तूनि दातव्यानि भवन्ति स्म।

आखेटकाः खाद्यसङ्ग्राहकाः च नृपेभ्यः किं यच्छन्तः स्युः ?

कृषौ परिवर्तनानि

एतस्मिन् युगे कृषिक्षेत्रे द्वे बृहती परिवर्तने जाते। हलस्य फाल इति अधुना लौहेन निर्मितुम् आरब्धम्। अधुना दृढभूमिः काष्ठफालस्य तोलनायां लौहफालेन सरलतया कर्ष्टुं शक्यते स्म। एतस्मात् सस्यानाम् उत्पादकता वर्धिता। एके जनाः धान्यस्य पादपानाम् आरोपणम् आरब्धवन्तः अर्थात् क्षेत्रेषु बीजानि विकीर्य धान्यस्य उत्पादनस्य स्थाने धान्यस्य पादपान् उत्पाद्य तेषां रोपणम् आरब्धवन्तः । अधुना पूर्वापेक्षया आधिक्येन पादपाः जीवन्ति स्म अतः उत्पादनम् अपि आधिक्येन आरब्धम्। अत्र महान् श्रमः अपेक्षते स्म। एतत् कार्यम् आधिक्येन दासाः दास्यः भूमिहीनकृषकाः श्रमिकाः वा कुर्वन्ति स्म।

किं भवान् वक्तुं शक्नोति यत् राजानः एतेषां परिवर्तनानां प्रोत्साहनं किमर्थं कुर्वन्तः स्युः ?

सूक्ष्म-निरीक्षणम्

(क) मगधः

चतुर्थे मानचित्रे (५७ पृष्ठे) मगधम् अन्वेषयतु । प्रायः द्विशतवर्षयोः आभ्यन्तरे मगधः सर्वेभ्यः महत्त्वपूर्णः जनपदः अजायत । गङ्गा-सोन-सदृशाः नद्यः मगधतः भूत्वा प्रवहन्ति स्म । एताः (क) यातायाताय (ख) जलवितरणाय (ग) भूमिम् उर्वरां च कर्तुं महत्त्वपूर्णाः आसन् । मगधस्य एकः भागः वनैः पूरितः आसीत् । तत्र वन्यहस्तिनः गृहीत्वा तान् प्रशिक्ष्य सेनायाः कार्ये प्रवर्तयन्ति स्म । इदम् एव न वनेभ्यः गृहाणि वाहनानि रथान् च निर्मातुं काष्ठानि लभन्ते स्म। एतद् अतिरिच्य एतस्मिन् क्षेत्रे लौहायस्कस्य आकराः सन्ति । दृढानि अस्त्राणि शस्त्राणि च निर्मातुं एते बहु उपयोगिनः आसन् ।

मगधे द्वौ शक्तिशालिनौ शासकौ अभवताम् तयोः नामनी बिम्बिसारः अजातशत्रुः च आस्ताम् । अन्यान् जनपदान् जेतुम् एतौ यथासम्भवं साधनानि कार्यपथे आनयन्ति स्म । महापद्मनन्दः कश्चित् महत्त्वपूर्णः शासकः आसीत् । सः स्व-नियन्त्रणक्षेत्रम् एतस्य उपमहाद्वीपस्य उत्तरपश्चिमभागं यावत् विस्तारितवान् आसीत् । बिहारे राजगृहम् (आधुनिक-राजगीरम्) इति बहूनि वर्षाणि यावत् मगधस्य राजधानी आसीत् । अनन्तरकाले पाटलिपुत्रं (वर्तमानपटना) इति राजधानीं कृतवन्तः।

२३०० वर्षेभ्यः पूर्वकालस्य तथ्यम् अस्ति मेसिडोनियायाः राजा सिकन्दरः विश्वविजयं कर्तुम् इच्छति स्म । सम्पूर्णतया सफले असत्यपि सः मिस्र-पश्चिमेशिययोः च कानिचन राज्यानि जयन् भारतीयोपमहाद्वीपे व्यासनद्याः तटं यावत् प्राप्तवान् । यदा सः मगधं प्रति चलितुम् आरब्धवान् तदा तस्य सैनिकाः अस्वीकृतवन्तः। ते एतस्मात् कारणात् भयभीताः आसन् यत् भारतस्य शासकानां पार्श्वे पदाति-रथिक-हस्तिसेनाः च व्यापकसङ्ख्यायाम् आसन् ।

एतासां सेनानां ऋग्वेदोल्लिखित-सेनानां च मध्ये भवान् कां भिन्नतां पश्यति ?

(ख) वज्जि

यथा भवान् उपरि पठितवान्, मगधः कश्चित् शक्तिशालिराज्यम् अभवत् । तत् निकषा एव वज्जिराज्यम् आसीत्, यस्य राजधानी वैशाली (बिहारः) आसीत् । अत्र पृथक्रूपेण काचित् शासनव्यवस्था आसीत् यः गणः सङ्घः वा इति उच्यते स्म ।

गणे सङ्घे वा बहवः शासकाः भवन्ति स्म । कदाचित् जनाः युगपदेव शासनं कुर्वन्ति स्म येषु प्रत्येकं जनः राजा इति उच्यते स्म । एते राजानः विभिन्नानुष्ठानानि सहैव सम्पादयन्ति स्म । सभासु उपविश्य एते चर्चामाध्यमेन विवादेन च निश्चीकुर्वन्ति

गणः

गणशब्दस्य प्रयोगः बहूनां सदस्यानां समूहस्य कृते क्रियते ।

सङ्घः

सङ्घः अर्थात् सङ्घटनम् अथवा सभा

स्म यत् किं करणीयम् अस्ति अपि च कथं करणीयम् अस्ति । शत्रवाक्रमणानां प्रतिकारः कथं करणीयः इति विषये अपि ते मिलित्वा चर्चयन्ति स्म । स्त्रियः दासाः कर्मकराः च एतासु सभासु भागं न ग्रहीतुं शक्नुवन्ति स्म ।
बुद्ध-महावीरौ (ययोः विषये भवान् सप्तमाध्याये पठिष्यति) द्वापि गणेन अथवा सङ्घेन सम्बन्धितौ आस्ताम् । बौद्धसाहित्ये सङ्घजीवनस्य बहु सजीवं वर्णनम् उपलभ्यते **0**।

वज्जिसङ्घस्य वर्णनं दीघनिकायतः स्वीकृतः अस्ति । दीघनिकायः कश्चित् प्रसिद्धबौद्धग्रन्थः अस्ति, यस्मिन् बुद्धस्य अनेकानि व्याख्यानानि प्रदत्तानि सन्ति । एतानि प्रायः २३००वर्षेभ्यः पूर्वं लिखितानि आसन् ।

अजासत्तु(अजातशत्रुः) अपि च वज्जि-सङ्घः

अजातसत्तुः वज्जि-सङ्घे आक्रन्तुम् इच्छति स्म । सः स्व-मन्त्रिणं वस्सकारं बुद्धं निकषा परामर्शाय प्रेषितवान् । बुद्धः तं पृष्टवान् यत् किं वज्जिसभाः नियमितरूपेण भवन्ति अपि च तासु सर्वे सदस्याः नियमितरूपेण भवन्ति अपि च तासु सर्वे सदस्याः उपस्थिताः भवन्ति ? यदा सः ज्ञातवान् यत् इत्थं जायते तदा सः उक्तवान् यत् वज्जिवासिनः तावत्पर्यन्तं उन्नतिं करिष्यन्ति यावत्पर्यन्तम्-

- ते पूर्णाः नियमिताः च सभाः करिष्यन्ति ।
- परस्परं मिलित्वा कार्यं करिष्यन्ति ।
- पारम्परिकनियमानां पालनं करिष्यन्ति ।
- महतां सम्मानं समर्थनं तेषां शिक्षाणां च अनुपालनं करिष्यन्ति।
- वज्जिमहिलाभिः सह बलात्कारं न करिष्यन्ति अपि च ताः बन्धकान् न करिष्यन्ति ।
- नगरेषु ग्रामेषु च चैत्यानां संरक्षणं करिष्यन्ति ।
- विभिन्न-मतावलम्बि-साधूनां सम्मानं करिष्यन्ति अपि च तेषाम् आवागमने कश्चित् अपि प्रतिबन्धः न भविष्यति ।

वज्जिसङ्घः अन्येभ्यः जनपदेभ्यः कथं भिन्नः आसीत् ? न्यूनातिन्यूनं भेदत्रयं ज्ञापयतु ।

अनेके शक्तिशालिनः राजानः सङ्घान् जेतुम् इच्छन्ति स्म । एतद् अतिरिच्य तेषां राज्यम् अधुनारभ्य प्रायः १५०० वर्षेभ्यः पूर्वं यावत् अचलत् । तदननतरं गुप्तशासकाः गणे सङ्घे च विजयं प्राप्य तौ स्वराज्ये सम्मेलितवन्तः । एतस्मिन् विषये भवान् एकादशे अध्याये पठिष्यति ।

अन्यत्र

स्वस्य मानचित्रे यूनानम् एथेन्सं च अन्वेषयतु।

प्रायः २५००वर्षेभ्यः पूर्वं एथेन्सस्य जनाः काञ्चित् शासनव्यवस्थां स्थापितवन्तः या गणतन्त्रं प्रजातन्त्रं वा इति उच्यते।

इयं व्यवस्था प्रायः २००वर्षाणि यावत् अचलत्। अत्र ३०वर्षीयेभ्यः उपरि आयुवर्गस्य सर्वेषां पुरुषाणां कृते नागरिकता प्राप्ता आसीत् ये दासाः न आसन्। तत्र काचित् सभा आसीत् या महत्त्वपूर्णेषु विषयेषु निर्णयं स्वीकर्तुं आवर्षं न्यूनातिन्यूनं ४०वारम् आहूयते स्म।

अस्यां सभायां सर्वे नागराः भागं ग्रहीतुं शक्नुवन्ति स्म।

शासनस्य अनेकेषु पदेषु नियुक्तयः गुटिकापातेन क्रियन्ते स्म। सर्वैः नागरिकैः सेनायां नौसेनायां च निजसेवाः प्रदातव्याः भवन्ति स्म।

महिलाः नागरिकख्यातिं न प्राप्तुं शक्नुवन्ति स्म।

व्यापारिणः शिल्पकाराः च ये एथेन्समध्ये निवसन्ति स्म अपि च अनेके वैदेशिकाः ये तत्र कार्यं कुर्वन्ति स्म ते सर्वे अपि नागरिकाधिकारान् न लभन्ते स्म। एथेन्से आकरेषु क्षेत्रेषु कार्यशालासु च ये दासाः कार्यं कुर्वन्ति स्म ते अपि नागराधिकारान् न प्राप्तवन्तः।

किम् एथेन्से वास्तविकतायां जनतन्त्रम् आसीत्?

कल्पनां करोतु

वैशाल्याः तस्मिन् सभागारे भवान् अन्तः जालमार्गेण पश्यति यत्र मगधस्य राजभिः आक्रमणानां सम्मुखीकरण-विषयेषु चर्चा प्रचलन्ती अस्ति। भवान् किं श्रुतवान्?

उपयोगि-शब्दः

राजा
अश्वमेधः
वर्णः
जनपदः
महाजनपदः
दुर्गनिर्माणम्
सेना
करः
पौध-रोपणम्
गणः अथवा सङ्घः
प्रजातन्त्रम्

आगच्छन्तु स्मरणं कुर्मः

१. उचितम् अनुचितं च ज्ञापयतु।

क) अश्वमेधस्य अश्वं स्वराज्यात् निर्गमनस्य मुक्ततां ये राजानः यच्छन्ति स्म ते राजानः यज्ञे आमन्त्र्यन्ते स्म।

ख) राजानम् उपरि सारथी पवित्रजलस्य सेचनं करोति स्म।

ग) पुरातत्त्वविदः जनपदानां निवासेषु प्रासादान् प्राप्तवन्तः।

घ) चित्रित-धूसरपात्रेषु अन्नानि स्थाप्यन्ते स्म।

ङ) महाजनपदेषु अनेकानि नगराणि दुर्गबद्धानि आसन्।

२. अधोलिखितेषु कोष्ठकेषु निम्नलिखितान् शब्दान् पूरयन्तु।

आखेटक-सङ्ग्राहकः, कृषकः,व्यापारी, शिल्पकारः, पशुपालकः।



३. समाजस्य ते के समूहाः आसन्,ये गणानां सभासु भागं न ग्रहीतुं शक्नुवन्ति स्म?

आगच्छतु चर्चयामः

१. महाजनपदस्य राजानः दुर्गान् किमर्थं निर्मापितवन्तः ?
२. वर्तमानस्य शासकानां निर्वाचनस्य प्रक्रिया जनपदानां निर्वाचनात् केन प्रकारेण भिन्ना आसीत् ?

आगच्छतु कृत्वा पश्यामः



३. भवतः पुस्तकस्य अन्ते प्रदत्तराजनैतिक-मानचित्रे स्वराज्यम् अन्वेषयतु । किं तत्र प्राचीनजनपदाः आसन् ? यदि आम्, तर्हि तेषां नामानि लिखतु । यदि नैव, तर्हि स्वस्य राज्यस्य समीपतमानां जनपदानां नामानि लिखतु ।
४. द्वितीयप्रश्नस्य उत्तरे बोधितसमूहेषु कैः समूहैः अद्य अपि करः प्रदीयते ?
५. तृतीयप्रश्नस्य उत्तरे बोधितसमूहेषु के के अद्य अपि मतदानस्य अधिकारं प्राप्तवन्तः सन्ति ?

काश्चन महत्त्वपूर्णतिथयः

- नूतनशासकाः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- महाजनपदः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- अलक्ष्येन्द्रस्य आक्रमणम्, दीघनिकायस्य लेखनम् (प्रायः २३००वर्षेभ्यः)
- गणराज्यानां सङ्घराज्यानां च समाप्तिः । (प्रायः १५००वर्षेभ्यः पूर्वम्)

इति षष्ठोऽध्यायः

अध्यायः 7

नूतनाः प्रश्नाः नूतनाः विचाराः

अनघा भ्रमणार्थं गतवती

अनघा अद्य प्रथमवारं स्वविद्यालयस्य पक्षतः भ्रमणार्थं गच्छन्ती आसीत् । एतदर्थं सा चिररात्रौ पुणेतः (महाराष्ट्रतः) वाराणसीं प्रति गच्छत् रेलयानम् आरोहत् । अनघां प्रापयितुं रेलस्थानके तस्याः अम्बा आगच्छत् । सा तत्र अध्यापिकाम् अवदत् । "छात्रान् बुद्धस्य विषये बोधनेन सह सारनाथं दर्शयितुम् अपि नयतु ।

बुद्धस्य कथा

सिद्धार्थः बौद्ध-धर्मस्य संस्थापकः आसीत् सः गौतमनाम्ना अपि ज्ञायते । तस्य जन्म प्रायः २५००वर्षेभ्यः पूर्वम् अभवत् । अयं तादृशः कालः आसीत् यदा जनानां जीवनशैली द्रुतगत्या परिवर्तमाना आसीत् । यथा भवती षष्ठाध्याये अपठत् यत् एतस्मिन् काले महाजनपदानां केचन राजानः बहुशक्तिशालिनः अभवन् । सहस्रं वर्षाणां पश्चात् पुनः नगराणि विकासपथं गच्छन्ति स्म । ग्राम्यजीवनशैल्याम् अपि परिवर्तनं जायमानम् आसीत् (दशमाध्यायं पश्यतु) । अनेके विचारकाः एतानि परिवर्तनानि अवगन्तुं प्रयासं कुर्वन्ति स्म । ते जीवनस्य वास्तविकम् अर्थम् अपि अवगन्तुम् इच्छन्ति स्म ।

बुद्धः क्षत्रियः आसीत् तथा च शाक्यनामकेन लघुगणेन सम्बन्धितः आसीत् । यौवनावस्थायाम् एव सः तत्त्वज्ञानस्य अन्वेषणाय गार्हस्थ्यसुखानि त्यक्तवान् । सः अनेकानि वर्षाणि यावत् भ्रमणं कृतवान् तथा च अन्यैः विचारकैः सह मिलित्वा चर्चाम् अकरोत् । अन्ततः ज्ञानप्राप्तये सः स्वयमेव मार्गान्वेषणस्य निश्चयम् अकरोत् । एतदर्थं सः बोधगयायां (बिहारे) कस्यचित् अश्वत्थवृक्षस्य अधः बहूनि दिनानि यावत् तपः अकरोत् । अन्ततः सः ज्ञानम् अलभत । तत्पश्चात् सः बुद्धरूपेण ख्यातिं प्राप्नोत् । इतः सः वाराणस्याः निकटस्थं सारनाथं गतवान्, तत्र सः प्रथमवारम् उपदेशम् अकरोत् । सः कुशीनारायां मृत्योः प्राक् अवशिष्टं जीवनं पदातियात्रां कुर्वन् जनान् शिक्षयन् च अयापयत् । बुद्धः अशिक्षयत् यत् एतत् जीवनं कष्टपूर्णं दुःखपूर्णं च अस्ति । अस्माकं दुःखम् इच्छानां लालसानां च कारणात् भवति याः सर्वदा पूर्तिं न गन्तुम् अर्हन्ति ।

कदाचित् वयं यद् इच्छामः तत् प्राप्य अपि सन्तुष्टाः न भवामः, आधिक्येन इतोऽपि वस्तूनि प्राप्तुम् इच्छामः । बुद्धः एतस्याः लिप्सायाः कृते तृष्णा इति शब्दस्य प्रयोगम् अकरोत् । बुद्धः उपदिष्टवान् यत् आत्मसंयमस्य आचरणेन वयं एतादृश्याः लालसायाः मुक्तिं प्राप्तुं शक्नुमः ।

सः उपदिष्टवान् यत् जनाः दयालवः भवेयुः । मनुष्यैः सह एव पशुजीवनस्य अपि आदरं कुर्युः । सः मन्यते स्म यत् अस्माकं कर्मणां परिणामाः कामं ते समीचीनानि भवेयुः अथवा असमीचीनानि भवेयुः । अस्माकं वर्तमानजीवनेन सह अनन्तरजीवनम् अपि प्रभावयन्ति । बुद्धः स्वोपदेशान् जनसामान्याय प्राकृतभाषया अयच्छत् । एतस्मात् कारणात् सामान्यजनाः अपि तस्य उपदेशान् अवगन्तुम् अशक्नुवन् ।.

वेदानां रचनायाः कृते कस्याः भाषयाः प्रयोगः अभवत् ?

बुद्धः अवदत् यत् जनाः काम् अपि शिक्षाम् एतस्मात् कारणात् एव न स्वीकुर्युः यत् इयं शिक्षा तस्य उपदेशत्वेन अस्ति अपि तु ते इमां शिक्षां स्वविवेकस्य आधारेण स्वीकुर्युः । आगच्छतु पश्यामः यत् सः एवं कथम् अकरोत् ।



सारनाथस्तूपः
एतद् भवनं स्तूपनाम्ना ज्ञायते । बुद्धः अत्र एव स्वकीयं प्रथमम् उपदेशम् अददात् । एतस्याः घटनायाः स्मृतौ एव अत्र स्तूपस्य निर्माणम् अभवत् । द्वादशाध्याये भवती एतेषां स्तूपानां (बौद्धचैत्यानाम्) विषये इतोऽपि विस्तरेण पठिष्यति ।

किसागोतम्याः कथा

इयं बुद्धस्य विषये काचित् प्रसिद्धा कथा अस्ति। एकदा किसागोतमीनामिकायाः स्त्रियः पुत्रः अम्रियत। सा एतया घटनया तावती दुःखिनी जाता यत् सा स्वशिशुं क्रोडे निधाय नगरस्य राजमार्गेषु भ्रमन्ती जनान् प्रार्थयितुम् आरभत यत् कश्चित् तस्य पुत्रं पुनर्जीवितं कुर्यात्। कश्चित् सज्जनः तां बुद्धस्य समीपं अनयत्।

बुद्धः उवाच "मह्यं मुष्टिमात्रं सर्षपबीजानि आनीय ददातु अहं भवत्याः पुत्रं जीवितं करिष्यामि"। किसागोतमी अतीव प्रसन्ना अभवत्। परन्तु यदा सा बीजानि आनेतुं प्रस्थितवती तदा बुद्धः ताम् अवारयत् अपि च अवदत् "एतानि बीजानि तादृशात् गृहात् याचित्वा आनयतु यत्र अद्यावधि कस्यापि मृत्युः न जाता स्यात्"।

किसागोतमी एकस्मात् गृहात् अपरं गृहं प्रति अगच्छत् परन्तु सा यत्र अगच्छत् तत्र अपश्यत् यत् प्रत्येकस्मिन् गृहे कस्यापि न कस्यापि मृत्युः जातः एव अस्ति। कस्यचित् पितुः, मातुः, भगिन्याः, पत्युः, भ्रातुः, शिशोः, पितृव्यस्य, पितृव्यायाः, पितामहस्य पितामह्याः च मृत्युः जातः आसीत्।

बुद्धः दुःखग्रस्तां मातरं किं शिक्षयितुं प्रयासं करोति स्म ?

उपनिषद्

यस्मिन् काले बुद्धः उपदिशति स्म तस्मिन् काले एव केचन चिन्तकाः अथवा ततः किञ्चित्कालपूर्वं अन्ये चिन्तकाः अपि जटिलप्रश्नानाम् उत्तराणि अन्वेष्टुं प्रयतन्ते स्म। तेषु केचन मृत्योः अनन्तरस्य जीवनस्य विषये जिज्ञासवः आसन् अपरञ्च अन्ये यज्ञानाम् उपयोगितां ज्ञातुम् उत्सुकाः आसन्। एतेषु आधिकांशचिन्तकानां मतम् आसीत् यत् जगत्यस्मिन् किञ्चित् तु एतादृशम् अस्ति यः स्थायी अस्ति अपि च मृत्योः पश्चात् अपि अवशिष्यते। ते एतस्य वर्णनम् आत्मरूपेण ब्रह्मरूपेण सार्वभौमात्मरूपेण च अकुर्वन्। ते अन्ततः मन्यन्ते स्म यत् आत्मा ब्रह्म च एकमेव अस्ति।

एतादृशानाम् अनेकेषां विचाराणां सङ्कलनम् उपनिषत्सु अभवत्। उपनिषदः उत्तरवैदिकग्रन्थानां भागभूतग्रन्थाः आसन्। उपनिषदः शाब्दिकः अर्थः अस्ति गुरोः समीपे उपवेशनम्। एतेषु ग्रन्थेषु अध्यापकविद्यार्थिनोः मध्ये चर्चायाः सङ्कलनं कृतम् अस्ति। प्रायः एते विचाराः सामान्य-वार्तालापस्य रूपेण प्रस्तुताः सन्ति।

एतासु चर्चासु भागग्रहीतारः अधिकांशतः ब्राह्मणाः राजानः च भवन्ति स्म। कदाचित् गार्गीसदृशीनां स्त्रीविचारकाणाम् अपि उल्लेखः लभ्यते। विद्वत्तायां प्रसिद्धा गार्गी राजसभासु जायमानेषु वादेषु भागं गृह्णाति स्म। निर्धनाः एतादृशेषु वादेषु विरलतया एव भागं गृह्णन्ति स्म। एतादृशः कश्चित् प्रसिद्धापवादः सत्यकामजाबालस्य अस्ति। सत्यकामजाबालस्य नाम तस्य दासीमातुः नाम्ना ख्यातम्। सत्यकामस्य मनसि सत्यं ज्ञातुं तीव्रजिज्ञासा प्रादुर्भूता। गौतमनामकः कश्चित् ब्राह्मणः तं स्वविद्यार्थिनः रूपेण अगृह्णात् अपि च सः तात्कालिकेषु

बुद्धिमान् भिक्षुकः

अयं वार्तालापः छांदोग्योपनिषन्नामक-प्रसिद्धोपनिषदः कस्याश्चित् कथायाः उपरि आधारितः अस्ति । शौनकः अभिप्रतारिणः च द्वौ ऋषी सार्वभौमात्मनः उपासनां कुरुतः स्म । एकदा तौ यस्मिन् काले भोक्तुम् उपाविशताम् कश्चित् भिक्षुकः तत्र आगच्छत् भोजनं च अयाचत ।

शौनकः न्यागादीत् "वयं भवते किमपि न दातुं शक्नुमः" ।

भिक्षुकः पृष्टवान् "विद्वज्जनौ भवन्तौ कम् उपासाते "?

अभिप्रतारिणः उदतरत् "सार्वभौमात्मनः उपासनां करोमि" ।

"अरे! एतस्य अभिप्रायः अयम् अस्ति यत् सार्वभौमात्मा सम्पूर्णे विश्वे विराजते इति भवान् जानाति" ।

ऋषयः अवदन् यत् "आम्, आम्, वयम् एतद् जानीमः" ।

भिक्षुकः पुनः अपृच्छत् "यदि अयं सार्वभौमात्मा सम्पूर्णविश्वे विद्यमानः अस्ति तर्हि अयं मम अन्तः अपि विद्यमानः अस्ति । अहं कः अस्मि ? अहम् एतस्य विश्वस्य कश्चित् भागः एव तु अस्मि" ।

"भवान् सत्यं ब्रवीति युवब्राह्मणः"।

"हे ऋषी ! अतः मह्यं भोजनम् अदत्त्वा भवन्तौ तस्मै सार्वभौमात्मने भोजनदानस्य निषेधं कुरुतः" ।

भिक्षुकस्य वार्तायाः सत्यतां ज्ञात्वा ऋषी तस्मै भोजनम् अदत्ताम् ।

भिक्षुकः भोजनं प्राप्तुं ऋषी कथं सहमतौ कृतवान् ?

सर्वाधिकप्रसिद्ध-विचारकेषु कश्चित् महान् विचारकः अभवत् । उपनिषदां अनेकेषां विचाराणां विकासः अनन्तरकाले प्रसिद्धविचारकेण शङ्कराचार्येण कृतः येषां विषये भवती सप्तमकक्षायां पठिष्यति ।

व्याकरणविद् पाणिनिः

एतस्मिन् युगे अन्ये विद्वांसः अपि अनुसन्धानं कुर्वन्तः आसन् । तेषु प्रसिद्धविद्वत्सु पाणिनिः संस्कृतभाषायाः व्याकरणम् अरचयत् । सः स्वरान् व्यञ्जनानि च कस्मिंश्चित् विशिष्टे क्रमे स्थापयित्वा तेषाम् आधारेण सूत्राणि अरचयत् । एतानि सूत्राणि बीजगणितस्य सूत्रैः सह बहुसाम्यतां भजन्ते । एतेषां प्रयोगं कृत्वा सः संस्कृतभाषायां प्रयुक्तनियमान् लघुसूत्रेषु अलिखत् एते नियमाः प्रायः उपचतुःसहस्रम् आसन् ।

जैनधर्मः

वर्धमानमहावीरः एतस्मिन् एव युगे अर्थात् प्रायः २५००वर्षेभ्यः पूर्वं जैनधर्मस्य चतुर्विंशतितमः अन्तिमतीर्थङ्करः च निजविचाराणां प्रसारम् अकरोत् । सः वज्जिसङ्घस्य लिच्छविकुलस्य कश्चित् क्षत्रियः राजकुमारः आसीत् । वज्जि-सङ्घस्य विषये भवन्तः षष्ठाध्याये अपठन् । ३०वर्षीयः सः गृहम् अत्यजत् । सः वने वासं कर्तुम् आरभत । सः द्वादशवर्षाणि यावत् एकाकी सन् जीवनम् अयापयत् । तदनन्तरं सः ज्ञानं प्राप्नोत् ।

वर्धमानमहावीरस्य शिक्षा सरला आसीत् । सत्यस्य जिज्ञासुः प्रत्येकं स्त्री अथवा पुरुषः स्वकीयं गृहं त्यजेत् । तादृशः सत्यजिज्ञासुः अहिंसायाः नियमान् दृढतया पालयेत् अर्थात् कस्यापि जीवस्य कृते कष्टं न दद्यात् । जीवस्य हत्यां न कुर्यात् । महावीरस्य कथनम् आसीत् यत् "सर्वे प्राणिनः जीवितुम् इच्छन्ति । सर्वेभ्यः जीवनं प्रियम् अस्ति" । महावीरः स्वकीयां शिक्षां प्राकृतभाषया अददात् । यस्मात् कारणात् साधारणजनः अपि तस्य एवं च तस्य अनुयायिनः शिक्षाम् अवगन्तुं शक्नुयात् । देशस्य विभिन्नेषु भागेषु प्राकृतभाषायाः विभिन्नानि रूपाणि प्रचलितानि आसन् । तस्याः प्राकृतभाषायाः क्षेत्रविशेषे प्रचलनस्य आधारेण एव विभिन्नानि नामानि आसन् यथा मगधे उच्यमाना प्राकृतभाषा मागधी इति उच्यते स्म ।

जैनः

जैन-शब्दः 'जिन'शब्दात् निष्पन्नः अस्ति, यस्य अर्थः अस्ति 'विजेता'।

महावीरस्य कृते 'जिन'शब्दस्य प्रयोगः किमर्थम् अभवत्?

जैननाम्ना ख्यातस्य महावीरस्य अनुयायिभिः भोजनार्थं भिक्षाटनं कृत्वा सरलं जीवनं यापनीयं भवति स्म । तैः अनुयायिभिः सर्वथा सत्यमार्गपथिकैः भवितव्यम् आसीत् । तेषां कृते अस्तेयस्य दृढनिर्देशः आसीत् । ब्रह्मचर्यं पालनीयं भवति स्म । पुरुषैः वस्त्रसहितं सर्वं त्यक्तव्यं भवति स्म ।

अधिकांशजनानां कृते एतादृशानां दृढनियमानां पालनं बहुकठिनम् आसीत् । पुनरपि सहस्राधिकाः जनाः एतां नूतनां जीवनशैलीम् अवगन्तुं शिक्षितुं च स्वगृहाणि त्यक्तवन्तः । बहवः जनाः स्वगृहेषु एव अतिष्ठन् तथा च भिक्षुक-भिक्षुकीणां कृते भोजनं प्रदाय तेषां साहाय्यम् अकुर्वन् ।

मुख्यतः व्यापारिणः जैनधर्मस्य समर्थनम् अकुर्वन् । कृषकाणां कृते एतेषां नियमानां पालनम् अत्यन्तं कठिनम् आसीत् । यतो हि तैः कृषकैः सस्यस्य रक्षार्थं कीटाः मारणीयाः भवन्ति स्म । अनन्तरेषु शताब्देषु जैनधर्मः उत्तरभारतस्य अनेकेषु भागेषु गुर्जरे तमिलनाडौ कर्णाटके च अपि प्रासरत् । महावीरस्य तस्य अनुयायिनां च उपदेशाः शिक्षाः च बह्वीः शताब्दीः यावत् मौखिकरूपेण अवर्तन्त । वर्तमानकाले उपलब्धस्य जैनधर्मस्य शिक्षाः प्रायः १५००वर्षेभ्यः पूर्वं गुर्जरे वल्लभीनामके स्थाने लिखिताः आसन् । (सप्तमे मानचित्रे ११३तमे पृष्ठे पश्यन्तु) ।

सङ्घः

महावीरस्य बुद्धस्य च द्वयोः एव मतम् आसीत् यत् गृहस्य त्यागात् एव तात्त्विकस्य ज्ञानस्य प्राप्तिः भवितुं शक्नोति । सः एतादृशानां जनानां कृते सङ्घनामकं सङ्घटनं कृतवान् । यत्र गृहत्यागिनः जनाः एकस्मिन् स्थाने वसितुं शक्नुयुः । सङ्घवासिनां बौद्धभिक्षुकाणां कृते निर्मिताः नियमाः विनयपिटकनामके ग्रन्थे लभ्यन्ते । वयं विनयपिटकेन अवगच्छामः यत् सङ्घे पुरुषाणां स्त्रीणां च वासव्यवस्था पृथक्-पृथक् आसीत् । सर्वे जनाः सङ्घे प्रवेष्टुं शक्नुवन्ति स्म । यद्यपि सङ्घे प्रवेशाय बालैः स्वपितृभ्यः, दासैः स्वस्वामिभ्यः, राजपुरुषैः राजभ्यः आज्ञा

स्वीकर्तव्या भवति स्म । अधमर्णैः धनिकेभ्यः अनुमतिः ग्रहीतव्या भवति स्म । स्त्रिया सङ्घप्रवेशाय स्वपत्युः अनुमतिः स्वीकर्तव्या भवति स्म ।

सङ्घे प्रवेष्टृभिः स्त्रीपुरुषैः बहुसरलं जीवनं यापनीयं भवति स्म । ते स्वस्य अधिकांश-समयं ध्याने साधनायां च यापयन्ति स्म । साधकाः कस्मिंश्चित् निश्चिते काले दिने नगराणि ग्रामान् च गत्वा भिक्षां याचन्ते स्म । एतस्मात् कारणात् एव ताः भिक्षु-भिक्षुक्यः (साधु-भिक्षुकयोः कृते प्राकृतशब्दः भिक्खु भिक्खुणी च इति आसीत्) इति शब्देन सम्बोध्यन्ते स्म । ते सामान्यजनान् उपदिशन्ति स्म । सममेव परस्परं साहाय्यं अपि कुर्वन्ति स्म । ते पारस्परिके कस्मिन्नपि कलहे जाते सति तस्य निदानाय प्रायः उपवेशनानि कुर्वन्ति स्म ।

सङ्घे प्रवेशस्य ग्रहीतृषु ब्राह्मणाः क्षत्रियाः व्यापारिणः श्रमिकाः नापिताः गणिकाः दासाः च सम्मिलिताः आसन् । एतेषु बहवः जनाः बुद्धस्य शिक्षाणां विषये लिखितवन्तः तथा च केचन जनाः सङ्घे स्वजीवनस्य विषये सुन्दरकवितानां रचनाः कृतवन्तः ।

गताध्याये वर्णितसङ्घस्य अस्मिन् अध्याये वर्णितस्य सङ्घस्य च मध्ये भिन्नताद्वयं सूचयतु । किम् एतयोः काचित् समानता दृश्यते ?

उपत्यकां खनित्वा निर्मिता काचित् गुहा । इयं कार्ले (वर्तमान-महाराष्ट्रे) स्थिता काचित् गुहा अस्ति । भिक्षुक्यः भिक्षुकाः च एतेषु शरणस्थलेषु उषित्वा ध्यानं कुर्वन्ति स्म ।

विहारः

जैनाः बौद्ध-भिक्षवः च आवर्षम् एकस्मात् स्थानात् अन्यत् स्थानं प्रति भ्रमित्वा उपदिशन्ति स्म ? केवलं वर्षर्तौ यदा यात्रा कठिना भवति स्म तदा ते एकस्मिन् स्थाने एव निवसन्ति स्म । एतादृशे काले ते निजानुयायिभिः उद्यानेषु निर्मापितेषु कुटीरेषु एव अथवा पर्वतीयक्षेत्राणां प्राकृतिकगुहासु च निवसन्ति स्म ।

कालक्रमेण भिक्षुकी-भिक्षुकाः तेषां समर्थकाः च अधिक-स्थायि-शरण-स्थलानाम् आवश्यकताः अनुभूतवन्तः । तदा अनेकानि शरणस्थलानि निर्मितानि यानि विहाराः इति उक्ताः । आरम्भे विहाराः काष्ठमयाः निर्मिताः पश्चात् एतेषां निर्माणे इष्टकानां प्रयोगः प्रारब्धः । पश्चिमभारते विशेषतया केचन विहाराः पर्वतान् खनित्वा निर्मिताः ।



केनचित् बौद्धग्रन्थेन ज्ञायते-

यथा महासागरेषु प्राप्तासु नदीनां पृथक्-पृथक् सत्ता न ज्ञायते अर्थात् सा सत्ता समाप्ता भवति तथैव बुद्धस्य अनुयायिनः यदा भिक्षुकश्रेणीषु प्रविशन्ति तदा ते स्वस्य वर्णम् अर्थात् जातिं श्रेणीं कुटुम्बं च सर्वं त्यजन्ति।

प्रायः कैश्चित् धनि-व्यापारि-नृप-भूस्वामिभिः प्रदत्तभूमौ एव विहारस्य निर्माणं भवति स्म। स्थानीयजनाः भिक्षुकी-भिक्षुकेभ्यः भोजनं वस्त्राणि ओषधानि च आनयन्ति स्म। तदर्थं तेभ्यः जनेभ्यः भिक्षुकाः उपदेशान् शिक्षाः वा प्रतियच्छन्ति स्म। अग्रिमेषु शताब्देषु बौद्धधर्मः उपमहाद्वीपस्य विभिन्नभागैः सह बाह्यक्षेत्रेषु अपि प्रसृतः। दशमाध्याये भवती एतस्मिन् विषये इतोऽपि पठिष्यति।

आश्रम-व्यवस्था

जैन-बौद्ध-धर्मौ यस्मिन् काले लोकप्रियौ जायमानौ आस्ताम् प्रायः तस्मिन् समकाले एव ब्राह्मणाः आश्रमव्यवस्थायाः विकासम् अकुर्वन्।

अत्र आश्रमशब्देन तात्पर्यं जनैः वासस्थानाय ध्यानाय वा नास्ति अपि तु अस्य तात्पर्यं जीवनस्य कश्चन चरणः अर्थात् भागः इति अस्ति।

ब्रह्मचर्य-गृहस्थ-वानप्रस्थ-सन्यास-नामकानां चतुर्णाम् आश्रमाणां व्यवस्था कृता।

ब्रह्मचर्यस्य अन्तर्गतं ब्राह्मण-क्षत्रिय-वैश्येभ्यः इयम् अपेक्षा क्रियते स्म यत् एतस्य चरणस्य काले ते सरलं जीवनं यापयित्वा वेदानाम् अध्ययनं करिष्यन्ति।

तैः गृहस्थाश्रमस्य अन्तर्गतं पाणिग्रहणं कृत्वा गृहस्थरूपेण वसितव्यं भवति स्म। तैः वानप्रस्थस्य अन्तर्गतं वने उषित्वा साधना करणीया भवति स्म। तैः अन्ततः सर्वं त्यक्त्वा सन्यासी भवितव्यः आसीत्।

आश्रमव्यवस्था जनाः स्वजीवनस्य कञ्चित् भागं ध्याने नियोजयेयुः इति विषये बलं ददाति।

प्रायः वेदम् अध्येतुं स्त्रियः अधिकारिण्यः न आसन्। परन्तु ताभिः निजपतिभिः आचरितानाम् आश्रमाणाम् एव अनुसरणं करणीयं भवति स्म।

सङ्घजीवनतः आश्रमाणाम् इयं व्यवस्था कथं भिन्ना आसीत्? अत्र केषां वर्णानाम् उल्लेखः अभवत्? किं सर्वे चत्वारः वर्णाः आश्रमव्यवस्थाम् आचरितुम् अधिकारिणः आसन्?

अन्यत्र

मानचित्रे ईरानम् अन्विष्यतु। जरथुस्त्रः कश्चित् ईरानी-पैगम्बरः आसीत्। तस्य शिक्षाणां सङ्कलनं जेन्द-अवेस्ता नामक-ग्रन्थे उपलभ्यते। जेन्द-अवेस्तायाः भाषा अपि च अस्मिन् ग्रन्थे वर्णित-रीतयः वेदानां भाषया रीतिभिः च सह साम्यतां भजन्ते। जरथुस्त्रस्य मूल-शिक्षायाः सूत्रम् अस्ति - सद्-विचारः सद्वचनं सद्-कार्यं च।

हे ईश्वर! बलं सत्य-प्रधानतां सद्विचारं च प्रददातु, येषां माध्यमेन वयं शान्तिं प्राप्तुं शक्नुयाम।

सहस्रं वर्षाणि यावत् जरथुस्त्रवादः ईरानस्य कश्चित् प्रमुखधर्मः आसीत्। अनन्तरकाले केचन जरथुस्त्रवादिनः ईरानतः आगत्य गुर्जर-महाराष्ट्रयोः तटीयनगरेषु आगत्य उषितवन्तः। ते जनाः एव वर्तमानानां पारसिनां पूर्वजाः आसन्।

कल्पनां करोतु

भवती प्रायः २५००वर्षेभ्यः पूर्वतनस्य कस्यचित् उपदेशकस्य उपदेशं श्रोतुम् इच्छति । तत्र गन्तुं मातापित्रोः अनुमतिं स्वीकर्तुं तौ कथं सहमतौ करिष्यति तत् वर्णयतु ।

आगच्छन्तु स्मरणं कुर्मः

१. बुद्धः जनेषु स्वविचारान् प्रसारयितुं केषु केषु विषयेषु बलाघातम् अकरोत् ?

२. शुद्धम् अशुद्धं च वाक्यं ज्ञापयतु ।

क) बुद्धः पशुबलेः कृते प्रोत्साहनम् अयच्छत् ।

ख) बुद्धद्वारा प्रथमः उपदेशः सारनाथे प्रदत्तः, अतः एतस्य स्थानस्य महत्त्वम् अधिकम् अस्ति ।

ग) बुद्धः अशिक्षयत् यत् अस्माकं जीवने कर्मणः कोऽपि प्रभावः न जायते ।

घ) बुद्धः बोधगयायां ज्ञानम् अलभत ।

ङ) उपनिषद्विचारकाणां मतम् आसीत् यत् आत्मा ब्रह्म च वास्तविकतायां एकैव स्तः।

३. उपनिषदां विचारकाः केषां प्रश्नानाम् उत्तराणि दातुम् इच्छन्ति स्म ?

४. महावीरस्य प्रमुखाः शिक्षाः काः आसन् ?

काश्चन महत्त्वपूर्णतिथयः

- उपनिषदां विचारकौ जैनमहावीर-बुद्धौ (प्रायः २५००वर्षेभ्यः पूर्वम्)
- जैनग्रन्थानां लेखनं (प्रायः १५००वर्षेभ्यः पूर्वम्)

आगच्छतु चर्चयामः

५. अनघायाः अम्बा किमर्थम् इच्छति स्म यत् तस्याः पुत्री बुद्धस्य कथया परिचिता स्यात् ? भवतां एतस्मिन् विषये किं कथनम् अस्ति ।

६. किं भवन्तः चिन्तयन्ति यत् दासेभ्यः सङ्घे प्रवेशः सरलः स्यात् तर्कसहितम् उत्तरं यच्छन्तु ।

आगच्छतु कृत्वा पश्यामः



७. एतस्मिन् अध्याये उल्लिखितानां पञ्चानां विचाराणां प्रश्नानां च सूचीं निर्मातु । तेषु केषाञ्चित् त्रयाणां चयनं कृत्वा चर्चयतु यत् अद्य अपि ते किमर्थं महत्त्वपूर्णाः सन्ति ?

८. अद्य संसारस्य त्यागिनां स्त्रीपुरुषाणां विषये आधिक्येन ज्ञातुं प्रयासं करोतु । एते जनाः कुत्र निवसन्ति, कीदृशानि वस्त्राणि धरन्ति किं च खादन्ति ? एते संसारस्य त्यागं किमर्थं कुर्वन्ति ?

इति सप्तमोऽध्यायः

अध्यायः 8

अशोकः कश्चन विलक्षणः सम्राट् यः युद्धं त्यक्तवान्

रौशनायाः रुप्यकाणि

जन्मदिनस्य अवसरे रौशनायै पितामहः नूतनानि धनपत्राणि(नोट) अददात् । सा तानि स्वहस्ते गोपयित्वा स्थापितवती आसीत् । सा नूतनां सान्द्रमुद्रिकां क्रेतुम् इच्छति स्म परन्तु सा सर्वथा नूतनानि धनपत्राणि अपि द्रष्टुम् अनुभवितुं च इच्छति स्म । तदा सा अपश्यत् यत् सर्वेषां धनपत्राणां दक्षिणतः गान्धिनः स्मितमुखं चित्रितम् आसीत् । वामतः लघु-लघुसिंहाः चित्रिताः आसन् । सा अचिन्तयत् 'अत्र सिंहाः किमर्थं चित्रिताः सन्ति' ।

सिंहयुक्तं स्तम्भ-शीर्षम्

किञ्चन महत् राज्यम् – किञ्चन साम्राज्यम्

वयं येषां सिंहानां चित्राणि रुप्येकेषु पश्यामः, तेषां कश्चित् सुदीर्घः इतिहासः अस्ति । ते सिंहाः पाषाणान् कर्तयित्वा निर्मिताः सन्ति अपि च ते सारनाथे कस्मिंश्चित् विशालस्तम्भे स्थापिताः सन्ति । (एतस्मिन् विषये भवती सप्तमे अध्याये अपठत् ।)

इतिहासे महानतमेषु राजसु कश्चित् अशोकः अजायत । तस्य अशोकस्य निर्देशेन एतादृशाः अभिलेखाः अनेकेषु स्तम्भेषु पाषाणेषु च उत्कीर्णाः सन्ति । किञ्चित् अन्यत् अवगमनात् पूर्वं यथा एतेषु अभिलेखेषु किं लिखितम् इत्यादि अवगमनात् पूर्वं सर्वादौ इदं ज्ञातुं प्रयतामहे यत् तस्य राज्यं साम्राज्यम् इति किमर्थम् उच्यते ।

अशोकः यस्मिन् साम्राज्ये शासनं करोति स्म । तस्य स्थापना तस्य पितामहः चन्द्रगुप्तमौर्यः प्रायः २३००वर्षेभ्यः पूर्वम् अकरोत् । चाणक्यः अथवा कौटिल्यनामकः कश्चित् बुद्धिमान् जनः चन्द्रगुप्तस्य साहाय्यं कृतवान् आसीत् । चाणक्यस्य अनेके विचाराः अर्थशास्त्रनामके पुस्तके उपलभ्यन्ते ।

वंशः

यदा एकस्य एव कुटुम्बुस्य अनेके सदस्याः उत्तरोत्तर-क्रमेण राजपदम् अलङ्कुर्वन्ति, तदा ते समवंशीयाः इति उच्यन्ते । मौर्यवंशे त्रयः महान्तः राजानः अभवन् । चन्द्रगुप्तः तस्य पुत्रः बिन्दुसारः बिन्दुसारस्य च पुत्रः अशोकः इति ।

साम्राज्ये बहूनि नगराणि आसन् । (मानचित्रे तानि कृष्णबिन्दुभिः चिह्नितानि सन्ति) एतेषु साम्राज्यस्य राजधानी पाटलीपुत्रम्,उज्जैनः तक्षशिलासदृशानि च नगराणि आसन् । तक्षशिला उत्तरपश्चिमं मध्यैशियां च गन्तुं मार्गः आसीत् । अपरस्मिन् पक्षे उज्जैनः उत्तरभारतात् दक्षिणभारतं प्रति गम्यमानस्य मध्यमार्गे आसीत् । प्रायः नगरेषु व्यापारिणः सर्वकारीयाः अधिकारिणः शिल्पकाराः च निवसन्ति स्म ।

साम्राज्यस्य महत्सु क्षेत्रेषु कृषकाणां पशुपालकानां च ग्रामाः आसन् । मध्यभारतसदृशेषु क्षेत्रेषु अधिकभागाः वनावृताः आसन् । तत्र जनाः पुष्पाणां फलानां च सङ्ग्रहणं पशूनाम् आखेटं च कृत्वा जीविकां चालयन्ति स्म । साम्राज्यस्य पृथक्-पृथक्-क्षेत्रेषु जनाः पृथक्-पृथक् भाषाभिः वदन्ति स्म । ते जनाः प्रायः पृथक्-पृथक् भोजनं कुर्वन्ति स्म अपि च ते परिधानानि अपि पृथक्-पृथक् प्रकारकाणि धरन्ति स्म ।

येषु स्थलेषु अशोकस्य शिलालेखाः अलभ्यन्त तानि स्थलानि रक्तबिन्दुभिः चिह्नितानि सन्ति । एतानि सर्वाणि क्षेत्राणि साम्राज्यस्य आभ्यन्तरे आसन् । तेषां देशानां नामानि ज्ञापयतु यत्र अशोकस्य अभिलेखाः प्राप्ताः सन्ति । भारतस्य कानि कानि राज्यानि मौर्यसाम्राज्यात् बाह्यानि आसन्?



राज्यं साम्राज्यतः कथं पृथक् अस्ति ?

- यतो हि साम्राज्यानि राज्येभ्यः व्यापकानि भवन्ति, अपि च तेषां रक्षायै महतीनां सेनानाम् आवश्यकता भवति। अतः नृपाणाम् अपेक्षया सम्राड्भ्यः अधिकसंसाधनानाम् आवश्यकता भवति।
- अतः तेभ्यः राजभ्यः व्यापकसङ्ख्यायां करस्य एकत्रीकरणाय अधिकारिणाम् आवश्यकता भवति।

साम्राज्यस्य प्रशासनम्

यतो हि मौर्यसाम्राज्यं विशालतमम् आसीत् अतः पृथक्-पृथक् भागेषु पृथक्तया शासनं क्रियते स्म । पाटलिपुत्रस्य तस्य समीपवर्तिषु क्षेत्रेषु च साक्षात् सम्राजः नियन्त्रणम् आसीत्। एतस्य इदं तात्पर्यम् आसीत् यत् एतस्य क्षेत्रस्य ग्राम्यकृषकेभ्यः नागरकृषकेभ्यः पशुपालकेभ्यः शिल्पकारेभ्यः व्यापारिभ्यः च राजस्वम् एकत्रीकर्तुं राजा अधिकारिणः नियोजयति स्म । ये राज्ञः आदेशानाम् उल्लङ्घनं कुर्वन्ति स्म, अधिकारिणः तान् दण्डयन्ति स्म । एतेषु नैकेषाम् अधिकारिणां कृते वेतनम् अपि दीयते स्म । संदेशवाहकाः एकस्मात् स्थानात् अनन्तरस्थाने भ्रमन्ति स्म, तथा च राज्ञः गुप्तचराः अधिकारिणां कार्यस्य निरीक्षणं कुर्वन्ति स्म । सर्वोच्चसत्ता सम्राजः आसीत्, यः राज-परिवारस्य वरिष्ठमन्त्रिणां च साहाय्येन सर्वेषाम् उपरि नियन्त्रणं स्थापयति स्म।

मौर्यसाम्राज्यस्य आभ्यन्तरे अनेकानि लघुक्षेत्राणि अथवा अनेके प्रान्ताः आसन् । एतेषु तक्षशिलातः अथवा उज्जैनसदृशाभ्यः प्रान्तीयराजधानीभ्यः अपि शासनं क्रियते स्म । अल्पतया पाटलिपुत्रतः अपि एतेषु क्षेत्रेषु नियन्त्रणं स्थाप्यते स्म । राजकुमाराः प्रायः तत्रत्याः राज्यपालरूपेण नियोज्यन्ते स्म। परन्तु इत्थम् उह्यते यत् एतादृशेषु स्थानेषु स्थानीयपरम्पराभिः नियमानुसारं एव शासनं भवति स्म, अथवा तेषाम् एव मान्यता आसीत्।

प्रादेशिकेन्द्राणां मध्ये विस्तृतक्षेत्राणि आसन् । एतेषु क्षेत्रेषु मौर्यशासकाः केवलं मार्गेषु नदीषु च एव नियन्त्रणस्थापनस्य प्रयासं कुर्वन्ति स्म यानि आवागमनस्य कृते महत्त्वपूर्णानि आसन् । ते इतः यानि संसाधनानि राजस्वरूपेण उपहाररूपेण वा प्राप्नुवन्ति स्म तानि एकत्रीक्रियन्ते स्म । उदाहरणार्थम् अर्थशास्त्रे लिखितम् अस्ति यत् उत्तर-पश्चिम-भागः कम्बलानां कृते दक्षिणभारतं च सुवर्णस्य बहुमूल्यपाषाणानां च कृते प्रसिद्धम् आसीत् । सम्भाव्यते यत् संसाधनानि उपहार(नजराना)रूपेण एकत्रीक्रियन्ते स्म।

उपहारः (नजराना)

यत्र 'राजकराः' नियमितप्रकारेण एकत्रीक्रियन्ते स्म तत्र एव 'नजराना' इति अनियमितरूपेण यदा सम्भवः स्यात् तदा एकत्रीक्रियते स्म । एतादृशाः उपहाराः(नजराना) विविधपदार्थानां रूपेण प्रायः एतादृशेभ्यः जनेभ्यः स्वीक्रियन्ते स्म, ये स्वेच्छया एतानि यच्छन्ति स्म ।

राजधान्यां सम्राजः

मेगस्थनीजः चन्द्रगुप्तस्य राजसभायां पश्चिमैशियायाः यूनानिनृपस्य सेल्यूकस-निकेटरस्य राजदूतः आसीत् । मेगस्थनीजः यत्किमपि अलिखत् तस्य विवरणम् अददात् ।

अत्र वयं तस्य विवरणस्य अंशं दद्मः । जनतायाः पुरतः सम्राजि आगते सति शोभायात्रायाः रूपेण उत्सवः आयोज्यते स्म । सम्राट् सुवर्णमय्यां शिविकायाम् उपावेश्य नीयते । तेषाम् अङ्गरक्षकाः सुवर्ण-रजतालङ्कृत-हस्तिषु आरुढाः भवन्ति । केचन अङ्गरक्षकाः वृक्षान् गृहीत्वा चलन्ति । एतेषु वृक्षेषु प्रशिक्षितशुकानां कश्चित् समूहः तिष्ठति, यः सम्राजः शिरः परितः भ्रमति । राजा सामान्यतः सशस्त्र-महिलाभिः आवृत्तः भवति । सः नृपः सदैव एतस्मात् बिभेति यत् कुत्रचित् कश्चित् तस्य हत्यां कर्तुं न प्रयतेत । राज्ञे भोजनस्य परिवेशनात् प्राक् तस्य राज्ञः केचन विशिष्टाः सेवकाः पूर्वं तत् भोजनम् आस्वाद्य परीक्षन्ते । राजा निरन्तरं द्वे रात्र्यौ यावत् एकस्मिन् एव प्रकोष्ठे न स्वपिति स्म ।

अपि च पाटलिपुत्रस्य(आधुनिक-पटना) विषये

इदं कश्चित् विशालं सुन्दरं च नगरम् अस्ति । इदं केनचित् विशाल-दुर्गेण आवृत्तम् अस्ति यस्मिन् ५७०शिखराः अपि च ६४द्वाराणि सन्ति । तलद्वय-तलत्रय-युक्तानि च गृहाणि काष्ठमयानि अपक्वेष्टिकामयानि च सन्ति । नृपस्य प्रासादः अपि काष्ठमयः अस्ति, यः विलिखित-पाषाणैः अलङ्कृतः अस्ति । अयं सर्वतः उद्यानैः चटकनीडैः च आवृत्तः अस्ति ।

राज्ञः भोजनात् प्राक् तद्भोजनं राज्ञः विशिष्टसेवकाय आस्वादयितुं किमर्थं दीयते स्म ?

पाटलिपुत्रं मोहनजोदडोः कथं भिन्नम् आसीत्?(सङ्केतः चतुर्थम् अध्यायं पश्यतु) ।

अपि च अन्ते वनप्रदेशाः समाविष्टाः आसन्, तत्रत्याः वास्तव्याः प्रायः स्वतन्त्राः आसन् । तेभ्यः अपेक्ष्यते स्म यत् ते मौर्यपदाधिकारिभ्यः हस्ति-काष्ठ-मधु-सिक्थसदृशानि वस्तूनि आनीय यच्छेयुः ।

अशोकः – कश्चित् विचित्रः सम्राट्

अशोकः मौर्यवंशस्य प्रसिद्धः शासकः आसीत् । सः तादृशः प्रथमः शासकः आसीत् यः अभिलेखैः जनतां यावत् सन्देशप्रापणाय प्रायतत । अशोकस्य प्रभूताः अभिलेखाः प्राकृतभाषायाम् तथा च ब्राह्मीलिप्यां सन्ति ।

कलिङ्गयुद्धं वर्णयन् अशोकस्य अभिलेखः

स्वस्य कस्मिंश्चित् अभिलेखे अशोकः इदं तथ्यम् अवदत् –

"राज्याभिषेकस्य अष्टौ वर्षाणां पश्चात् अहं कलिङ्गविजयं अकरवम्।

प्रायः सार्धैकलक्षं जनाः कारागृहं प्रेषिताः। लक्षाधिकाः जनाः मारिताः।

तस्मात् अहम् अत्यधिकं दुःखम् अन्वभवम्। किमर्थम् ?

यदा कश्चित् स्वतन्त्रः देशः जीयते तर्हि लक्षाधिकाः जनाः मार्यन्ते अपि च बहवः जनाःनिगडिताः भवन्ति । एतस्मिन् ब्राह्मणाः तथा च श्रमणाः अपि मार्यन्ते।

ये जनाः स्वघनिष्ठसम्बन्धिषु मित्रेषु च प्रभूतं स्निह्यन्ति ,दासान् मृतकान् च प्रति दयावन्तः भवन्ति, ते अपि युद्धे मार्यन्ते अथवा स्वप्रियजनेभ्यः विरहिताः भवन्ति।

अतः अहं पश्चात्तपामि। अधुना अहं धम्मं (धर्मम्) पालयितुं तथा च अन्येषां कृते अपि एतस्य शिक्षणस्य निश्चयम् अकरवम्।

अहं मन्ये यत् धम्मस्य(धर्मस्य) माध्यमेन जनानां स्नेहपात्रत्वं बलाद्विजयात् श्रेष्ठतरम् अस्ति । अहम् इदम् अभिलेखं भविष्यत्कालाय कस्यचित् सन्देशस्य रूपेण उत्कारयामि तस्मात् एताम् उपर्युक्ताम् घटनां दृष्ट्वा मम मृत्योः पश्चात् मम पुत्राः पौत्राः च अपि युद्धं न कुर्युः।

एतद्विपरीतं तैः चिन्तनीयं यत् धम्मस्य वर्धनं कथं स्यात्।

कलिङ्गयुद्धम् अभिलक्ष्य अशोकस्य मनोगत-विचारेषु कथं परिवर्तनम् अभूत् ?

('धम्मः' संस्कृतशब्दस्य 'धर्मस्य' प्राकृतरूपम् अस्ति)।



इमाम् उत्कृष्ट-लेप-युक्तां पाषाणमयीं प्रतिमाम् पश्यतु। इयं प्रतिमा बिहारस्य रामपुरवायां लब्ध-मौर्यकालीन-स्तम्भस्य भागभूता अस्ति। अधुना एषा राष्ट्रपतिभवने स्थापिता अस्ति। तस्य कालस्य मूर्तिकलायाः एतत् किञ्चन उदाहरणम् अस्ति।

अशोकस्य कलिङ्गयुद्धम्

कलिङ्गः तटवर्तिनः उडीसाराज्यस्य प्राचीनं नाम अस्ति (पञ्चमे मानचित्रे तत् च ७६पृष्टे वर्तते तत् पश्यतु)। अशोकः कलिङ्गं जेतुम् अयुद्ध्यत। परन्तु युद्धजनितहिंसां रक्तपातं च दृष्ट्वा तस्य युद्धात् वितृष्णा अभवत्। सः निरणयत् यत् भविष्यति काले कदापि न योत्स्यामि।

अशोकस्य धम्मः(धर्मः) कीदृशः आसीत् ?

अशोकस्य धम्मे(धर्मे) कस्यापि देवतायाः पूजायाः कर्मकाण्डस्य वा आवश्यकता नासीत्। सः अनुभवति स्म यत् यथा पिता स्वबालान् सुव्यवहारं शिक्षयति तथैव तस्य कर्तव्यम् आसीत् यत् स्वप्रजाः शिक्षयेत्। सः बुद्धस्य उपदेशैः अपि प्रेरितः आसीत्।

एतादृश्यः अनेकाः समस्याः आसन् यासां कृते तस्मिन् संवेदना आसीत्। तस्य साम्राज्ये पृथक्-पृथक्-धर्मावलम्बिनः आसन्। एतस्मात् कारणात् कदाचित् परस्परं सङ्घर्षः कलहः वा जायते स्म। पशुबलिः दीयते स्म। दासैः सेवकैः

भृत्यैः च सह क्रूरतापूर्णव्यवहारः क्रियते स्म । एतद् अतिरिच्य कुटुम्बस्य प्रतिवेशिनां च मध्ये अपि कलहाः भवन्ति स्म । अशोकः अनुभूतवान् यत् एतासां समस्यानां निदानं तस्य कर्तव्यम् अस्ति । अतः सः धम्म-महामात्त-नामकाधिकारिणां नियुक्तिं अकरोत्, ये प्रतिस्थानं गत्वा धम्म-शिक्षां(धर्मशिक्षाम्) यच्छन्ति स्म ।

एतद् अतिरिच्य अशोकः स्वसन्देशान् अनेकेषु स्थानेषु शिलासु स्तम्भेषु च उत्कीर्णवान् । अशोकेन अधिकारिणः निर्दिष्टाः यत् ते नृपस्य सन्देशं तेषां जनानां मध्ये पठित्वा श्रावयेयुः, ये स्वयं पठितुं समर्थाः न आसन् । अशोकः धम्म-विचारान् प्रसारयितुं

८४-८५पृष्ठयोः प्रदत्ते षष्ठमानचित्रे एतानि क्षेत्राणि अन्वेष्टुं प्रयतताम्।

सीरिया-मिश्र-ग्रीस-श्रीलङ्कासु च दूतान् प्रैषत् । सः अशोकः राज-मार्गान् निर्मापितवान्, कूपान् खानितवान्, विश्रामगृहाणि निर्मापितवान् । एतदतिरिच्य सः मनुष्याणां पशूनां च कृते चिकित्सा-व्यवस्थाम् अपि अकरोत् ।

स्वप्रजायै अशोकस्य सन्देशाः

जनाः विभिन्नेषु अवसरेषु अनुष्ठानं कुर्वन्ति । उदाहरणार्थं यदा ते जनाः रुग्णाः भवन्ति यदा तेषां सन्ततीनां विवाहः भवति, शिशूनां जन्मावसरे तथा च यदा ते यात्रां प्रारभन्ते, तदा ते अनेकविधानि अनुष्ठानानि कुर्वन्ति ।

एतानि कर्मकाण्डानि कार्यसाधकानि न ।

एतेषां स्थाने यदि जनाः पृथक् रीतीः अङ्गीकुर्युः तर्हि ताः आधिक्येन फलदायिन्यः भविष्यन्ति । एताः विभिन्नप्रकारकाः रीतयः काः सन्ति ?

एताः सन्ति – स्वदासैः भृत्यैः च सह सम्यग्व्यवहरणम्, ज्येष्ठानाम् आदरः,सर्वेषु जीवेषु दयाभावस्य स्थापनम्, ब्राह्मणेभ्यः श्रमणेभ्यः च दानम् ।

स्वस्य धम्मस्य (धर्मस्य) प्रशंसनम् अन्येषां च धम्मस्य (धर्मस्य) निन्दनं द्वयमेव असमीचीनम् अस्ति । प्रत्येकं जनः अपरेषां धर्मस्य आदरं कुर्यात् । यदि कश्चित् स्वस्य धर्मस्य प्रशंसाम् अपि च अन्येषां धर्मस्य निन्दां करोति तर्हि सः वास्तविकतायां स्वधर्मस्य अधिकां हानिं कुर्वन् अस्ति ।

अतः प्रत्येकं जनः अपरस्य धर्मस्य प्रमुखविश्वासान् अवगन्तुं प्रयासं कुर्वन् तम् आद्रियेत ।

भारतस्य प्रथमः प्रधानमन्त्री जवाहरलालनेहरुः अलिखत्, अद्य अपि तेषां महापुरुषाणां धर्मशिक्षाः अस्माभिः सह कयाचित् एतादृश्या भाषया वार्तालापं कुर्वन्ति याः शिक्षाः वयम् अवगन्तुं पारयामः.... येभ्यः च वयं बहुकिमपि शिक्षितुं शक्नुमः ।

अशोकः धम्मस्य विचारान् दूरं यावत् प्रसारयितुं तान् धर्मविषयान् अबोधयत् । ये भवत्याः अनुसारम् अद्य अपि प्रासङ्गिकाः सन्ति । अशोकस्य सन्देशस्य तान् भागान् ज्ञापयतु, ये अद्य अपि प्रासङ्गिकाः सन्ति ।





अन्यत्र

मौर्य-साम्राज्यस्य उदयात् किञ्चित् पूर्वं प्रायः २४०० वर्षेभ्यः प्राक् चीनसम्राजः चीनभित्तेः निर्माणम् आरभन्त । एतस्याः निर्माणस्य उद्देश्यम् उत्तरसीमायाः पशुपालकेभ्यः रक्षणम् आसीत् । अग्रिम-द्विसहस्र-वर्षाणि यावत् एतस्याः भित्त्याः निर्माणस्य कार्यम् अचलत् । यतो हि साम्राज्यस्य सीमाः मध्ये मध्ये परिवर्तिताः । इयं भित्तिः प्रायः ६४००किलोमीटर-परिमित-दैर्घ्ययुक्ता अस्ति । एषा पाषाणैः इष्टिकाभिः च निर्मिता अस्ति । एतस्याः उपरितनः भागः राजमार्गवत् प्रथितः अस्ति । एतां भित्तिं निर्मातुं सहस्राधिकाः जनाः कार्यं कृतवन्तः । प्रत्येकं १००-२००मीटरपरिमितेषु स्थानेषु एतस्याः रक्षाणाय लघु-गृहाकारकाः कुटीराः निर्मिताः सन्ति ।

प्रतिवेशिदेशान् प्रति अशोकस्य दृष्टिः चैनिकसम्राजां दृष्टेः कथं भिन्ना आसीत् ?

कल्पयतु

भवती कलिङ्गे निवसति तथा च भवत्याः पित रौ युद्धे बहूनि कष्टानि सोढवन्तौ । सद्यः एव अशोकस्य दूताः धम्मस्य(धर्मस्य) नूतनान् विचारान् स्वीकृत्य आगतवन्तः सन्ति । भवती स्वमातापित्रोः सन्देशवाहकानां च मध्ये जातवार्त्तालापस्य वर्णनं करोतु ।

उपयोगि शब्दाः

साम्राज्यम्
राजधानी
अधिकारी
सन्देशवाहकः
प्रान्तः

आगच्छन्तु स्मरणं कुर्मः

1. मौर्य-साम्राज्ये विभिन्न-व्यवसायेषु संलग्नजनानां सूचीं निर्मातु ।
2. रिक्तस्थानानि पूरयतु –

क) यत्र सम्राजां प्रत्यक्षतः शासनम् आसीत् तत्र अधिकारिणः ------ गृह्णन्ति स्म ।

ख) राजकुमाराः प्रायः प्रान्तेषु _____रूपेण प्रेष्यन्ते स्म ।

ग) मौर्यशासकाः गमनागमनाय महत्त्वपूर्णेषु_____ नियन्त्रणस्य प्रयासं कुर्वन्ति स्म ।

घ) प्रदेशेषु निवासिजनाः मौर्याधिकारिभ्यः _____यच्छन्ति स्म ।

काश्चन महत्त्वपूर्णतिथयः

- मौर्यसाम्राज्यस्य आरम्भः (2300 वर्षेभ्यः पूर्वम्)

3. बोधयतु यत् निम्नलिखितानि वाक्यानि शुद्धानि अशुद्धानि वा सन्ति -

क) उज्जैनः उत्तर-पश्चिमं प्रति गमनागमनस्य मार्गे आसीत् ।

ख) आधुनिक-पाकिस्तानस्य अफगानिस्तानस्य च प्रदेशाः मौर्यसाम्राज्यस्य आभ्यन्तरे आसन् ।

ग) चन्द्रगुप्तस्य विचाराः अर्थशास्त्रे लिखिताः सन्ति ।

घ) कलिङ्गः बङ्गालस्य प्राचीनं नाम आसीत् ।

ङ) अशोकस्य अधिकतराः अभिलेखाः ब्राह्मीलिप्यां सन्ति ।

आगच्छन्तु चर्चां कुर्मः

4. तासां समस्यानां सूचीं निर्मातु येषां समाधानम् अशोकः धम्मद्वारा चिकीर्षति स्म ।

5. धम्मस्य(धर्मस्य) प्रचाराय अशोकः केषां साधनानां प्रयोगम् अकरोत्?

6. भवत्याः अनुसारं दासैः सेवकैः च सह दुर्व्यवहारः किमर्थं क्रियते ? किं भवन्तः अनुभवन्ति यत् सम्राजः आदेशैः तेषां सेवकानां स्थितौ परिवर्तनं जातं स्यात् ? सकारणं स्वोत्तरं वदतु ।

आगच्छन्तु कृत्वा पश्यामः



7. रौशनां बोधयन् कञ्चित् अनुच्छेदं लिखन्तु यत् अस्माकं मुद्रासु सिंहाः किमर्थं दृश्यन्ते ? न्यूनातिन्यूनं इतोऽपि कस्यचित् एकस्य वस्तुनः नाम गृह्णन्तु, यस्मिन् एतेषां सिंहानाम् एव चित्राणि स्युः ।

8. यदि भवतां समीपे निजाभिलेखान् प्रस्तोतुं सामर्थ्यं स्यात् तर्हि भवन्तः काः चतस्रः राजाज्ञाः दद्युः ?

मानचित्रम् – ६

कौशेय-मार्ग-सहिताः महत्त्वपूर्णाः व्यापारिकमार्गाः।


मंगोलिया
चीन
फारसः
अरबसागरः
अ र ब:
हिमालय पर्वतः
एते मार्गाः चीनस्य शासकानां नियन्त्रणे आसन्।
एते मार्गाः कुषाणानां नियन्त्रणे आसन्। (अध्यायः 10)
एते महत्त्वपूर्णाः सामुद्रमार्गाः आसन्।
एते मार्गाः ईरानस्य (फारसस्य) शासकानां नियन्त्रणे आसन्।
एतेषु मार्गेषु रोमनशासकानां नियन्त्रणम् आसीत्।
चीनीयाः भारतीयाः ईरानीयाः अरबीयाः यूनिनिः रोमदेशीयाः च व्यापारिणः अस्मिन् विनिमये सहभागितां कृतवन्तः।
दक्षिणभारतस्य पत्तनानि मरिचस्य अन्येषां च उपस्कराणां निर्यातदृष्ट्या महत्त्वपूर्णानि आसन्।
मानचित्रे पोडुकाम् (दक्षिणभारते) अन्वेषयन्तु। अरिकामेडु इत्यस्य एतत् रोमननाम आसीत् (अध्यायः ९)।
टि-टाइम्स-एटलस-आफ-वर्ल्ड-हिस्ट्री इति (संपा.ज्योफ्रे

एते मार्गाः चैनिकशासकानां नियन्त्रणे आसन्॥

एते मार्गाः कुषाणानां नियन्त्रणे आसन् (अध्यायः – १०)।

एते महत्त्वपूर्णाः समुद्रमार्गाः आसन्।

एते मार्गाः ईरानशासकानां नियन्त्रणे आसन्।

एतेषु मार्गेषु रोमनशासकानां नियन्त्रणम् आसीत्।

चीनस्य भारतस्य ईरानस्य अरबस्य यूनानस्य रोमनस्य च व्यापारिणः अस्मिन् आदान-प्रदान-कार्यक्रमे भागं गृहीतवन्तः।
दक्षिणभारतस्य पत्तनानि कृष्णमरीचिकायाः अन्येषाम् उपस्कराणां च निर्यातस्य दृष्ट्या महत्त्वपूर्णानि आसन्।
मानचित्रे पोडुका (दक्षिण-भारते) अन्वेषयन्तु। अरिकामेडोः इदं रोमननाम आसीत् (अध्यायः ९)।

दि-टाइम्स-एटलस-आफ-वर्ल्ड-हिस्ट्री(संपा.ज्योफ्रे-बारक्लो) हैमंड-इंक-न्यू-जर्सी, १९८६,पृ.७०-७१ इत्याधारितम् अस्ति।

अग्रिमा वार्त्ता

प्रायः २२००वर्षेभ्यः पूर्वं मौर्यसाम्राज्यस्य पतनम् अभवत् । अस्य स्थाने (साकमेव अन्येषु स्थानेषु) अनेकेषां नूतनानां राज्यानाम् उदयः अभवत्। पश्चिमोत्तरयोः तथा च उत्तरभारतस्य केषुचित् भागेषु प्रायः शतं वर्षाणि यावत् हिन्द-यवन-राज्ञां शासनम् आसीत् । तदनन्तरं पश्चिमोत्तरयोः उत्तरे पश्चिमभारते च शकनामकानां मध्यैशियायीजनानां शासनम् आरब्धम् । एतेषु कानिचन राज्यानि प्रायः ५००वर्षाणि यावत् अतिष्ठन्, यावत्पर्यन्तं शकशासकाः गुप्तशासकेभ्यः पराजयं न प्राप्तवन्तः (एकादशाध्याये चर्चा वर्तते)। शकानां पश्चात् कुषाणाः शासनं स्थापितवन्तः (प्रायः २०००वर्षेभ्यः प्राक्) । दशमे अध्याये भवन्तः कुषाणानां विषये विस्तरेण ज्ञास्यन्ति ।

हिन्द-यवन-मुद्रा

उत्तरस्य मध्यभारतस्य च केषुचित् क्षेत्रेषु मौर्यसेनानायकः पुष्यमित्रशुंगः राज्यस्य स्थापनाम् अकरोत् । शुंगानां पश्चात् कण्वानाम् अन्येषां च केषाञ्चित् वंशानां शासनं तावत्पर्यन्तम् अचलत् यावत्पर्यन्तं प्रायः १७००वर्षेभ्यः पूर्वं गुप्तसाम्राज्यस्य स्थापना अभवत् । अस्माभिः दृष्टं यत् पश्चिमभारतस्य केषुचित् भागेषु शकानां शासनम् आसीत्। अत्र पश्चिमभारते मध्यभारते च शासनं कुर्वद्भिः सातवाहनशासकैः सह नैकानि युद्धानि अभवन्। प्रायः २१००वर्षेभ्यः पूर्वं स्थापितं सातवाहनराज्यं प्रायः ४००वर्षाणि यावत् अतिष्ठत् । प्रायः १७००वर्षेभ्यः पूर्वं मध्यभारते पश्चिमभारते च वाकाटकवंशेन शासनं स्थापितम्।

कुषाण-मुद्रा

शक-सिक्का

दक्षिणभारते २२००तः १८००वर्ष-पूर्वकाले चोलाः चेराः पाण्ड्याः च शासनं कृतवन्तः । प्रायः १५००वर्षेभ्यः पूर्वं पल्लवानां चालुक्यानां च द्व्योः महतोः राज्ययोः स्थापना अभवत्। एतदतिरिच्य अनेके राजानः अनेकानि राज्यानि च आसन्। एतेषां विषये वयं तेषां मुद्राभिः पाण्डुलिपिभिः पुस्तकैः च जानीमः। एतेन सम्पूर्णेन घटनाक्रमेण सह एव अनेकानि परिवर्तनानि एतादृशानि अपि जायमानानि आसन् येषु सामान्यस्त्रीपुरुषाणां महत्त्वपूर्णं योगदानम् आसीत् । एतस्मिन् काले कृषेः प्रसारः नूतननगराणां विकासः उद्योगे व्यापारे च प्रगतिः आसीत्। व्यापारिणः एकतः यत्र उपमहाद्वीपस्य अन्तःभागेषु तथा च बाह्यभागेषु भूमार्गाणाम् अन्वेषणम् अकुर्वन् । तत्र एव पश्चिममैशियायाः पूर्व्यफ्रीकायाः दक्षिणपूर्वैशियायाः च समुद्रमार्गाः अपि उद्घटिताः । मन्दिराणाम् अन्येषां च स्तूपानाम् अर्थात् स्तम्भानां भवनानां च निर्माणम् अपि अभवत् । पुस्तकानि विलिखितानि सार्धम् एव वैज्ञानिकान्वेषणानि अपि अभवन्। एषा सम्पूर्णा प्रक्रिया सहैव भवति स्म। एतस्य पुस्तकस्य अन्यान् भागान् पठन्तः भवन्तः एतानि तथ्यानि मनसि धारयन्तु।

सातवाहन-मुद्रा

इति अष्टमोऽध्यायः

अध्यायः 9

सुखिनः ग्रामाः समृद्धनगराणि च

लौहकारस्य आपणे प्रभाकरः

प्रभाकरः लौहकारान् कार्यं कुर्वतः पश्यति स्म । एकस्यां लघव्याम् उत्पीठिकायां कुठारः लवित्रम् इति सदृशानि उपकरणानि विक्रयणार्थं स्थापितानि आसन् । अपरतः अग्निकुण्डं ज्वलति स्म । उपकरणानि निर्मातुं द्वौ जनौ लौहखण्डं उष्णीकृत्य तं घ्नन्ति स्म । प्रभाकरः एतत् सर्वं दृष्ट्वा आनन्दम् अनुभवति स्म ।







उपकरणानां सूच्यां चित्रस्थोपकरणानां नामानि चिनोतु - लवित्रम्, कुठारः,संदशिका च ।
लौहस्य एवंविधानां पञ्चानां वस्तूनां सूचीं करोतु येषां प्रयोगं भवान् प्रतिदिनं करोति ।

लौहोपकरणानि कृषिः च

लौहस्य प्रयोगः अद्य सामान्या घटना अस्ति । लौहस्य वस्तूनि अस्माकं दैनन्दिनजीवनस्य भागभूतानि जातानि सन्ति । एतस्मिन् उपमहाद्वीपे लौहस्य प्रयोगः प्रायः ३०००वर्षेभ्यः प्राक् आरब्धः । महापाषाण-शवस्थानेषु लौहस्य उपकरणानि शस्त्राणि च व्यापक-सङ्ख्यायाम् अलभ्यन्त । एतेषां विषये भवान् पञ्चमाध्याये पठितवान् अस्ति ।

प्रायः २५००वर्षेभ्यः पूर्वं लौहस्य उपकरणानाम् उपयोगः वर्धितः इति प्रमाणं लभ्यते । अत्र वनानि स्वच्छीकर्तुं कुठाराः तथा च कृषेः कृते हलानां फालाः सम्मिलिताः सन्ति । भवान् षष्ठाध्याये पठितवान् आसीत् यत् फालस्य प्रयोगेण कृषेः उत्पादनं वर्धितम् ।

कृषेः उत्पादनं वर्धयितुं सम्मिलिताः अन्ये उपायाः – सेचनम्

समृद्ध-ग्रामान् विना राज्यानाम् राज्ञां च यथावत् अस्तित्वं कठिनाय आसीत् । यथा कृषेः विकासार्थं नूतनोपकरणानां प्रयोगः तथा च रोपणं महत्त्वपूर्णप्रयासौ आस्तां तथैव सेचनम् अपि उपयोगि इति सिद्धम् । अस्मिन् काले सेचनाय कुल्याः कूपाः तडागाः कृत्रिमजलाशयाः च निर्मिताः।

एतस्यां तालिकायां सेचनद्वारा जातानि परिवर्तनानि दर्शितानि सन्ति । रिक्तस्थानेषु शुद्धानि वाक्यानि पूरयन्तु –

- जनैः श्रमः साधितः।

- कृषकाः लाभान्विताः जाताः, यतो हि अधुना उत्पादनस्य अनिश्चितता समाप्ता।
- राजस्वम् अर्पयितुं कृषकैः उत्पादनं वर्धनीयम् आसीत्।
- राजानः सेचनस्य योजनां कृतवन्तः अपि च धनं व्ययीकृतवन्तः।

१. राज्ञे सेना-प्रासाद-दुर्गाणां च निर्माणार्थं धनानि आवश्यकानि।	२. ते कृषकेभ्यः ऋणं गृह्णन्ति ।
३.	४. इदं सेचनेन एव शक्यम् आसीत्।
५	६
७. कृष्युत्पादनं वर्धितम्।	८. राजस्वेन अपि वर्धितम्।
९.	

ग्रामेषु के निवसन्ति स्म ?

अस्य महाद्वीपस्य दक्षिणस्य उत्तरस्य च भागानाम् अधिकांशग्रामेषु न्यूनातिन्यूनं त्रिविधाः जनाः निवसन्ति स्म । तमिलक्षेत्रे महान्तः भूस्वामिनः वेल्लला, साधारणहलवाहकान् उणवाराः अपि च भूमिहीनश्रमिकाः, दासाः कडैसियाराः तथा च अदिमयी इति उच्यन्ते स्म।

देशस्य उत्तरभागे ग्रामस्य प्रधानजनाः ग्राम-भोजकाः इति उच्यन्ते स्म। प्रायः एकस्य एव परिवारस्य जनाः एतस्मिन् पदे बहूनि वर्षाणि यावत् विराजमानाः भवन्ति स्म। अर्थात् इदं पदम् आनुवंशिकम् आसीत्। ग्राम-भोजकस्य पदे सामान्यतया ग्रामस्य महाभूस्वामिनः विराजन्ते स्म। सामान्यतया एतेषां भूमौ एतेषां दासाः श्रमिकाः च कार्यं कुर्वन्ति स्म । एतदतिरिच्य प्रभावयुक्तत्वात् प्रायः राजानः अपि राजधनसङ्ग्रहणस्य कार्यम् एतेभ्यः एव ददति स्म । इमे ग्रामभोजकाः कदाचित् न्यायाधीशस्य आरक्षकस्य च अपि कार्यं कुर्वन्ति स्म।

ग्राम-भोजकान् अतिरिच्य अन्ये स्वतन्त्राः कृषकाः अपि भवन्ति स्म, ये गृहपतयः इति उच्यन्ते स्म। एतेषु अधिकतराः लघुकृषकाः एव भवन्ति स्म। एतान् अतिरिच्य केचन एतादृशाः स्त्रीपुरुषाः अपि भवन्ति स्म, येषां पार्श्वे स्वस्य भूमिः न भवति स्म। एतेषु दासाः कर्मकराः च भवन्ति स्म। यैः अन्येषां भूमौ कार्यं कृत्वा स्वाजीविका चालनीया भवति स्म।

बहुषु ग्रामेषु लौहकाराः कुम्भकाराः काष्ठकाराः शिल्पकाराः च भवन्ति स्म।

प्राचीनतमाः तमिलरचनाः

तमिलस्य प्राचीनतमरचनाः संगमसाहित्यम् इति उच्यन्ते । एतासां रचना प्रायः २३००वर्षेभ्यः पूर्वम् अभूत् । एताः संगमः इति एतस्मात् कारणात् उच्यन्ते यतो हि मदुरैस्थानकस्य (सप्तमं मानचित्रं ११३पृष्ठं च पश्यतु) कवीनां सम्मेलनेषु एतासां सङ्कलनं क्रियते स्म । ग्रामवासिनां येषां तमिलनाम्नाम् उल्लेखः अत्र कृतः अस्ति ते सङ्गमसाहित्ये उपलभ्यन्ते ।

नगराणि – किं कथयन्ति बोधयन्ति वा कथाः, यात्राविवरणं मूर्तिकलाः पुरातत्त्वं च ।

भवान् जातकानां विषये पठितवान् स्यात् । एताः तादृश्यः कथाः सन्ति, याः कथाः सामान्यजनेषु प्रचलिताः आसन् । बौद्धभिक्षवः एतासां सङ्कलनं कृतवन्तः । अत्र काचित् जातककथा प्रदत्ता अस्ति यत् कश्चित् निर्धनः केन प्रकारेण शनैः शनैः धनवान् जातः । प्राचीन-नगराणां जीवनस्य विषये वयं केभ्यश्चित् अन्येभ्यः स्रोतोभ्यः अपि अवगन्तुं शक्नुमः । नगर-ग्राम-वनजीवन-सम्बद्ध-घटनाः मूर्तिकाराः कलात्मक-रूपेण उत्किरन्ति स्म । मूर्तिकारैः एताः मूर्तयः एतादृश- भवनानां चत्वरेषु

कस्यचित् निर्धनस्य चातुर्यम्

कस्मिंश्चित् नगरे कश्चित् निर्धनयुवकः निवसति स्म । तस्य पार्श्वे मृतमूषकम् अतिरिच्य किमपि नासीत् । सः एकेन नाणकेन तं मूषकं भोजनालयस्य विडाल्याः कृते विक्रीतवान् ।

एकस्मिन् दिने पुनः तत्र प्रचण्डवातः आगतः । नृपस्य उद्यानं भग्नशाखाभिः पतितवृक्षैः पत्रैः च आच्छन्नम् । तस्य उद्यानस्य मालाकारः एतस्य उद्यानस्य स्वच्छतायाः वार्त्तया दुःखितः जातः । युवकः तं मालाकारम् उक्तवान् यत् यदि सः एतस्य उद्यानस्य पतितानि पत्राणि शाखाः च तस्मै दद्यात् तर्हि सः तस्य उद्यानस्य स्वच्छतां कर्तुं शक्नोति । मालाकारः शीघ्रमेव युवकस्य प्रस्तावम् अङ्गीकृतवान् ।

युवकः नातिदूरे क्रीडतः बालकान् आहूय उक्तवान् यत् यदि भवन्तः अत्र उद्यानस्य स्वच्छतां करिष्यन्ति तर्हि अहं प्रत्येकं शाखायाः पत्रस्य च परिवर्ते पारिश्रमिकरूपेण भवद्भ्यः मिष्टान्नं दास्यामि । शीघ्रम् एव बालकैः सर्वाणि अपि तृणानि शाखाः पत्राणि च चित्वा मुख्यद्वारस्य समीपे एकत्रीकृतानि । तदा तत्र कश्चित् राजकुम्भकारः ततः निरगच्छत् । सः पात्राणि निर्मातुम् ईन्धनस्य अन्वेषणं करोति स्म । सः सम्पूर्णं काष्ठचयं क्रीतवान् । अनेन प्रकारेण युवकः किञ्चित् धनम् अर्जितवान् ।

अधुना सः युवकः इतोपि काञ्चित् योजनां कृतवान् । कस्मिंश्चित् विशाले पात्रे सः जलं प्रपूर्य नगरस्य द्वारं गतवान् । सः तत्र घासस्य लावकान् पञ्चशतं जनान् जलं पायितवान् ।

प्रसन्नाः भूत्वा ते जनाः उक्तवन्तः "भवता अस्माकं कृते शोभनं कार्यं कृतम् । वदतु वयं भवतः कृते अधुना किं कर्तुं शक्नुमः" ?

सः युवकः अवोचत् "अहं भवतः तदा सूचयिष्यामि यदा मम आवश्यकता भविष्यति" । तदनन्तरं सः केनचित् व्यापारिणा सह मैत्रीं सम्पादितवान् । एकस्मिन् दिने सः व्यापारी तम् उक्तवान् "श्वः कश्चित् अश्ववणिक् पञ्चशतेन अश्वैः सह नगरम् आयाति" ।

सः युवकः इदं श्रुत्वा तेषां घास-लावकानां समीपं गत्वा अवदत् "कृपया भवन्तः सर्वे मह्यं एकं एकं घासपोटलिकां यच्छन्तु अपि च भवन्तः स्वघासपोटलिकां तावत्पर्यन्तं न विक्रीणन्ताम्, यावत् पर्यन्तं मम घासचयः समाप्तिं न गच्छेत् । ते घासस्य लावकाः तस्मै घासस्य पञ्चशतं पोटलिकाः दत्तवन्तः। यदा अश्वस्य वणिक् कुत्रापि घासं न प्राप्तवान्, तर्हि सः तस्य युवकस्य घासं सहस्र-नाणकैः क्रीतवान् ।

अथवा स्तम्भेषु अथवा प्रवेशद्वारेषु अलङ्क्रियन्ते स्म यत्र च जनाः गमनागमनं कुर्वन्ति स्म ।



देहल्यां प्राप्तः वलयकूपः ।
हडप्पायाः जल-निकास-व्यवस्थातः अयं कथं भिन्नः अस्ति ?

अधः - साञ्च्याः मूर्तिकलाः ।
इदं मध्यप्रदेश-स्थित-सांच्यः स्तूपस्य मूर्तिकलायाः चित्रम् अस्ति । अत्र नगरीय-जीवनस्य कश्चित् दृश्यम् अस्ति । भवान् १२अध्याये सांच्याः विषये पठिष्यति । एताः भित्तीः पश्यतु । किं ताः इष्टकाभिः निर्मिताः सन्ति अथवा पुनः काष्ठमयाः अथवा पाषाणमयाः सन्ति ?
किं एतासां चत्वराः काष्ठमयाः सन्ति ? एतेषां भवनानां छदीनां वर्णनं करोतु ।

षष्ठाध्याये वर्णितानि बहूनि नगराणि महाजनपदानां राजधान्यः आसन् । यथा भवान् पठितवान् एतेषु कानिचन नगराणि प्राकारैः आवृत्ताः आसन् ।

यथा भवान् उपरितने चित्रे पश्यति, अनेकनगरेषु वलयकूपाः प्राप्ताः सन्ति । एते वलयकूपाः स्नानालयस्य नालिकायाः अवकरक्षेपणस्य च कार्ये प्रयुञ्जते स्म । प्रायः एते वलयकूपाः जनानां गृहेषु भवन्ति स्म ।

प्रासादानां विपणीनां सामान्यगृहाणां च अवशेषाः न्यूनतया प्राप्ताः सन्ति । सम्भवतः ते काष्ठमयाः मृण्मयाः इष्टकामयाः आच्छादकमयाः च भवन्ति स्म तस्मात् कारणात् अधिकं कालं यावत् न अतिष्ठन् । भविष्यति काले पुरातत्त्वविदः एतेषाम् अन्वेषणं कर्तुं शक्नुवन्ति ।



बेरिगाजायाः (भरूचस्य यूनानी नाम) कथा

बेरिगाजायाः सङ्कीर्णखाते समुद्रमार्गेण आगन्तुकानां कृते नौकायाः चालने महत् काठिन्यं भवति।

नृपेण नियुक्ताः कुशलाः अनुभविनः च स्थानीयनाविकाः एव अत्र जलयानम् आनेतुं शक्नुवन्ति स्म।

बेरोगाजायां मदिरा-ताम्र-टिन-काच-मूंगा-पुखराज-वस्त्राणां सुवर्णस्य रजतस्य च मुद्राणाम् आयातः भवति स्म।

हिमालयस्य औषध-हस्तिदन्त-गोमेद-कार्नीलियन-कार्पासवस्त्र-कौशेय-इत्राणां च इतः निर्यातं भवति स्म।

नृपस्य कृते वणिजः विशेषोपहारम् आनयन्ति स्म। एतेषु रजतस्य पात्राणि गायककिशोराः सुन्दर्यः सुमदिराः उत्कृष्टवस्त्राणि च सम्मिलितानि आसन्।

बेरिगाजातः आयातॄणां निर्यातॄणां च वस्तूनां सूचीं निर्मातु।

एतादृश्योः द्वयोः वस्तुनोः नाम ज्ञापयतु, ययोः उपयोगः हडप्पायुगे न भवति स्म।

प्राचीननगराणां विषये तत्र गतानां नाविकानां यात्रिणां च विवरणैः अपि अवगमनं भवति। एतादृशमेव कञ्चित् विस्तृतविवरणं कस्यचित् अज्ञातयूनानि-नाविकस्य अस्ति। येषु येषु पत्तनेषु सः गतवान्, तेषां सर्वेषां विषये सः लिखितवान्। भरूच इति स्थानम् (सप्तमे मानचित्रे ११३ पृष्ठे) अन्विष्यतु। अधुना तत्र प्रदत्तं वर्णनं पठतु।

मुद्राः

नवतितमे पृष्ठे प्रदत्तकथायां भवान् दृष्टवान् यत् केन प्रकारेण मुद्राणाम् आधारेण सम्पत्तेः मूल्याङ्कनम् अभवत्। पुरातत्त्वविदः अस्य कालस्य सहस्राधिकमुद्राः लब्धवन्तः। तेषु प्राचीनतमाः आहतमुद्राः आसन्, याः प्रायः पञ्चशतं वर्षाणि यावत् प्रचलने आसन्। एतस्य चित्रम् अधः प्रदत्तम् अस्ति। रजतमयेषु सुवर्णमयेषु च नाणकेषु विभिन्नाकृतीः विलिख्य अथवा विकीर्य निर्मिताः सन्ति, तस्मात् ताः मुद्राः आहतमुद्राः इति उच्यन्ते स्म।

विनिमयस्य अन्यानि साधनानि

संगम-साहित्यस्य एतां लघुकवितां पठतु।

क्षेत्राणां श्वेतधान्यानि यानेषु आरुह्य
गच्छन्तः सन्ति
लवणस्य कृते
लम्बतराः मार्गाः
कौमुद्याः श्वेतसैकते
परिवारस्य संयोजनम्
कुत्रचित् पृष्ठतनीयाः न भवेयुः
नगरेभ्यः लवणस्य वणिजां
इत्थं गमनेन शून्यवातावरणं जायते।

समुद्रतटे लवणस्य महत् उत्पादनं भवति स्म।

व्यापारिणः केन वस्तुना एतस्य विनिमयं कुर्वन्ति ?
ते कथं यात्रां कुर्वन्ति ?

नगराणि – अनेकेषां गतिविधीनां केन्द्रभूतानि आसन्

प्रायः नगराणि अनेकैः कारणैः महत्त्वपूर्णानि भवन्ति स्म। उदाहरणार्थं मथुरां (सप्तमे मानचित्रे पृष्ठम्- ११३) पश्यतु।

२५००वर्षेभ्यः अपि अधिककालतः इदं कश्चित् महत्त्वपूर्णनगरम् आसीत्, यतो हि यातायातस्य व्यापारस्य च द्वयोः प्रमुखमार्गयोः स्थितम् आसीत्। एतयोः कश्चित् एकः मार्गः उत्तरपश्चिमाभ्यां पूर्वं प्रति अपरः च मार्गः उत्तरतः दक्षिणं प्रति गच्छति स्म। नगरं परितः प्राकाराः आसन्। अत्र अनेकानि मन्दिराणि आसन्। पार्श्वस्थाः कृषकाः पशुपालकाः च नगरीय-जनेभ्यः भोजनसामग्र्याः व्यवस्थां कुर्वन्ति स्म। मथुरानगरम् उत्कृष्टमूर्ति-निर्माणस्य केन्द्रम् आसीत्।

प्रायः २०००वर्षेभ्यः प्राक् मथुरा कुषाणानां राजधानी जाता। एतस्याः विषये भवान् अग्रिमे अध्याये पठिष्यति। मथुरा कश्चित् धार्मिककेन्द्रम् अपि अस्ति। अत्र बौद्धविहाराः जैनमन्दिराणि च सन्ति। मथुरा कृष्णभक्तेः कश्चित् महत्त्वपूर्णं केन्द्रम् अस्ति।

मथुरायां प्रस्तरखण्डेषु मूर्तिषु च लिखिताः अनेके शिलालेखाः प्राप्ताः सन्ति। एते सामान्यतया संक्षिप्ताभिलेखाः सन्ति, यैः स्त्रीपुरुषैः मठानां मन्दिराणां च कृते प्रदत्तदानस्य उल्लेखः क्रियते। प्रायः नगरीयराजानः राजमहिष्यः अधिकारिणः व्यापारिणः शिल्पकाराः च एतादृशं दानं कुर्वन्ति स्म। उदाहरणार्थं मथुरायाः

अभिलेखेषु सुवर्णकाराणां तन्तुवायानां कण्डोलनिर्मातॄणां मालाकाराणां सौगन्धिकानां च उल्लेखः लभ्यते।

मथुरायाः जनानां व्यवसायानां च काञ्चित् सूचीं करोतु । एतादृशस्य कस्यचित् व्यवसायस्य नाम वदतु यः हडप्पायां नासीत्।

शिल्पं शिल्पकाराः च

पुरास्थलेभ्यः शिल्पानाम् आकृतयः प्राप्ताः सन्ति । एतासु मृण्मयानि अतिसुन्दराणि पात्राणि लब्धानि सन्ति । यानि उत्तरीयाणि कृष्णवर्णानि द्युतिमन्ति पात्राणि उच्यन्ते । यतो हि एतानि आधिक्येन उपमहाद्वीपस्य उत्तरीये भागे उपलब्धानि सन्ति, तथा च एतानि प्रायः कृष्णवर्णीयानि भवन्ति। एतेषु च काचित् विशिष्टा कान्तिः भवति।

अवधातव्यं यत् अन्येषां शिल्पानाम् अवशेषाः न अवशिष्टाः स्युः। यथा विभिन्नेभ्यः ग्रन्थेभ्यः वयं जानीमः यत् वस्त्राणाम् उत्पादनं बहुमहत्त्वपूर्णम् आसीत्। उत्तरे वाराणसी दक्षिणे च मदुरैनगरम् एतेषां प्रसिद्धकेन्द्रे आस्ताम्। अत्र स्त्रीपुरुषाः द्वौ अपि कार्यं कुरुतः स्म।

तन्तुनिर्माणस्य वयनस्य च नियमाः

एते नियमाः अर्थशास्त्रस्य सन्ति। अष्टमाध्याये अर्थशास्त्रस्य उल्लेखः कृतः अस्ति। एतस्मिन् शास्त्रे वर्णितम् अस्ति यत् केन प्रकारेण कस्यचित् विशिष्टाधिकारिणः मार्गदर्शने उद्योगेषु तन्तुनिर्माणस्य वयनस्य च कार्यं भवति स्म।

कार्पास-सज्जी-करणस्य वृक्षत्वचः कार्पासस्य उर्णवस्त्रस्य त्वक्सारस्य च निर्माणार्थं विधवानां सक्षमाक्षममहिलानां भिक्षुणीनां वृद्धवेश्यानां नृपस्य अवकाश-प्राप्त-दासीनां सेविकानां अवकाश-प्राप्त-देव-दासीनां च नियोजनं कर्तुं शक्यते।

एतेभ्यः उपर्युक्तेभ्यः सर्वेभ्यः गुणवत्तायाः कार्यस्य च अनुसारं पारिश्रमिकं दातव्यम् । याः महिलाः बहिर्गन्तुं अनुमताः न सन्ति ताः स्वस्य दासीः प्रेष्य असिद्धसामग्रीम्(कच्चा – माल) आनय्यतुं शकुन्वन्ति, अपि च सिद्धसामग्रीं तासां माध्यमेन प्रेषयितुं शक्नुवन्ति।

याः महिलाः उद्योगगृहाणि यावत् गन्तुं शक्नुवन्ति ताभिः सामग्री प्रातःकाले एव उद्योगगृहं प्रति नेतव्या भवति स्म, यत्र ताः पारिश्रमिकं प्राप्नुवन्ति स्म । यतो हि प्रातःकाले सामग्रीः निरीक्षितुं पर्याप्तप्रकाशः भवति । यदि निरीक्षकः तां महिलां प्रति कुदृष्ट्या पश्यति अथवा व्यर्थवार्तालापं करोति तर्हि सः दण्डनीयः भवेत्।

यदि महिलया स्वकार्यं पूर्णं न कृतम्, तर्हि तया दण्डशुल्कः दातव्यः भवति स्म। एतदर्थं तस्याः अंगुष्ठः अपि कर्तयितुं शक्यते।

तासां महिलानां सूचीं करोतु याः महिलाः निरीक्षकः नियोजयितुं शक्नोति स्म।

किं कार्यकाले महिलाभिः कष्टानि सोढव्यानि भवन्ति स्म ?

अनेके शिल्पकाराः व्यापारिणः च स्वस्य सङ्घान् निर्मातुम् आरब्धवन्तः आसन्, याः श्रेण्यः इति उच्यन्ते स्म । शिल्पकाराणां श्रेणीनां कार्यं प्रशिक्षणं असाधितसाम्रग्र्याः उपलब्धता सिद्धसामग्र्याः च वितरणम् आसीत् । यद्यपि व्यापारिणां श्रेण्यः व्यापारस्य सञ्चालनं कुर्वन्ति स्म । तथापि श्रेण्यः वित्तकोशानां रूपेण कार्यं कुर्वन्ति स्म, यत्र जनाः धनं संगृह्णन्ति स्म । एतस्य धनस्य निवेशः लाभाय क्रियते स्म । प्राप्तलाभस्य ततः कश्चित् भागः सङ्ग्रहितुः कृते प्रत्यावर्त्यते स्म अथवा पुनः मठादि-धार्मिक-संस्थानेभ्यः दीयते स्म ।

सूक्ष्मनिरीक्षणम् – अरिकामेडुः

सप्तमे मानचित्रे (पृष्ठम्- ११३) अरिकामेडुनगरम् (पाण्डुचेर्याम्) अन्विष्यतु । षण्णवतितमे पृष्ठे रोमस्य विषये प्रदत्तां सूचनां पठतु । प्रायः २२००तः १९००वर्षेभ्यः पूर्वम् अरिकामेडुनामकं पत्तनम् आसीत् । यत्र दूरेभ्यः आगतेभ्यः जलपोतेभ्यः वस्तूनि अवतार्यन्ते स्म । अत्र इष्टिका-निर्मिता काचित् आकृतिः उपलब्धा अस्ति, या सम्भवतः भाण्डागारं स्यात् । अत्र भूमध्यसागरीय-क्षेत्रस्य एंफोरासदृशानि पात्राणि प्राप्तानि सन्ति । अत्र मदिरातैलसदृशाः तरलपदार्थाः स्थापयितुं शक्यन्ते स्म । अत्र द्वाभ्यां पक्षाभ्यां ग्रहीतुं मुष्टिकाः संश्लिष्टाः आसन् । सहैव अत्र "एरेटाइनसदृशानि मुद्रितरक्त-भासमानानि पात्राणि अपि उपलब्धानि सन्ति । एतानि इटलीदेशस्य कस्यचित् नगरस्य नाम्नि एरेटाइन इति पात्रनाम्नः अवगम्यन्ते । एतानि पात्राणि मुद्रिताकारे क्लिन्नमृत्तिकां नोदयित्वा निर्मीयन्ते स्म । कानिचन एतादृशानि पात्राणि अपि लब्धानि सन्ति येषां प्रारूपं तु रोमस्य आसीत्, किन्तु तानि अत्र एव निर्मितानि आसन् । अत्र रोमदीपाः काचपात्राणि रत्नानि च लब्धानि सन्ति ।

सहैव लघुकुण्डानि अपि लब्धानि सन्ति यानि सम्भवतः वस्त्राणि चित्रयितुं स्युः । अत्र काचेन अर्ध-बहुमूल्यपाषाणैः मणिकानां निर्माणस्य पर्याप्तसाक्ष्याणि प्राप्तानि सन्ति ।

रोमेन सह यानि साक्ष्याणि सम्बन्धं दर्शयन्ति तेषां सूचीं रचयतु ।

अभिलिखितानि मृण्मयभाजनानि । केषुचित् भाजनेषु ब्राह्मीलिप्या लेखिताः अभिलेखाः प्राप्ताः सन्ति । आदौ तमिलभाषायाः कृते एतस्याः एव लिप्याः प्रयोगः क्रियते स्म । अतः एव एते तमिल-ब्राह्म्यभिलेखाः

अन्यत्र

एक्वाडक्ट इति

षष्ठ मानचित्रे (पृष्ठम्-८४) रोममहानगरम् अन्विष्यतु । इदं यूरोपस्य प्राचीनतमेषु महानगरेषु अस्ति । एतस्य विकासः प्रायः तदा अभूत्, यदा गङ्गायाः क्षेत्रस्य नगराणि वसन्ति स्म । रोमः कस्यचित् महत्तमस्य साम्राज्यस्य राजधानी आसीत् । इदं साम्राज्यं यूरोपं उत्तराफ्रीकां पश्चिमेशियां यावत् च प्रथितम् आसीत् । एतस्य महत्त्वपूर्णेषु शासकेषु कश्चित् आगस्टसः प्रायः २०००वर्षेभ्यः पूर्वं शासनं कृतवान् । तेन उक्तम् आसीत् यत् रोमः इष्टिकामयनगरम् आसीत्, तद् मया संगमरमरपाषाणैः निर्मापितम् । आगस्टसः तत्पश्चाज्जाताः शासकाः च अनेकेषां मन्दिराणां भवनानाम् च निर्माणं कारितवन्तः । आगस्टसः महान्ति रङ्गमण्डलानि (एम्फिथियेटर इति) निर्मापितवान् । तानि परितः उपवेष्टुं सोपानाकारं स्थानं भवति स्म । अत्र जनाः विभिन्नप्रकारकान् कार्यक्रमान् द्रष्टुं शक्नुवन्ति स्म । ते शासकाः स्नानालयान् अपि निर्मापितवन्तः, अत्र स्त्रीणां पुरुषाणां च कृते स्नातुं पृथक्-पृथक्कालः निर्धारितः आसीत्, अत्र जनाः परस्परं मिलन्ति स्म, विश्रान्तिं च कुर्वन्ति स्म । तत्र महद्भिः दीर्घैः जलवाहिसेतुभिः (एक्वाडक्ट) नगरस्य स्नानालयानां जलप्रपातानां शौचालयानां च कृते जलम् आनयन्ति स्म ।

एतानि दीर्घतमानि रङ्गमण्डलानि (एम्फीथियेटर) जलवाहिसेतवः च एतावन्ति दिनानि यावत् कथम् अवशिष्टानि सुरक्षितानि च सन्ति ?

कल्पयतु

भवान् बेरिगाजायां निवसति अपि च पत्तनम् द्रष्टुम् आगतवान् अस्ति ।

भवान् किं किं द्रष्टुं शक्तवान् ?

आगच्छन्तु स्मरणं कुर्मः

उपयोगि-शब्दाः
लौहः
ग्रामः
सेचनम्
संगमः
नगरम्
वलयकूपः
पत्तनम्
श्रेणी

१. रिक्तस्थानानि पूरयतु –

क) तमिले महाभूस्वामी _____उच्यते।

ख) ग्राम-भोजकानां भूमौ प्रायः _____ द्वारा कृषिः क्रियते स्म।

ग) तमिले हलचालकः _____ उच्यते स्म।

घ) अधिकसंख्याकाः गृहपतयः _____ भूस्वामिनः भवन्ति स्म।

२. ग्रामभोजकानां कार्याणि ज्ञापयतु। ते शक्तिशालिनः किमर्थम् आसन् ?

३. ग्रामेषु नगरेषु च वसतां शिल्पकाराणां सूचीं निर्मातु।

४. समीचीनानि उत्तराणि अन्विष्यतु –

क) वलयकूपस्य उपयोगः

- स्नातुम्
- वस्त्राणि प्रक्षालयितुम्
- सेचितुम्
- जलनिकासाय क्रियते स्म।

ख) आहतमुद्राः नाणकानि वा

- रजतम्
- सुवर्णम्
- त्रपुः (टिन इति)
- हस्तिदन्त-निर्मितानि भवन्ति स्म।

ग) मथुरा-महत्त्वपूर्णम्

- ग्रामः
- पत्तनम्
- धार्मिक-केन्द्रम्
- वनक्षेत्रम् आसीत्।

घ) श्रेणी

- शासकानाम्

काश्चन महत्त्वपूर्णतिथयः

- उपमहाद्वीपस्य लौहस्य प्रयोगस्य आरम्भः (प्रायः ३०००वर्षेभ्यः पूर्वम्)
- लौहनिर्मितवस्तूनां प्रयोगस्य वर्धनम्, नगरम्,आहतमुद्राः (सिक्के) इति (प्रायः २५००वर्षेभ्यः पूर्वम्)
- संगमसाहित्यस्य रचनायाः आरम्भः (प्रायः २३००वर्षेभ्यः पूर्वम्)
- अरिकामेडोः पत्तनम् (प्रायः २२००-१९०० वर्षेभ्यः पूर्वम्)

- शिल्पकाराणाम्
- कृषकाणाम्
- पशुपालकानां सङ्घः भवति स्म ।

आगच्छन्तु चर्चां कुर्मः

५. ८७पृष्ठे दर्शितेषु लौहोपकरणेषु कृष्यर्थं कानि उपकरणानि महत्त्वपूर्णानि भविष्यन्ति ? दर्शितानि अन्यानि उपकरणानि कस्मिन् कार्ये प्रयुक्तानि स्युः?

६. भवान् स्वनगरस्य जलनिकास-व्यवस्थायाः तुलनां तेषां नगराणां व्यवस्थया करोतु, यासां विषये भवान् पठितवान् अस्ति । एतासु भवान् काः काः समानताः अपि च काः काः असमानताः दृष्टवान् ?

आगच्छन्तु कृत्वा पश्यामः



७. यदि भवान् कमपि शिल्पकारं कार्यं कुर्वन्तं दृष्टवान् अस्ति, तर्हि कैश्चित् वाक्यैः तद्विषयकं वर्णनं करोतु । (सङ्केतः - ते शिल्पकाराः असंशोधित-सामग्रीं कुतः प्राप्नुवन्ति । कीदृशानाम् उपकरणानां ते शिल्पकाराः प्रयोगं कुर्वन्ति । संशोधितसामग्र्या तैः किं क्रियते इत्यादि)

८. स्वग्राम्यजनानाम् अथवा नगरीयजनानां कार्याणां सूचीं करोतु । मथुरायां क्रियमाणेषु कार्येषु एतानि कथं समानानि कथं भिन्नानि च सन्ति ?

इति नवमोध्यायः

अध्यायः 10

व्यापारिणः, राजानः तीर्थयात्रिणः च

विपण्यां भ्रमन्ती जगिनी



जगिनी तस्याः ग्रामे मेलकः भविष्यति इति आशायाम् उपविष्टा आसीत् । तस्यै अयसः चकासमानानि पात्राणि चित्रितप्लास्टिक-द्रोण्यः बहुवर्णवस्त्राणि कुञ्चिकया भ्रमणशीलानि उत्तमानि क्रीडनकानि च रोचन्ते स्म । एतेषां वस्तूनां विक्रेतारः वणिजः बसयानैः ट्रकयानैः च तत्र आयान्ति स्म । अपि च ते रात्रौ स्ववस्तूनि पुटीकृत्य नयन्ति स्म । जगिनी आश्चर्यचकिता भवति स्म, यत् ते जनाः इत्थं किमर्थं भ्रमन्ति । तस्याः अम्बा उक्तवती, यत् ते वणिजः आसन् । ते वणिजः वस्तूनि एतादृशेभ्यः स्थानेभ्यः क्रीणन्ति, यत्र एतानि वस्तूनि निर्मीयन्ते । पुनः तानि वस्तूनि ते मेलापकेषु विक्रीणते ।

वाणिज्यस्य वणिजां च विषये अवबोधः

नवमे अध्याये भवती उत्तरस्यां दिशि निर्मीयमाणानां कृष्णलेपयुक्तानां पात्राणां विषये पठितवती अस्ति । एतानि सुन्दराणि भाजनानि, विशेषतया अत्रत्याः कंशाः, स्थालिकाः च एतस्य उपमहाद्वीपस्य अनेकेभ्यः पुरास्थलेभ्यः लब्धानि सन्ति । अयं प्रश्नः उदेति यत् एतादृशेषु पुरास्थलेषु एतानि भाजनानि कथं गतानि स्युः ? इत्थम् ऊह्यते यत् अत्र एतेषां निर्माणं भवति स्म । तस्मात् कारणात् वणिजः एतानि पात्राणि ततः स्वीकृत्य विभिन्नेषु स्थानेषु विक्रीणन्ते स्म ।

दक्षिणभारतं प्रायः सुवर्णस्य उपस्कराणां विशेषतया कृष्णमरीचिकायाः बहुमूल्यपाषाणानां च कृते प्रसिद्धम् आसीत् । कृष्णमरीचिकायाः रोमनसाम्राज्ये एतावती याञ्चा आसीत्, यत् तत्रत्याः जनाः तस्याः नाम कृष्णसुवर्णम् इति कृतवन्तः । एतानि वस्तूनि वणिजः समुद्रीययानैः राजमार्गैः च रोमदेशं प्रापयन्ति स्म । दक्षिणभारते एवंविधाः अनेकाः रोमनमुद्राः प्राप्ताः सन्ति, ताभिः मुद्राभिः ऊह्यते यत् तेषु दिनेषु रोमेन सह भारतस्य समीचीनं वाणिज्यं चलति स्म ।

किं भवती वक्तुं शक्नोति यत् एताः मुद्राः भारतं कथं प्राप्ताः स्युः ? तत्र च कारणं किं स्यात् ?

वाणिज्य-सम्बद्धा काचित् कविता

वाणिज्यस्य प्रमाणानि वयं सङ्गमकविताभ्यः अपि प्राप्नुमः ।
अधोलिखितायां कवितायां पूर्वस्मिन् समुद्रतटे स्थिते पुहारपत्तने आनीतसामग्र्याः वर्णनम् उपलभ्यते ।
"समुद्रीययानैः आनीताः द्रुतगामिनः अश्वाः,
वाहनेषु कृष्णमरीचिकायाः चयाः,
हिमालयतः प्राप्तानि रत्नानि सुवर्णं च ।
दक्षिणस्य उपत्यकाभ्यः चन्दनस्य काष्ठानि,
दक्षिणसागरस्य मौक्तिकानि
पूर्वसागरस्य प्रवालाः
गङ्गायाः कावेर्याः च तटवर्तिनि सस्यानि
श्रीलङ्कातः आनीतानि खाद्यान्नानि
म्यांमारे निर्मितानि मृण्मयभाजनानि दुर्लभानि बहुमूल्यानि आयातितानि वस्तूनि च
कवितायाम् उल्लिखितानां वस्तूनां सूचीं करोतु । किं भवती बोधयितुं शक्नोति यत् एतेषां वस्तूनाम् उपयोगः किमर्थं क्रियते स्म ?

वणिजाः अनेकान् सामुद्रमार्गान् अन्विष्टवन्तः । एतेषु केचन समुद्रस्य तटभागात् निर्गच्छन्ति स्म । केचन अरबसागरस्य बंगालस्य च आखातं पारं कुर्वन्ति स्म । नाविकाः ऋतु-प्रेरित-वात-साहाय्येन स्वयात्रां शीघ्रं पूर्णां कुर्वन्ति स्म । ते नाविकाः अफ्रीकायाः अथवा अरबस्य च पूर्वीतटेन एतस्य उपमहाद्वीपस्य पश्चिमतटं प्राप्तुम् इच्छन्ति स्म । तस्मात् कारणात् ते नाविकाः दक्षिणपश्चिमर्तुवातसाहाय्येन गन्तुम् इच्छन्ति स्म । एतासां सुदूरदेश-यात्राणां कृते दृढयानानां निर्माणं क्रियते स्म ।

समुद्रतटवर्तिनि राज्यानि

एतस्य उपमहाद्वीपस्य दक्षिणभागे महान् तटीयः प्रदेशः अस्ति । एतस्मिन् बहवः पर्वताः प्रस्तराः नदीक्षेत्राणि च सन्ति । नदीनां समतलक्षेत्रेषु कावेरीनद्याः समीपस्थक्षेत्रं बहु उर्वरम् अस्ति । समतलक्षेत्राणां तटीयक्षेत्राणां च प्रान्तस्वामिनः नृपाः कालक्रमेण शनैः शनैः सम्पन्नाः शक्तिमन्तः च अजायन्त । संगमकवितासु *मुवेन्दारस्य* चर्चा उपलभ्यते । एषः कश्चित् तमिलशब्दः अस्ति अस्य अर्थः भवति "तीनमुखिया" इति अर्थात् त्रिमुख्याः इति । एतस्य प्रयोगः त्रयाणां शासकपरिवाराणां प्रमुखाणां कृते कृतः अस्ति । एते चोल-चेर-पाण्ड्याः च आसन् । (मानचित्रम्- ७,पृष्ठम् - ११३) एते प्रायः २३००वर्षेभ्यः पूर्वं दक्षिणभारते बहुशक्तिशालिनः इति मन्यन्ते स्म ।

एतेषां त्रयाणां प्रमुखाणां स्वस्य द्वे द्वे सत्ताकेन्द्रे आस्ताम् । एतयोः एकः तटीयभागे अपरः च अन्तर्भागे आसीत् । अनेन प्रकारेण षट्सु केन्द्रेषु द्वे अतीव महत्त्वपूर्णे केन्द्रे आस्ताम् । एतयोः एकः चोलानां पत्तनं पुहार इति आसीत् अथवा कावेरीपट्टिनम्, अपरं च पाण्ड्यानां राजधानी मदुरैनगरम् आसीत् ।

एते प्रमुखजनाः जनेभ्यः नियमितकरग्रहणस्य स्थाने उपहाराणां याचनां कुर्वन्ति स्म । कदाचित् एते सैनिकाभियानानि अपि सञ्चालयन्ति स्म । प्रमुखजनाः पार्श्वस्थेभ्यः स्थानेभ्यः राजस्वं गृहीत्वा आनयन्ति स्म । एतेषु किञ्चित् धनं ते स्वस्य पार्श्वे स्थापयन्ति स्म, अपरम् अवशिष्टं धनं ते स्वसमर्थकेषु सम्बन्धिषु सैनिकेषु कविषु च वण्टयन्ति स्म । अनेकैः सङ्गमकविभिः तेषां प्रमुखाणां प्रशंसायां कविताः लिखिताः, ये तेभ्यः कविभ्यः सम्मानरूपाणि बहुमूल्यरत्नानि सुवर्णं अश्वान् हस्तीनि रथान् सुन्दरवस्त्राणि च यच्छन्ति स्म ।

एतेषां चोलादिनृपाणां प्रायः २००वर्षाणां पश्चात् पश्चिमभारते सातवाहननामकस्य राजवंशस्य प्रभावः वर्धितः । सातवाहनानां प्रमुखतमः राजा गौतम्याः पुत्रः सातकर्णी आसीत् । एतस्मिन् विषये अस्माभिः तस्याः मातुः गौतमीबलश्रीद्वारा कृतदानाभिलेखात् ज्ञायते । सः अन्ये च सातवाहनशासकाः दक्षिणापथस्य स्वामिनः उच्यन्ते स्म । दक्षिणापथस्य शाब्दिकः अर्थः दक्षिणं प्रति गमनशीलः मार्गः भवति । सम्पूर्णस्य दक्षिणक्षेत्रस्य कृते अपि इदम् एव नाम प्रचलितम् आसीत् । श्रीसातकर्णी पूर्वपश्चिमदक्षिणतटेषु स्वसेनाः प्रेषितवान् ।

किं भवती ज्ञापयितुं शक्नोति यत् श्रीसातकर्णी तटेषु नियन्त्रणं किमर्थम् इच्छति स्म ?

रेशम-मार्गस्य कथा

बहुमूल्यत्वात् चित्रवर्णत्वात् भासत्वात् स्निग्धत्वात् कोमलस्पर्शत्वात् कौशेयवस्त्राणि अधिकांशतः समाजे बहुमूल्यानि इति मन्यन्ते । कौशेयवस्त्रनिर्माणस्य प्रक्रिया अपि जटिला अस्ति । कौशेयस्य कीटेभ्यः असंशोधितकौशेयं निष्कास्य सूत्रस्य कर्तनं भवति अपि च पुनः तेन वस्त्रं निर्मीयते वयते वा । कौशेयनिर्माणाभियान्त्रिकस्य आविष्कारः आदौ चीने प्रायः ७०००वर्षेभ्यः पूर्वम् अभवत् । एतस्य कौशेयस्य निर्माणप्रविधिं चीनदेशः सहस्राधिकानि वर्षाणि यावत् विश्वस्य अन्येभ्यः देशेभ्यः गोपयित्वा अतिष्ठत् । परन्तु पद्भ्याम् अश्वैः उष्ट्रैः वा केचन जनाः दूरदेशान् प्रति गच्छन्ति स्म अपि च आत्मना सह कौशेयवस्त्राणि अपि नयन्ति स्म । येन मार्गेण एते जनाः यात्रां कुर्वन्ति स्म सः रेशममार्गः इति नाम्ना विख्यातः जातः ।

सांच्याः स्तूपस्य अर्थात् स्मारकस्य कश्चित् मूर्तिचित्रम् अत्र वृक्षं तस्य अधस्तनं रिक्तम् आसनं च पश्यतु मूर्तिकारैः इदं बोधयितुं मूर्तिः खनित्वा विलिख्य वा रचिता यत् एतां मूर्तिं दृष्टवा जनाः बुद्धस्य ज्ञानप्राप्तेः विषये अवगच्छेयुः यत् एतस्य वृक्षस्य अधः उपविश्य ध्यानं च कृत्वा एव बुद्धः ज्ञानं प्राप्तवान् आसीत्।

कदाचित् चीनशासकाः ईरानस्य पश्चिमस्य एशियायाः च शासकानां कृते उपहाररूपेण दूकुलानि कौशेयवस्त्राणि च प्रेषयन्ति स्म। इतः कौशेयवस्त्राणां विषये संज्ञानं इतोऽपि पश्चिमे प्रसृतम्। प्रायः २०००वर्षेभ्यः पूर्वं रोमशासकानां धनाढ्यानां च मध्ये कौशेयवस्त्राणां धारणस्य प्रचलनं जातम्। एतेषां मूल्यम् बहु अधिकं भवति स्म। यतो हि चीनतः आनयने दुर्गमपर्वतमार्गेभ्यः रेगिस्तानिमार्गेभ्यः च भूत्वा गमनीयं भवति स्म। इदम् एव न मार्गस्य पार्श्वस्थाः जनाः व्यापारिभ्यः करं यात्राशुल्कं च याचन्ते स्म।

मानचित्रं 6 (पृष्ठसंख्या ८४-८५) इति पश्यतु। अत्र सिल्करूट् तथा तस्य शाखाः प्रदर्शिताः सन्ति। केचन शासकाः एतस्य महत्सु भागेषु नियन्त्रणं कर्तुं वाञ्छन्ति स्म। यतो हि अस्मिन् मार्गे यात्रां कुर्वद्भ्यः व्यापारिभ्यः ते शुल्कोपहारमाध्यमेन लाभं प्राप्नुवन्ति स्म। एतस्य कृते ते शासकाः एतेभ्यः व्यापारिभ्यः स्वराज्येन गमनकाले दस्यूनाम् आक्रमणेभ्यः रक्षन्ति स्म।

सिल्क-रूटादिवस्त्रेषु ये शासकाः नियन्त्रणं स्थापयन्ति स्म तेषु प्रसिद्धतमाः शासकाः कुषाणाः आसन्। प्रायः २०००वर्षेभ्यः पूर्वं मध्यैशियायां पश्चिमोत्तरभारते च एतेषां शासनम् आसीत्। पेशावरः मथुरा च एतेषां द्वे मुख्यशक्तिशालिनी केन्द्रे आस्ताम्। तक्षशिला अपि एतेषां राज्यस्य एव भागः आसीत्। एतेषां शासनकाले एव सिल्करूटस्य काचित् शाखा मध्यैशियातः भूत्वा सिन्धुनद्यः मुख्यपत्तनेषु गच्छति स्म। पुनः इतः वायुयानैः कौशेयपटः पश्चिमं प्रति रोमनसाम्राज्यं यावत् प्राप्नोति स्म। एतस्मिन् उपमहाद्वीपे आदौ सुवर्णमुद्रायाः प्रकाशयितृषु शासकेषु कुषाणाः आसन्। सिल्करूटयात्रिव्यापारिणः एतेषां उपयोगं कुर्वन्ति स्म।



सिल्कमार्गे वाहनानाम् उपयोगः किमर्थं कठिनं स्यात्।

चीनतः समुद्रमार्गेण अपि रेशमस्य निर्यातः भवति स्म। एतस्य षष्ठे मानचित्रे (८४-८५ इति पृष्ठयोः) अन्वेषणं करोतु। समुद्रमार्गेण कौशेयपटं प्रापयितुं कानि सौविध्यानि कानि च असौविध्यानि स्युः।

बौद्धधर्मस्य प्रचारः

कुषाणानां प्रसिद्धतमः शासकः कनिष्कः आसीत्। सः प्रायः १९००वर्षेभ्यः पूर्वं शासनम् अकरोत्। सः कस्यचित् बौद्धपरिषदः संघटनं कृतवान् यत्र सङ्घीभूय विद्वान्सः महत्त्वपूर्णविषयेषु विमर्शं चिन्तनं वा कुर्वन्ति स्म। बुद्धस्य जीवनचरित्रस्य लेखकः अश्वघोषः कनिष्कस्य राजसभायाम् आसीत्। अश्वघोषः अन्ये च बौद्धविद्वांसः अधुना संस्कृतेन लेखितुम् आरब्धवन्तः आसन्।

एतस्मिन् काले बौद्धधर्मस्य काचित् नूतनधारायाः महायान इत्यस्याः विकासः अभवत् । एतस्याः धारायाः मुख्यं विशेषताद्वयम् आसीत् । आदौ मूर्तिषु बुद्धस्य उपस्थितिः केवलं कैश्चित् सङ्केतैः च दर्श्यते स्म । उदाहरणरूपेण तैः तस्य निर्माणप्राप्तिः कस्मिंश्चित् अश्वत्थवृक्षस्य मूर्तिना दर्श्यते स्म परन्तु अधुना बुद्धस्य प्रतिमाः निर्मातुम् आरब्धवन्तः । एतासु आधिक्येन मथुरायां अपि च काश्चन तक्षशिलायां निर्मातुम् आरब्धाः ।

अपरं परिवर्तनं बोधिसत्त्वे आस्थाम् अभिलक्ष्य आगतम् । बोधिसत्त्वाः ते उच्यन्ते ये ज्ञानस्य प्राप्तेः पश्चात् एकान्ते वसन्तः ध्यानं साधनां च कर्तुं शक्नुवन्ति स्म । परन्तु एतत् कर्म अकृत्वा ते जनशिक्षणस्य साहाय्यस्य च कार्ये रुचिं स्वीकृतवन्तः अतः सांसारिकपरिवेशे एव ते स्थातुं निश्चितवन्तः। शनैः शनैः बोधिसत्त्वस्य पूजा अतीव लोकप्रिया अभवत् । अनेन प्रकारेण सम्पूर्णमध्यैशियां चीनदेशम् अपि च तदनन्तरं कोरियां जापानदेशं च यावत् विस्तारं प्राप्तवती ।

बौद्धधर्मस्य प्रचारः पश्चिमभारते दक्षिणभारते च अभवत् यत्र च बौद्धभिक्षूणां निवासाय पर्वतेषु अनेकाः गुहाः खनिताः निर्मिताः च ।

वामतः मथुरायां निर्मितबुद्धस्य कस्याश्चित् प्रतिमायाः चित्रम् ।
दक्षिणतः – तक्षशिलायां निर्मितायाः बुद्धस्य प्रतिमायाः किञ्चन चित्रम् ।
एतानि चित्राणि दृष्ट्वा वदन्तु यत् एतयोः मध्ये काः काः समानताः काः काः असमानताः च सन्ति ?

एतासु काश्चन गुहाः नृपाणां राजमहिषीणां च आदेशानुसारं निर्मिताः सन्ति काश्चन गुहाः वणिजैः कृषकैः च निर्मापिताः सन्ति । एतासु काश्चन गुहाः पश्चिमघाटस्य पत्तनानां समीपे निर्मिताः आसन् । दक्कनस्य नगराणि तटानां च समृद्धपोतस्थानकानि तानि योजयितुं च ये राजमार्गाः आसन् ते अपि एतेषु पत्तनेषु भूत्वा एव निर्गच्छन्ति स्म । इत्थं प्रतिभाति यत् वणिक्यात्रिणः एतासु गुहायुक्तमठेषु विश्रान्तुं तिष्ठन्ति स्म ।

बौद्धधर्मः दक्षिणपूर्वं प्रति श्रीलंका-म्यामांर-थाईलैण्ड-इण्डोनेशियासहितेषु दक्षिणपूर्वैशियायाः च अन्येषु भागेषु अपि प्रसृतः आसीत् । थेरवादनामक-बौद्धधर्मस्य आरम्भिकरूपम् एतेषु क्षेत्रेषु आधिक्येन प्रचलितम् आसीत् ।

शततमं पृष्ठम् एकवारं पुनः पठतु । किं भवती ज्ञापयितुं शक्नोति यत् बौद्धधर्मः एतेषु क्षेत्रेषु कथं विस्तारं प्राप्तवान् स्यात् ?

तीर्थयात्रिणां जिज्ञासा

व्यापारिणः समूहेषु तथा च समुद्रयानेषु दूरदेशान् यावत् गच्छन्ति स्म । बहवः तीर्थयात्रिणः अपि तैः सह यात्रार्थं गच्छन्ति स्म ।

तीर्थयात्रिणः

तीर्थयात्रिणः ते स्त्रीपुरुषाः भवन्ति, ये प्रार्थनायाः कृते पवित्रस्थानानां यात्रां कुर्वन्ति ।

कार्ले इत्यस्य गुहा, महाराष्ट्रम्

अअनेन एव प्रकारेण भारतस्य यात्रायाः कृते आगतः चीनदेशीयः बौद्धयात्री फा-शिएन इति बहुप्रसिद्धः अस्ति । सः प्रायः १६०० वर्षेभ्यः पूर्वम् आगतवान् । श्वैनत्सांगः १४०० वर्षेभ्यः पूर्वं भारतम् आगतवान् तस्य प्रायः ५० वर्षाणां पश्चात् इत्सिंगः भारतम् आगतवान् । ते सर्वे बुद्धसम्बद्धस्थानानि प्रसिद्धमठानि च द्रष्टुं भारतम् आगतवन्तः आसन् ।

एतेषु प्रत्येकं तीर्थयात्री स्वयात्रायाः वृत्तान्तं लिखितवान्। एतासु यात्रासु बहूनि वर्षाणि लगन्ति स्म। यान् देशान् मठान् च ते दृष्टवन्तः तेषां विषये ते लिखितवन्तः अपि च तेषां पुस्तकानां विषये अपि ते उल्लिखितवन्तः यत् यानि ते आत्मना सह तत्र नीतवन्तः आसन्।

फा-शिएनः चीनदेशं प्रति कथं प्रत्यागतवान्

फाशिएनः स्वगृहं चीनदेशं प्रतिगन्तुं स्वयात्रां बङ्गालतः आरब्धवान्। सः वणिजां कस्मिंश्चित् यानम् आरुढवान्। प्रायः ते दिनद्वयं यावत् एव चलितवन्तः आसन् यत् सहसा ते समुद्रीये झञ्झावाते आवृताः जाताः। वणिजः स्वजलयानस्य रक्षणाय तस्मिन् आरूढवस्तूनि तस्मात् अधः क्षेप्तुम् आरब्धवन्तः यत् जलयानं कथञ्चित् अल्पभारयुक्तं स्यात्। फाशिएनः अपि स्ववस्तूनि तत्र क्षिप्तवान् परन्तु सः आत्मना सङ्कलितपाण्डुलिपीः बुद्धस्य च मूर्तीः न क्षिप्तवान् याः सः भारते स्वयात्रायाः काले संङ्कलितवान् आसीत्। अन्ततः त्रयोदश दिनानां पश्चात् समुद्रीयझञ्झावातः विरामं गतः। सः यात्री समुद्रस्य वर्णनम् इत्थं कृतवान् अस्ति।

समुद्रः असीमः अस्ति – सूर्यचन्द्रताराकाणां च गतिम् अदृष्ट्वा इदं ज्ञानम् असम्भवम् अस्ति यत् पूर्वा दिक् कुत्र अस्ति अथवा पश्चिमा दिक् कुत्र वर्तते अर्थात् दिशाज्ञानं जटिलं भवति। यदि वर्षाकालः भवेत् अथवा तमः स्यात् तर्हि तु जलयानं वायोः प्रवाहे नेतव्यं भवति तदतिरिच्य अन्यः कोऽपि उपायः तत्र न भवति।

जावायां सः नवतेः दिनेभ्यः अपि अधिके समये प्राप्तवान्। तत्र सः पञ्चमासान् यावत् अतिष्ठत्। तदनन्तरं सः अपरं वणिक्यानं आरुढवान् तत् आरुह्य सः चीनं प्राप्तवान्।

षष्ठे मानचित्रे (पृष्ठम् 84-85) फाशिएनद्वारा निर्धारितमार्गम् अन्विष्यतु।

ज्ञापयतु यत् फा-शिएनः स्वपाण्डुलिपीः मूर्तीः च किमर्थं न क्षेप्तुम् इच्छति स्म।

श्वैनः त्सांगः भूमार्गेण चीनं प्रतिगतवान्। सः उत्तरपश्चिममध्यैशियायाः भूत्वा तत्र गतवान्। सः सुवर्णमयीं रजतमयीं चन्दनकाष्ठमयीं च बुद्धस्य प्रतिमाः तथा च षट्शताधिकाः पाण्डुलिपीः एकत्रीकृतवान् आसीत्। याः सः विंशतिघोटकेषु आरोहय्य नीतवान्। परन्तु तासु ५०पाण्डुलिपयः तदा लुप्ताः यदा सः सिन्धुनदीं पारं कुर्वन् आसीत् तदा तस्य नौः जले अधोमुखी जाता। स्वजीवनस्य अवशिष्टं कालं सः अवशिष्टपाण्डुलिपीनां संस्कृतानुवादकार्ये नियोजितवान्।

नालन्दा – शिक्षायाः कश्चित् विशिष्टं केन्द्रम्

श्वैनत्सांगः तथा च अन्ये तीर्थयात्रिणः तस्मिन् कालस्य प्रसिद्धतमे बौद्धविद्याकेन्द्रे नालन्दायां बिहारे अधीतवन्तः। सः नालन्दायाः विषये अनेन प्रकारेण लिखितवान्।

अत्रत्याः शिक्षकाः योग्यतादृष्ट्या बुद्ध्या च अग्रेसराः सन्ति। बुद्धस्य उपदेशानां ते सम्पूर्णतया सत्यनिष्ठया च पालनं कुर्वन्ति। मठस्य नियमाः बहुकठोराः सन्ति ये सर्वैः पालनीयाः भवन्ति। आदिनं तादृशाः वादाः विवादाः एव चलन्ति येषु युवजनाः वृद्धाः च परस्परं साहाय्यं कुर्वन्ति। विभिन्नेभ्यः नगरेभ्यः विद्वांसः अत्र स्वशङ्काः समाधातुम् आयान्ति। नूतनागन्तुकेभ्यः पूर्वं द्वारपालाः एव कठिनप्रश्नान् पृच्छन्ति। ते अन्तः प्रवेष्टुं तदा एव अनुमताः भवन्ति यदा ते द्वारपालस्य प्रश्नानां समीचीनम् उत्तरं दातुं पारयन्ति। दशसु सप्त अष्ट जनाः समीचीनानि उत्तराणि न दातुं प्रभवन्ति।

श्वैनत्सांगः नालन्दायां किमर्थं पिपठिषति स्म, कारणं ज्ञापयतु ?

भक्तेः आरम्भः

एतेषु दिनेषु देवीनां देवानां च पूजनस्य अपि प्रचलनम् आरब्धम् । अनन्तरकाले हिन्दूधर्मस्य एतत् प्रमुखं परिचयचिह्नम् अभूत् । एतेषु शिवविष्णुदुर्गासदृशाः देव्यः देवाः च सम्मिलिताः सन्ति ।

एतेषां देवानां-देवीनां च अर्चनं भक्तिभावेन क्रियते स्म । भक्तिः तस्मिन् काले पर्याप्तलोकपरम्परा जाता आसीत् । काम् अपि देवतां प्रति श्रद्धा एव भक्तिः इति उच्यते । भक्तेः मार्गः सर्वेषां कृते उद्घटितः आसीत् कामं सः धनी स्यात् अथवा निर्धनः स्यात् सः उच्चकुलीनः स्यात् अथवा निम्नकुले जातः स्यात् सा स्त्री स्यात् अथवा कश्चित् पुरुषः वा स्यात् ।

वराहस्य रूपेण विष्णुः । मध्यप्रदेशस्य एरणस्य इयं शोभनप्रतिमा विष्णोः वराहावतारस्य अस्ति । पुराणानाम् अनुसारं जलमग्नां पृथिवीं हिरण्याक्षात् रक्षितुं विष्णुः वराहावतारं धृतवान् आसीत् । अत्र पृथिवी कस्याश्चित् महिलायाः रूपेण दर्शिता अस्ति ।

भक्तेः मार्गस्य चर्चा हिन्दूनां पवित्रग्रन्थे भगवद्गीतायां कृता अस्ति । भगवद्गीता महाभारतस्य कश्चित् भागः अस्ति । द्वादशाध्याये पश्यतु । एतस्यां भगवान् कृष्णः स्वभक्तं मित्रं अर्जुनम् सर्वान् धर्मान्परित्यज्य तस्य शरणं गन्तुम् उपदिशति । यतोहि कृष्णः एव अर्जुनं सर्वपापेभ्यः मोक्तुं शक्नोति । पूजायाः एतत् रूपं शनैः शनैः देशस्य विभिन्नभागेषु प्रसृतम् ।

भक्तिमार्गसाधकाः कपटतापूर्णाचरणं परित्यज्य ईश्वरं प्रति लग्नशीलतया वैयक्तिकरूपेण च पूजायां बलाघातं कुर्वन्ति स्म ।

भक्तिमार्गसाधकानाम् इयं मान्यता अस्ति यत् यदि ते स्वाराध्यदेव्याः देवस्य वा अनन्यमनस्काः भूत्वा पूजां कुर्युः तर्हि सा देवी अथवा देवः तेभ्यः तस्मिन् एव स्वरूपे दर्शनं दास्यति यस्मिन् स्वरूपे भक्तः दर्शनम् इच्छति । अतः आराध्यदेवी देवः वा मानवस्य रूपेण अपि भवितुम् अर्हति अथवा पुनः सिंहस्य वृक्षस्य वा अन्येन केनापि रूपेण भवितुम् अर्हति । यथा यथा एनं विचारं समाजः अङ्गीकृतवान् कलाकाराः शिल्पिनः वा देवीदेवानां उत्कृष्टात्युत्कृष्टाः शोभनाः प्रतिमाः निर्मातुं सज्जीकर्तुम् च आरब्धवन्तः ।

भक्तिः

भक्तिः इति शब्दः भज्-धातोः निष्पन्नः अस्ति यस्य अर्थः विभाजनम् अथवा सेवनं भवति । एतस्य अर्थः अयम् अस्ति यत् भक्तिः भगवान् भक्तस्य च मध्ये परस्परं कश्चित् अन्तरङ्गसम्बन्धः अस्ति । भक्तिः भगवन्तं प्रति नमनम् श्रद्धाभावः वा अस्ति । भगवतः अर्थः अयम् अपि अस्ति यत् यः स्वैश्वर्यं सुखं च भक्तेषु विभाजयति । अर्थात् भक्तः स्वभगवतः अथवा देव्यः देवतायाः च ऐश्वर्यस्य सुखस्य वा अधिकारी भवति ।

केनचित् भक्तेन लिखिता कविता

अधिकांशतः भक्तिसाहित्यानि अस्मान् एतत् एव बोधयन्ति यत् धनेन ऐश्वर्येण उच्चपदेन वा कदाचित् अपि ईश्वरेण सह आत्मीयभावः न स्थापयितुं शक्यते । प्रायः १४००वर्षेभ्यः पूर्वं शिवभक्ताप्पारद्वारा तमिलभाषया लिखितकवितायाः कश्चित् अंशः अत्र अस्ति । अप्पारः कश्चित् बेल्लालः(अध्यायः -९) आसीत् ।

नष्टप्रायः अङ्गयुक्तः कुष्ठरोगी

ब्राह्मणानां दृष्टौ निम्नजातीयः जनः

अवकरादिकं सङ्गृह्य जीविकाचालकः मनुष्यः,

यदि एते जनाः अपि गङ्गाधरस्य शिवस्य दासाः भवेयुः तर्हि अहं तान् आराधयिष्यामि ।

यतो हि ते मम ईश्वरसमाः सन्ति ।

कविः सामाजिकप्रतिष्ठा-भक्त्योः काम् अधिकं महत्त्वं ददाति ?

देवीदेवानां च विशेषरूपेण सम्माननं भवति स्म । अतः विशिष्टेषु स्थानेषु एव एतासां मूर्तयः स्थाप्यन्ते स्म । एतानि स्थानानि एव मन्दिराणि इति उच्यन्ते । द्वादशाध्याये भवती एतेषां मन्दिराणां विषये पठिष्यति ।

भक्तिपरम्परायां चित्रकलायाः शिल्पकलायाः स्थाप्यकलायाः च माध्यमेन अभिव्यक्तेः प्रेरणा प्रदत्ता अस्ति ।

हिन्दुः

हिन्दु इति शब्दः इण्डियाशब्दस्य इव सिन्धोः अथवा इण्डसतः निष्पन्नः अस्ति । अयं शब्दः अरबदेशीयैः ईरानदेशीयैः च तेषां जनानां कृते उपयुज्यते स्म, ये सिन्धुनद्याः पूर्वस्मिन् भागे निवसन्ति स्म । अयम् एव शब्दः तेषां धार्मिकविश्वासानां परम्पराणां च कृते प्रयुज्यते स्म ।

अन्यत्र

प्रायः २०००वर्षेभ्यः पूर्वं पश्चिमैशियायां ईसाईधर्मस्य प्रादुर्भावः अभवत् । ईसामसीहस्य जन्म बेथलेहमस्थले अभवत्, यः तस्मिन् काले रोमनसाम्राज्यस्य भागः आसीत् । ईसामसीहः आत्मानम् अस्य संसारस्य उद्धारकम् इति उक्तवान् । सः उपदिष्टवान् यत् अस्माभिः अन्येषु स्नेहः करणीयः अपि च अपरेषु विश्वासः करणीयः यथा प्रत्येकं मनुष्यः अन्येभ्यः अपि स्नेहस्य विश्वासस्य च अपेक्षां करोति ।

बाइबिलमध्ये ईसामसीहस्य उपदेशस्य वृत्तान्ताः लिखिताः सन्ति । अत्र ततः उद्धृतः कश्चित् अंशः अस्ति –

धन्याः ते जनाः ये धर्मस्य न्यायस्य च कृते क्षुधार्ताः तृषार्ताः च तिष्ठन्ति,
तेषां कामनाः पूर्तिं गमिष्यन्ति ।
ये दयालवः सन्ति, ते धन्याः सन्ति, यतो हि ते दयापात्राणि भविष्यन्ति ।
धन्यास्ते जनाः ये हृदयेन पवित्राः सन्ति,
यतो हि ते ईश्वरस्य दर्शनं कर्तुं शक्ष्यन्ति ।
धन्यास्ते जनाः ये शान्तिं स्थापयन्ति,
ते एव ईश्वरसन्तत्यः इति ख्यातिं प्राप्स्यन्ति ।

ईसामसीहस्य उपदेशाः जनेभ्यः अरोचन्त, कालक्रमेण एते पश्चिमैशियायाम् अफ्रीकायां यूरोपे च प्रसरितवन्तः। ईसामसीहस्य मृत्योः शतं वर्षाणाम् आभ्यन्तरे एव भारतीयोपमहाद्वीपस्य पश्चिमतटे पूर्वम् एव ईसाईधर्मप्रचारकाः पश्चिमैशियातः आगतवन्तः ।

षष्ठं मानचित्रं (पृष्ठम् 84-85) पश्यतु अपि च तत्र अन्विष्यतु यत् केन मार्गेण ईसाईधर्मप्रचारकाः भारतम् आगतवन्तः स्युः ?

केरलस्य ईसाईजनाः सिरियायी ईसाईजनाः इति उच्यन्ते यतो हि सम्भवतः ते पश्चिमैशियातः आगतवन्तः आसन् ते विश्वस्य प्राचीनेषु ईसाईजनेषु अन्यतमाः सन्ति ।

कल्पयतु

भवत्याः पार्श्वे काचित् पाण्डुलिपिः अस्ति यां कश्चित् चीनदेशीयः तीर्थयात्री आत्मना सह नेतुम् इच्छति । तेन सह स्ववार्तालापस्य वर्णनं करोतु ।

उपयोगिशब्दः

व्यापारी
मुवेन्दारः=शासकपरिवारत्रयम्
मार्गः,
कौशेयम्,
कुषाणः
महायानम्
बोधिसत्त्वः
थेरवादः
तीर्थयात्री
भक्तिः

आगच्छन्तु स्मरणं कुर्मः

१. निम्नलिखितस्य उपयुक्तयुग्मान् रचयतु

दक्षिणापथस्य स्वामिनः	बुद्धचरितम्
मुवेन्दारः	महायान-बौद्ध-धर्मः
अश्वघोषः	सातवाहनशासकः
बोधिसत्त्वः	चीनदेशीयः यात्री
श्वैनत्सांगः	चोलः चेरः पाण्ड्यः

२. राजानः सिल्करूटस्य उपरि स्वस्य नियन्त्रणं किमर्थं स्थापयितुम् इच्छन्ति स्म ?

३. वाणिज्यस्य व्यापारिकमार्गाणां च विषये इतिहासकाराः केषां केषां साक्ष्याणाम् उपयोगं कुर्वन्ति ?

४. भक्तेः प्रमुखविशेषताः काः काः आसन् ?

आगच्छन्तु चर्चां कुर्मः

५. चीनदेशीयाः तीर्थयात्रिणः भारतं किमर्थम् आगतवन्तः आसन् ? कारणं वदन्तु ।

६. साधारणजनानां भक्तिं प्रति आकर्षणस्य किं कारणं भवति ?

आगच्छन्तु कृत्वा पश्याम



७. भवती विपणितः कानि कानि वस्तूनि क्रीणाति तेषां सूचीं निर्मातु । वदन्तु यत् भवती यस्मिन् नगरे अथवा ग्रामे निवसति तत्र कानि कानि वस्तूनि निर्मितानि आसन् अपि च कानि वस्तूनि वणिजाः बहिष्ठात् आनीतवन्तः आसन् ?

८. अद्य भारते जनाः अनेकाः तीर्थयात्राः कुर्वन्ति । तासु कस्याश्चित् एकस्याः विषये जानातु तथा च संक्षिप्तं विवरणं यच्छतु । (सङ्केतः – तीर्थयात्रायां स्त्रीपुरुषबालेषु के गन्तुं शक्नुवन्ति ? अत्र कियान् कालः अपेक्षते ? जनाः कथं यात्रां कुर्वन्ति ? ते यात्राकाले आत्मना सह कानि कानि वस्तूनि नयन्ति ? तीर्थानि प्राप्य ते किं कुर्वन्ति ? किं ते ततः प्रत्यागमनकाले आत्मना सह किमपि आनयन्ति ?

इति दशमोऽध्यायः

काञ्चन महत्त्वपूर्णतिथयः

- कौशेयनिर्माणस्य कलायाः अन्वेषणम् (प्रायः ७००० वर्षेभ्यः पूर्वम्)
- चोलचेरपाण्ड्याः (प्रायः २३०० वर्षेभ्यः)
- रोमनसाम्राज्ये कौशेयस्य वर्धितयाचना(प्रायः २००० वर्षेभ्यः पूर्वम्)
- कुषाणशासकः कनिष्कः (प्रायः १९०० वर्षेभ्यः प्राक्)
- फा-शिएनस्य भारतं प्रति आगमनम् (प्रायः १६०० वर्षेभ्यः पूर्वम् ।
- श्वैनत्सांगस्य भारतयात्रा, अप्पारस्य शिवस्तुतिरचना (प्रायः १४०० वर्षेभ्यः पूर्वम्)

अध्यायः 11

नूतनसाम्राज्यानि राज्यानि च

अरविन्दः नृपः सञ्जातः

अरविन्दः स्वविद्यालये अभिनीयमाने नाटके नृपस्य भूमिकां निर्वोढुं चितः। सः चिन्तितवान् आसीत् यत् सः राजवेशं धृत्वा श्मश्रूणि अलङ्कुर्वन् विशिष्टे असिपुटके असिं विशिष्टया धारयन् चलिष्यति। क्षणं चिन्तयन्तु सः कियान् आश्चर्यचकितः स्यात् । यदा सः बोधितः यत् तेन उपविश्य वीणावादनं करणीयं भविष्यति । कवितापाठः च करणीयः भविष्यति । कश्चित् संगीतज्ञः नृपः? कः भवितुं शक्नोति सः? अरविन्दः चिन्तयितुं आरब्धवान्।

प्रशस्तयः किं बोधयन्ति

वस्तुतः अरविन्दः गुप्तवंशस्य प्रसिद्धनृपस्य समुद्रगुप्तस्य अभिनयं कर्तुम् उद्युक्तः आसीत् । समुद्रगुप्तस्य विषये वयं इलाहाबादस्थे अशोकस्तम्भे विलिखितेन दीर्घाभिलेखेन जानीमः । एतस्य रचना समुद्रगुप्तस्य राजसभायां कविः मन्त्रिभूतेन हरिषेणेन कस्यचित् काव्यस्य रूपेण कृता आसीत्।

अयं कश्चित् विशिष्टप्रकारकः अभिलेखः अस्ति। या प्रशस्तिः इति कथ्यते। अयं कश्चित् संस्कृतशब्दः अस्ति यस्य अर्थः प्रशंसा भवति । प्रशस्ति-लेखनस्य प्रचलनं पुराकाले अपि आसीत् । भवता दशमाध्याये गौतमीपुत्रस्य श्रीसातकर्णिनः प्रशस्तेः विषये पठितम्। परन्तु गुप्तकाले एतेषां महत्वम् इतोऽपि वर्धितम्।

समुद्रगुप्तस्य प्रशस्तिः

आगच्छतु पश्यामः, समुद्रगुप्तस्य प्रशस्तिः अस्मान् किं बोधयति। कविः अत्र नृपस्य कस्यचित् योद्धृरूपेण अपि च युद्धजेतृरूपेण, विदुषः उत्कृष्टकविरूपेण च भूरिशः प्रशंसां कृतवान् अस्ति। सः ईश्वरतुल्यः इति उक्तः। प्रशस्त्यां दीर्घाणि दीर्घाणि वाक्यानि प्रदत्तानि सन्ति। अत्र तादृशः एव कश्चित् वाक्यांशः प्रदत्तः अस्ति।

योद्धा समुद्रगुप्तः

यस्य शरीरं युद्धक्षेत्रे कुठारैः परशुभिः बाणैः कुन्तैः असिभिः लोहगदाभिः तीक्ष्णबाणैः तथा च अन्यैः शताधिकैः शस्त्रैः व्रणितं सत् अपि अत्यन्तं सुन्दरं प्रतिभाति।

तस्य विषये इदं वर्णनं भवन्तं किं ज्ञापयति ? राजानः केन प्रकारेण युद्ध्यन्ते स्म ?

यदि भवान् सप्तमं मानचित्रं (पृष्ठ 113) ध्यानेन पश्येत् तर्हि भवान् ज्ञास्यति यत् कश्चित् क्षेत्रं हरितरङ्गेण रञ्जितम् अस्ति । भवान् पूर्वेण समुद्रतटेन सममेव एकस्मिन् क्रमे रक्तबिन्दून् द्रक्ष्यति । तेन एव प्रकारेण कानिचन क्षेत्राणि वृन्ताकवर्णेन नीलवर्णेन च अपि वर्णितानि भविष्यन्ति ।

इदं मानचित्रम् अस्याः प्रशस्तेः प्राप्तसूचनानाम् आधारेण निर्मितम् अस्ति । हरिषेणः चतुरः विभिन्नप्रकारकान् राज्ञः प्रति समुद्रगुप्तस्य नीतीनां वर्णनं करोति ।

१. मानचित्रे हरितवर्णयुक्तक्षेत्रम् आर्यावर्त्तस्य तेषां नवानां शासकानाम् अस्ति, यान् समुद्रगुप्तः पराजित्य तेषां राज्यानि स्वस्य साम्राज्ये मेलितवान् आसीत् ।

२. तदनन्तरं दक्षिणापथस्य द्वादशशासकाः आयान्ति । एतेषु केषाञ्चित् राजधानीः दर्शयितुं मानचित्रे रक्तबिन्दवः प्रदत्ताः सन्ति । एते सर्वे पराजिताः राजानः समुद्रगुप्तस्य पुरतः समर्पणं कृतवन्तः आसन् । समुद्रगुप्तः तान् पुनः अनुशास्तुं आज्ञापितवान् ।

३. प्रतिवेशि-राष्ट्राणाम् आन्तरिकः भागः वृन्ताकवर्णेन रञ्जितः अस्ति । एतस्मिन् असमस्य तटीयबंगालस्य नेपालस्य उत्तरपश्चिमयोः च अनेके गणाः संघाः च परिगण्यन्ते स्म । (षष्ठाध्यायं स्मरन्तु) । एते समुद्रगुप्तस्य कृते उपायनानि आनयन्ति स्म । तस्य समुद्रगुप्तस्य आज्ञानां च पालनं कुर्वन्ति स्म । तथा च तेषां राजसभायाम् उपस्थिताः भवन्ति स्म ।

४. बाह्यक्षेत्रस्य शासकाः ये नीलवर्णेन वर्णिताः सन्ति, सम्भवतः कुषाणवंशस्य शकवंशस्य च आसन् । एतेषु श्रीलङ्कायाः शासकाः अपि आसन् । ते शासकाः समुद्रगुप्तस्य अधीनतां स्वीकृतवन्तः, अपि च स्वपुत्रीणां विवाहं तेन समुद्रगुप्तेन सह कारितवन्तः ।

मानचित्रे प्रयागं (इलाहाबादस्य पुरातनं नाम) उज्जैनं पाटलिपुत्रं च अन्विष्यतु । एतानि क्षेत्राणि गुप्तशासकानां महत्त्वपूर्णकेन्द्राणि आसन् ।

आर्यावर्त्तस्य दक्षिणापथस्य च राज्यैः सह समुद्रगुप्तस्य व्यवहारे का भिन्नता आसीत् ?

किम् एतस्याः भिन्नतायाः पृष्ठे भवान् किमपि कारणं पश्यति ?

वीणावादकः राजा समुद्रगुप्तस्य केचन गुणाः मुद्रासु टङ्किताः सन्ति यथा एतस्यां मुद्रायां सः वीणां वादयति।



वंशावलयः

अधिकांश-प्रशस्तयः शासकानां पूर्वजानां विषये अपि बोधयन्ति । इदं प्रशस्तिः अपि समुद्रगुप्तस्य प्रपितामहस्य पितामहस्य पितुः मातुः च विषये वर्तते । तस्य माता कुमारदेवी लिच्छविगणस्य आसीत्, पिता च गुप्तवंशस्य प्रथमशासकः आसीत्, यः महाराजाधिराजसदृशम् उपाधिं धृतवान् । समुद्रगुप्तः अपि अमुम् उपाधिं धृतवान् । तस्य पितामहस्य प्रपितामहस्य च महाराजस्य रूपेण उल्लेखः अस्ति । इतः ऊह्यते यत् शनैः शनैः एतस्य वंशस्य महत्त्वं वर्धितम् ।

एताः उपाधीः महत्त्वदृष्ट्या अङ्कलकरोतु। राजा महाराज-अधिराजः, महाराजा च इति क्रमः स्यात्।

समुद्रगुप्तस्य विषये वयं तस्य अनन्तरकालीनेभ्यः शासकेभ्यः यथा तस्य पुत्रस्य चन्द्रगुप्तद्वितीयस्य वंशावल्याः अपि सूचनाः प्राप्तुं शक्नुमः। तस्य विषये अभिलेखेभ्यः मुद्राभ्यः च अपि ज्ञायते । ते पश्चिमभारते सैन्याभियाने अन्तिमं शकशासकं पराजितवन्तः । अनन्तरकाले एतादृशः विश्वासः सर्वत्र जातः यत् तेषां राजसभा विद्वद्भिः पूर्णा आसीत्। कविकालिदासः खगोलशास्त्र्यार्यभट्टः च तस्य एव राजसभायाम् आस्ताम्। तेषां विषये आधिक्येन ज्ञानं द्वादशाध्याये लप्स्यते।

हर्षवर्धनः हर्षचरितं च

यथा गुप्तवंशस्य शासकानां विषये अभिलेखैः मुद्राभिः च ज्ञानं भवति, तेन एव प्रकारेण अन्यशासकानां विषये अपि तेषां जीवनचरित्रं पठित्वा ज्ञानं भवति । एतादृशः एव राजा हर्षवर्धनः आसीत् । सः प्रायः १४००वर्षेभ्यः पूर्वं शासनं कृतवान् । तस्य राजकविः बाणभट्टः संस्कृतेन तस्य जीवनचरित्रं हर्षचरितम् लिखितवान् । तस्मिन् ग्रन्थे हर्षवर्धनस्य वंशावलीं प्रयच्छन् तस्य सिंहासनारोहणपर्यन्तस्य वर्णनम् अपि अकरोत्। चीनदेशीयः यात्री स्वैनत्सांगः यस्य विषये भवान् दशमाध्याये पठितवान्, सः चिरकालं यावत् हर्षस्य राजसभायाम् अतिष्ठत्। सः तत्र यत्किमपि अपश्यत्। तद्विषयकं विस्तृतवर्णनम् अकरोत्।

हर्षः स्वपितुः ज्येष्ठतमः पुत्रः न आसीत्। पितुः ज्येष्ठभ्रातुः च मृत्योः पश्चात् सः थानेसरस्य शासकः जातः। तस्य आवुत्तः कन्नौजस्य (सप्तममानचित्रम्, पृष्ठम् ११३) शासकः आसीत्। यदा बङ्गालस्य शासकः तं हतवान्, तदा हर्षः कन्नौजे स्वाधिपत्यम् स्थापितवान्। एवं च बङ्गालस्य उपरि आक्रमणम् अकरोत्।

मगधं बङ्गालं च विजित्य सः पूर्वस्मिन् भागे यावत् साफल्यम् अवाप्तवान्, अन्येषु स्थानेषु सः तथाविधं साफल्यं न अवाप्तवान्। यदा सः नर्मदानद्याः पारे गत्वा दक्कनं प्रवेष्टुं प्रयासम् अकरोत् । तदा तत्र चालुक्यनरेशः पुलकेशिन-द्वितीयः तं रुद्धवान्।

अष्टमं मानचित्रं (पृष्ठम् १३६) पश्यतु सूचीं च करोतु यत् यदा हर्षवर्धनः (क) बङ्गालं ख)नर्मदां यावत् गतवान् स्यात् तदा वर्तमानकालस्य केभ्यः केभ्यः राज्येभ्यः भूत्वा गतवान् स्यात् ?

पल्लवस्य चालुक्यस्य पुलकेशिनद्वितीयस्य च प्रशस्तयः

एतस्मिन् काले पल्लवः चालुक्यः च दक्षिणभारतस्य महत्वपूर्णौ राजवंशौ आस्ताम्। पल्लवानां राज्यं तेषां राजधानी कांचीपुरस्य पार्श्वस्थेभ्यः स्थानेभ्यः आरभ्य

कावेरीनद्याः पुलिनं यावत् प्रसृतम् असीत्, यद्यपि चालुक्यानां राज्यं कृष्णातुङ्गभद्रानद्योः मध्ये स्थितम् आसीत्।

चालुक्यानां राजधानी ऐहोलः आसीत् । इदं कश्चित् प्रमुखं व्यापारिककेन्द्रम् आसीत् (मानचित्रम्–७, पृष्ठम्–११३) । शनैः शनैः इदं कश्चित् धार्मिककेन्द्रं सञ्जातम्, यत्र अनेकानि मन्दिराणि आसन्। पल्लवाः चालुक्याः च परस्परम् अन्योऽन्येषां सीमासु अतिक्रमणं कुर्वन्ति स्म। मुख्यरूपेण राजधानीनाम् उपरि आक्रमणं क्रियते स्म। यतो हि राजधानीरूपाणि तानि नगराणि समृद्धानि आसन्।

पुलकेशिनद्वितीयः प्राचीनतमः चालुक्यराजा आसीत् । तस्य विषये वयं तस्य राजसभाकविना रविकीर्तिद्वारा रचितया प्रशस्त्या जानीमः। एतस्यां तस्य पूर्वजानां विषये विशेषतया वंशचतुष्टयस्य विषये ज्ञापितम् अस्ति । पुलकेशिनद्वितीयः स्वपितृव्यात् इदं राज्यं प्राप्तवान् आसीत्।

रविकीर्तेः अनुसारं सः हर्षवर्धनः पूर्वपश्चिमयोः द्वयोः समुद्रतटीययोः क्षेत्रयोः अभियानं चालितवान्। एतदतिरिच्य सः हर्षम् अपि वर्धनात् रुद्धवान्। हर्षस्य अर्थः आनन्दः भवति। कवेः कथनम् अस्ति यत् एतस्य पराजयस्य पश्चात् हर्षे अधुना 'हर्षः' न अतिष्ठत् । पुल्लकेशिनद्वितीयः पल्लवराज्ञः उपरि अपि आक्रमणं कृतवान्, यः कांचीपुरस्य भित्तेः पृष्ठे शरणं गृहीतुं बाध्यः जातः।

परन्तु चालुक्यानां विजयः अल्पकालीना आसीत्। युद्धेन द्वौ वंशौ कालक्रमेण दुर्बलौ जातौ। पल्लवाः चालुक्याः च अन्ततः राष्ट्रकूटैः चोलवंशीयैः च समाप्तिं नीताः। एतेषां विषये भवन्तः सप्तमकक्षायां पठिष्यन्ति।

ते अन्ये के शासकाः आसन् ये तटेषु स्वनियन्त्रणं चिकीर्षन्ति स्म ?

(दशमाध्याये पश्यतु)

एतेषां राज्यानां प्रशासनं कथं चलति स्म ?

पूर्वेषां नृपाणाम् इव एतेषां नृपाणां कृते अपि भूमिराजस्वं महत्तमं साधनम् आसीत्। प्रशासनस्य प्राथमिकघट्टाः ग्रामाः भवन्ति स्म । परन्तु शनैः शनैः अनेकानि नूतनानि परिवर्तनानि अपि जातानि । राजानः आर्थिकसामाजिक-राजनैतिक-सैन्यशक्ति-स्थापकजनानां समर्थनं ग्रहीतुं नैकान् प्रयासान् कृतवन्तः। उदाहरणरूपेण –

- कानिचन महत्त्वपूर्णानि प्रशासकीयपदानि आनुवांशिकानि जातानि अर्थात् पुत्राः स्वकीयस्य पितुः पदम् अलङ्कुर्वन्ति स्म, यथा कविहरिषेणः स्वपितुः इव महादण्डनायकस्य पदम् अलङ्कुर्वन् मुख्यन्यायाधिकारी आसीत्।
- कदाचित् एकः एव जनः अनेकेषु पदेषु कार्यं करोति स्म यथा हरिषेणः कश्चित् महादण्डनायकत्वेन सह एव कुमारामात्यः अर्थात् कश्चित् महत्त्वपूर्णमन्त्री

आसीत्, कश्चित् सन्धि-विग्रहिकः अर्थात् युद्धस्य शान्तिविषयाणाम् अपि मन्त्री आसीत्।

- सम्भवतः तत्रत्ये स्थानीये प्रशासने प्रमुखजनानां महान् समादरः आसीत्। एतेषु जनेषु नगरश्रेष्ठी अर्थात् मुख्यवित्तकोशीयः, नगरस्य वणिक्, सार्थवाहः अर्थात् वणिजां समूहस्य नेता, प्रथम-कुलिकः अर्थात् मुख्यशिल्पकारः, कायस्थानां अर्थात् लिपिकानां प्रधानसदृशाः जनाः च भवन्ति स्म।

एतादृश्यः नीतयः प्रायः किञ्चिद् अंशं यावत् प्रभावशालिन्यः भवन्ति स्म परन्तु कालक्रमेण एताभिः केचन जनाः एतावन्तः अधिकाः महत्त्वशालिनः भवन्ति स्म यत् ते स्वकीयं स्वतन्त्रराज्यं स्थापयन्ति स्म।

विचिन्य वदतु यत् अधिकारिणां पदानि यदि आनुवांशिकानि भवेयुः तर्हि तत्र के के लाभाः काश्च हानयः भवितुं शक्नुवन्ति स्म ?

काचित् नूतना सेना

केचन राजानः अधुना अपि पुरातननृपाः इव सुसङ्घटितसेनां स्थापयन्ति स्म। यस्यां हस्तिनः रथाः अश्वारोहिणः पदातिसैनिकाः च भवन्ति स्म, परन्तु एतैः साकं केचन सेनानायकाः अपि भवन्ति स्म, ये आवश्यकतायां सत्यां राज्ञः कृते सैन्यसाहाय्यं प्रयच्छन्ति स्म। एतेभ्यः सेनानायकेभ्यः कश्चन नियमितवेतनं न दीयते स्म। परिवर्ते प्रतिदाने वा एतेषु केभ्यश्चित् भूमिदानं दीयते स्म। दत्तभूमेः एते करं राजधनं वा स्वीकुर्वन्ति स्म, येन ते अश्वानां सेनानां च पालनं कुर्वन्ति स्म। सममेव ते अनेन भूमिदानेन युद्धाय शस्त्राणाम् अपि व्यवस्थां कुर्वन्ति स्म। एतादृशाः जनाः सामन्ताः इति उच्यन्ते स्म। यत्र कुत्रापि शासकाः दुर्बलाः भवन्ति स्म, एते सामंताः स्वतन्त्रीभवितुं प्रयासं कुर्वन्ति स्म।

दक्षिणेषु राज्येषु सभाः

पल्लवानाम् अभिलेखेषु अनेकासां स्थानीयसभानां चर्चा अस्ति। एतासु काचित् एका आसीत् ब्राह्मणभूस्वामिनां सङ्घटनम्, या *सभा* इति उच्यते स्म। एताः सभाः उपसमितीनां माध्यमेन सेचनकार्यस्य कृषि-सम्बद्ध-कार्याणां राजमार्ग-निर्माण-कार्याणां स्थानीय-मन्दिराणां च निरीक्षणं कुवन्ति स्म। येषु क्षेत्रेषु भूस्वामिब्राह्मणाः न आसन्, तत्र उरनामकस्य ग्रामसभायाः वार्ता कृता अस्ति। नगरम इति वणिजां सङ्घटनस्य नाम आसीत्। सम्भवतः एतासु सभासु धनिकानां शक्तिशालिभूस्वामिनां वणिजां च नियन्त्रणं भवति स्म। एतासु बह्व्यः स्थानीयसभाः शताब्दान् यावत् कार्यं कृतवत्यः।

तस्मिन् काले सामान्यजनाः

जनसाधारणस्य जीवनस्य किंचित् दृश्यं वयं नाटकेभ्यः केभ्यश्चित् अन्येभ्य स्रोतोभ्यः च अपि उपलभामहे। इदानीं एतादृशस्य जीवनस्य कानिचन उदाहरणानि पश्यामः।
कालिदासः स्वनाटकेषु राजसभा-जीवनस्य चित्राङ्कनाय प्रसिद्धः अस्ति । एतेषु नाटकेषु रोचकं तथ्यम् इदम् अस्ति, यत् राजानः तात्कालीनाः ब्राह्मणाः च परस्परं संस्कृतेन सम्भाषमाणाः दर्शिताः सन्ति । अपरञ्च अन्ये जनाः महिलाः च प्राकृतभाषया भाषमाणाः दर्शिताः सन्ति । तस्य कालिदासस्य प्रसिद्धतमं नाटकम् अभिज्ञानशाकुन्तलम् अस्ति । अस्मिन् नाटके दुष्यन्तनामकस्य कस्यचित् नृपस्य शकुन्तलानामधेयायाः कस्याश्चित् युवत्याः च प्रेमकथा वर्णिता अस्ति। एतस्मिन् नाटके केनचित् निर्धनधीवरेण सह राजकर्मचारिणां दुर्व्यवहारस्य अपि चित्रणम् अस्ति।

कश्चित् धीवरः शकुन्तलायाः अङ्गुलीयकं प्राप्तवान्

कश्चित् धीवरः बहुमूल्यकम् एकम् अङ्गुलीयकं प्राप्तवान्। इदम् अङ्गुलीयकं राजा दुष्यन्तः शकुन्तलायै उपहारस्वरूपं दत्तवान् आसीत्, परन्तु दुर्घटनावशात् काचित् मत्स्यी तत् निगीर्णवती। यदा धीवरः अङ्गुलीयकं स्वीकृत्य प्रासादं प्राप्तवान्, तदा द्वारपालः तस्य उपरि चौर्यस्य आरोपम् आरोपितवान्। मुख्यारक्षकाधिकारी अपि तेन सह दुर्व्यवहारं कृतवान्। नृपः एतत् अङ्गुलीयकं दृष्ट्वा बहुप्रसन्नः अभवत्। सः धीवराय पारितोषिकं दत्तवान्। आरक्षकः द्वारपालः च धीवरेण सह तस्य पारितोषिकस्य किंचित् भागम् अपहर्तुं मद्यशालां गतवन्तौ।
अद्य यदि कश्चित् निर्धनः किमपि प्राप्नोति आरक्षकान् च सूचयति तर्हि किं तेन सह अपि एतादृशः एव व्यवहारः भविष्यति ?
कस्यचित् प्रसिद्धजनस्य नाम वदतु, यः प्राकृतभाषया उपदिष्टवान्। अपि च कस्यचित् नृपस्य नाम वदतु यः प्राकृतभाषया स्वाभिलेखान् लेखितवान् । सप्तमाध्यायम् अष्टमाध्यायं च पश्यतु।)

चैनिकः तीर्थयात्री फाशिएनवर्यः तेषां जनानां दुर्गतौ अपि अवधानं कृतवान्, यान् उच्चवर्गीयाः शक्तिशालिनः च जनाः अस्पृश्यान् मन्यन्ते स्म । तैः नगरात् बहिः स्थातव्यं भवति स्म । सः फाशिएनवर्यः लिखति- "यदि एतैः जनैः नगरं विपणिं वा प्रवेष्टव्यं भवति स्म तर्हि अन्यान् सर्वान् सूचयितुं भूमौ काष्ठप्रहाराःकरणीयाः भवन्ति स्म । येन एतं ध्वनिं श्रुत्वा जनाः सावधानं भूत्वा कथमपि अस्पृश्येन सम्पर्कः मा भूत् इति जागरूकतया आत्मनः रक्षां कुर्वन्ति स्म"।
एकस्मिन् स्थाने बाणभट्टद्वारा गताभियानायाः नृपसेनायाः अत्यन्तं सजीवचित्रणं कृतम् अस्ति।

नृपस्य सेना

राजानः व्यापकमात्रया उपयोगीनि वस्तूनि गृहीत्वा यात्रां कुर्वन्ति स्म । यत्र शस्त्राणि अतिरिच्य दैनन्दिन-नित्योपयोगीनि वस्तूनि यथा पात्राणि वस्त्रपात्राणि (यस्मिन् सुवर्णपादपोशाः अपि सम्मिलिताः आसन्) खाद्यानि पेयानि (हरिण-शश-शाकोपस्कर इत्यादीनि) विभिन्नप्रकारकाणि वस्तूनि च सम्मिलितानि भवन्ति स्म । एतानि सर्वाणि वस्तूनि शकटैः उष्ट्रैः हस्तिभिः भारवाहकैः अन्यैः पशुभिः च नीयन्ते स्म । अनया विशालसेनया सह संगीतकाराः पटहान् दुन्दुभिं तूर्यादिकं च वाद्यं वादयन्तः चलन्ति स्म ।

राजसेना यस्मात् नगरात् ग्रामात् वा भूत्वा गच्छति स्म तत्रत्यैः निवासिभिः राजसेनायाः सत्कारः करणीयः भवति स्म । ते दध्नः गुडस्य पुष्पाणां च उपहारान् आनयन्ति स्म । राजसेनायां संलग्न-पशुभ्यः घासादीनि अपि यच्छन्ति स्म । ते जनाः नृपेण सह अपि मेलितुम् इच्छन्ति स्म, यतः स्वदूषणम् अथवा काञ्चित् समस्याम् नृपस्य पुरतः निवेदयितुं शक्नुयुः ।

परन्तु एताः सेनाः स्वपृष्ठे विनाशस्य विध्वंसस्य च चिह्नानि त्यजन्ति स्म । प्रायः ग्राम्यजनानां पर्णकुटीरान् हस्तिनः उत्पाटयन्ति स्म, वणिजाम् समूहेषु योजिताः वृषभाः नृपयात्रायाः भीत्वा पलायन्ते स्म । बाणभट्टः वर्णयति यत् – सम्पूर्णं विश्वं धूलिमग्नं भवति स्म ।

सेनया सह नीतवस्तूनां सूचीं करोतु । ग्रामवासिनः नृपाय किं किं स्वीकृत्य आगच्छन्ति स्म ?

अन्यत्र

षष्ठे मानचित्रे (पृष्ठम् ८४-८५) अरबदेशम् अन्विष्यतु । मरुभूम्यां सत्याम् अपि अरबदेशः यातायातस्य कश्चित् महत् केन्द्रम् आसीत् । वस्तुतः अरबवणिजः नाविकाः च भारतयूरोपयोः मध्ये समुद्रीय-वाणिज्यस्य वर्धापने काञ्चित् महत्त्वपूर्णां भूमिकाम् ऊढवन्तः । अरबनिवासिषु अन्येषु जनेषु बेदुइनजनाः आसन्, ये यायावरसमूहाः भवन्ति स्म । एते मुख्यरूपेण उष्ट्रेषु आश्रिताः भवन्ति स्म, यतो हि एषः उष्ट्रः तादृशः दृढः पशुः अस्ति यः मरुभूमौ अपि स्वस्थतया स्थातुं शक्नोति । प्रायः १४०० वर्षेभ्यः पूर्वं पैगम्बरमुहम्मदः अरबदेशे इस्लामनामकस्य कस्यचित् नूतनधर्मस्य प्रारम्भं कृतवान् । ईसायीधर्मः इव इस्लामधर्मः अपि अल्लाहं सर्वोपरि मन्यते, तदनन्तरं सर्वे समानाः इति अङ्गीकृताः । अत्र इस्लामधर्मस्य पवित्रग्रन्थस्य *कुरानस्य* कश्चित् अंशः प्रदत्तः अस्ति –

यवनानाम्, आस्थावताम्, भक्तानाम्, सत्यनिष्ठानाम्, धैर्यवतां स्थितप्रज्ञानाम्, दानिनाम्, व्रतिनाम्, पूतात्मनाम्, नित्याल्लाहोपासकानां च स्त्रीपुरुषाणां कृते अल्लाहः क्षमां पुरस्कारं च निर्धारितवान् अस्ति । गतेषु शतवर्षेषु इस्लामधर्मः उत्तरीये अफ्रीकायादेशे स्पेनदेशे ईरानदेशे भारते च प्रसृतः । अरबनाविकाः, ये पूर्वम् एव एतस्य उपमहाद्वीपस्य तटीयनिवासस्थानैः परिचिताः आसन्, अधुना आत्मना सह एतं नूतनं धर्मम् अपि आनीतवन्तः । अरबदेशस्य सैनिकाः प्रायः १३००वर्षेभ्यः पूर्वं सिंधप्रान्तं (वर्तमानपाकिस्तानं) पराजितवन्तः आसन् ।

षष्ठे मानचित्रे तान् मार्गान् अन्विष्यतु, यैः मार्गैः नाविकाः सैनिकाः च एतम् उपमहाद्वीपम् आगतवन्तः स्युः ।

उपयोगिशब्दाः

प्रशस्तिः
आर्यवर्त्तः
दक्षिणापथः
वंशावली
आनुवंशिकः
पदाधिकारी
क्षेत्रपतिः
सभा
नगरम्

कल्पयतु

हर्षवर्धनस्य सेना अग्रिमसप्ताहे भवतां ग्रामे आगमिष्यति । भवतः पितरौ एतस्याः स्वागतार्थं सज्जां कुरुतः । वर्णयतु यत् परस्परं मातापितरौ किं वदतः, सज्जार्थं च किं कुरुतः ।

आगच्छन्तु चर्चां कुर्मः

1. उचितान् अनुचितान् च वदतु –
   - क) हरिषेणः गौतमीपुत्रस्य श्रीसातकर्णिनः प्रशंसायां प्रशस्तिम् अलिखत् ।
   - ख) आर्यावर्त्तस्य शासकाः समुद्रगुप्ताय उपहारान् आनयन्ति स्म ।
   - ग) दक्षिणापथे द्वाद्वशशासकाः आसन् ।
   - घ) गुप्तशासकानां नियन्त्रणे द्वे महत्त्वपूर्णकेन्द्रे मदुरैतक्षशिले आस्ताम् ।
   - ङ) ऐहोलः पल्लवानां राजधानी आसीत् ।
   - च) दक्षिणभारते स्थानीयसभाः शताब्दान् यावत् कार्यं अकुर्वन् ।
2. एतादृशानां त्रयाणां लेखकानां नामानि ज्ञापयतु, ये हर्षवर्धनस्य विषये लिखितवन्तः ।
3. एतस्मिन् युगे सैन्यसङ्घटने कानि कानि परिवर्तनानि आगतानि ?
4. भवान् एतस्य कालस्य प्रशासनिक-व्यवस्थायां कानि कानि नूतनानि वस्तूनि पश्यति ।

काश्चन महत्त्वपूर्णतिथयः

- गुप्तवंशस्य प्रारम्भः (१७००वर्षेभ्यः पूर्वम्)
- हर्षवर्धनस्य शासनम् (१४००वर्षेभ्यः पूर्वम्)

आगच्छन्तु कृत्वा पश्यामः

5. समुद्रगुप्तस्य भूमिकां निर्वोढुम् अरविन्देन किं किं कर्तव्यं भवेत् ? एतस्मिन् विषये भवान् किम् अनुभवति ?
6. किं प्रशस्तीः पठित्वा सामान्यजनाः स्वतः अवगच्छन्तः स्युः ? सकारणम् उत्तरं वदतु ।

आगच्छतु स्मरामः कुर्मः



7. यदि भवता स्ववंशावली निर्मातव्या स्यात् तर्हि भवान् तत्र केषां जनानां समावेशं करिष्यति ? भवान् कति वंशानुक्रमान् एतस्मिन् सम्मिलितान् करिष्यति ? एकां तालिकां रचयतु अपि च तां वर्णैः पूरयतु।
8. अद्यत्वे युद्धस्य प्रभावः जनसाधारणस्य उपरि कथं भवति ?

इति एकादशोऽध्यायः

अध्यायः – 12

भवनानि चित्राणि पुस्तकानि च

मरुतसामिः लौहस्तम्भः च

मरुतसामिः अद्य बहुप्रसन्नः आसीत् । तस्य भ्राता तं चक्रासन्दे उपावेश्य कुतुबमीनारं दर्शयन् प्रसिद्धस्य लौहस्तम्भस्य पुरतः आनीतवान् । धूलिपूर्णैः प्रस्तरीयैः च मार्गैः उत्प्लुत्य अत्र पर्यन्तम् आगमनं अतिकठिनम् आसीत् । स्वस्य एतादृशम् अनुभवं मरुतसामिः कदापि न विस्मरिष्यति ।

लौहस्तम्भः

लौहस्तम्भः

देहल्यां महरौली-स्थाने कुतुबमीनारस्य परिसरे स्थितः अयं लौहस्तम्भः भारतीय-शिल्पकाराणां कुशलतायाः किञ्चित् अद्भुतम् उदाहरणम् अस्ति । एतस्य औन्नत्यं ७.२मीटर-परिमितं भारश्च ३टनात् अधिकः अस्ति । एतस्य निर्माणं प्रायः १५००वर्षेभ्यः पूर्वम् अभवत् । एतस्य विषये सूचनां वयम् एतस्मिन् लिखिताभिलेखेन प्राप्नुमः । एतस्मिन् स्तम्भे चन्द्रनामकस्य कस्यचित् शासकस्य उल्लेखः अस्ति, यः सम्भवतः गुप्तवंशीयः आसीत् । आश्चर्यपूर्णं तथ्यम् इदम् अस्ति यत् एतावद्भ्यः वर्षेभ्यः पश्चादपि एतस्मिन् अयोमलः(जंग) न संलग्नः ।

इष्टिकामयानि पाषाणमयानि च भवनानि

अस्माकं शिल्पिनां कौशलस्य उदाहरणानि स्तूपसदृशेषु भवनेषु दृष्टिगोचराणि भवन्ति । बौद्धचैत्यस्य (स्तूप इत्यस्य) शाब्दिकः अर्थः उन्नतभूभागः (टीला) भवति, यद्यपि मृदाकूटाः विभिन्नाकाराः आसन् – कदाचित् गोलाकाराः कदाचिच्च लम्बतायुक्ताः कदाचित् लघवः कदाचित् विशालाः च भवन्ति स्म । तेषु सर्वेषु च काचित् समानता अस्ति । प्रायः एतेषु बौद्धचैत्येषु कश्चित् लघुपुटकः स्थापितः वर्तते । एतेषु पुटकेषु बुद्धस्य अथवा तस्य अनुयायिनाम् शारीरिकावशेषाः यथा दन्ताः अस्थीनि च स्थाप्यन्ते स्म, अथवा तैः प्रयुक्तं किञ्चित् वस्तु अथवा कश्चित् बहुमूल्यपाषाणः मुद्राः वा स्थापिताः वर्तन्ते ।

एषा धातुमञ्जूषा उच्यते । प्रारम्भिकः बौद्धचैत्यः धातुमञ्जूषायाः उपरि स्थापितः उन्नतभूभागः भवति स्म । अनन्तरकाले उन्नतभूभागः इष्टिकाभिः आव्रियते स्म, अनन्तरकाले च सः मन्दिरकलशाकारैः विलिखितपाषाणैः आच्छादितः ।

प्रायः मृदाकूटान् परितः परिक्रमाय कश्चित् वृत्ताकारपथः भवति स्म, यः प्रदक्षिणापथः इति उच्यते । असौ मार्गः स्तम्भकरेण (रेलिंग इत्यनेन) आव्रियते स्म, या वेदिका इति उच्यते । वेदिकायां प्रवेशद्वाराणि निर्मितानि भवन्ति स्म । स्तम्भकराः तोरणाः च प्रायः मूर्तिकलाभिः सुन्दरकलाकृतिभिः च अलङ्कृताः भवन्ति स्म ।

सप्तमे मानचित्रे(पृष्ठम् – ११३) अमरावतीम् अन्विष्यतु । अत्र कस्मिंश्चित् काले भव्यबौद्धचैत्यः भवति स्म । प्रायः २०००वर्षेभ्यः पूर्वम् एतस्य बौद्धचैत्यस्य अलङ्करणाय शिलासु चित्राणि चित्रितानि ।

कदाचित् उपत्यकाः छित्त्वा कृत्रिमगुहाः रच्यन्ते स्म । एतादृशीनां गुहानाम् अलङ्करणं मूर्तिभिः चित्रैः च क्रियते स्म ।

एतस्मिन् काले केषाञ्चित् आरम्भिक-हिन्दु-मन्दिराणाम् अपि निर्माणं जातम् । एतेषु मन्दिरेषु विष्णोः शिवस्य दुर्गासदृश-देवतानां च अर्चनं भवति स्म । मन्दिराणां महत्त्वपूर्णतमः भागः गर्भगृहं भवति स्म, यत्र मुख्यदेवस्य देव्याः वा प्रतिमा स्थाप्यते स्म । अस्मिन् स्थाने पुरोहिताः धार्मिकानुष्ठानि कुर्वन्ति स्म भक्ताश्च तत्र अर्चन्ति स्म ।

उपरि - साँची इत्यस्य महान् बौद्धचैत्यः (मध्यप्रदेशे विद्यते)। एतादृशानां बौद्धचैत्यानां निर्माणं बहूनि शतं वर्षाणि यावत् अचलत् । अस्मिन् बौद्धचैत्ये इष्टिकानां प्रयोगः सम्भवतः अशोककालीनः (अष्टमः अध्यायः) अस्ति । किन्तु स्तम्भकरः प्रवेशद्वारं च अर्वाचीन-शासकानां काले योजितम् ।

वामतः – अमरावतीनगर्याः काचित् शिल्पकृतिः।

एतद् चित्रं दृष्ट्वा एतस्य वर्णनं करोतु।



वामतः उपरि - उत्तरप्रदेशस्य "भितरगाँव" इत्यस्य प्रारम्भिक-मन्दिरम् । इदं प्रायः १५००वर्षेभ्यः पूर्वं पक्वेष्टिकाभिः पाषाणैः च निर्मितम् आसीत् । दक्षिणतः उपरि - महाबलिपुरमस्य एकाष्मिक-मन्दिराणि । एतेषु प्रत्येकं मन्दिरं विशालाम् उपत्यकां कर्तित्वा निर्मितम् । अतः एतानि "एकाश्म" इति नाम्ना ख्यायन्ते । इष्टिकाभिः निर्मितमन्दिरेभ्यः एतादृशानि मन्दिराणि सर्वथा भिन्नानि भवन्ति स्म । इष्टिकाभिः निर्मितभवनेषु अधोभागात् इष्टिकानाम् एकैकं स्तरं संयोजयन्तः ऊर्ध्वं प्रति नयन्ति , अथवा एकस्याम् इष्टिकायां द्वितीयाम् इष्टिकां क्रमेण संस्थाप्य इष्टिकानां प्रयोगः क्रियते अपि च अनेनैव क्रमेण भित्तिः उपरि नीयते, अपरञ्च शिलां कर्तित्वा निर्मीयमाणानि मन्दिराणि शिलाकर्तकाः उपरिष्टात् अधस्तनीयक्रमेण निर्मान्ति । एतेषां मन्दिराणां निर्माणकाले शिलाकर्तकाः कासां समस्यानां सम्मुखीकरणाय बाध्याः स्युः,तासां समस्यानां सूचीं निर्मातु ।

दक्षिणतः – ऐहोलस्थं दुर्गामन्दिरम्। इदं मन्दिरं प्रायः १४००वर्षेभ्यः पूर्वं निर्मितम् आसीत् ।

प्रायः गर्भगृहं पवित्रस्थानम् इति दर्शयितुं भीतरगांवसदृशमन्दिरेषु तस्य उपरि पर्याप्तदैर्घ्यपर्यन्तं निर्माणं क्रियते स्म, यत् शिखरम् इति उच्यते स्म । शिखरनिर्माणस्य कठिनकार्याय सावधानं योजनायाः निर्माणं करणीयं भवति स्म । प्रायशः मन्दिरेषु मण्डपनामधेयं किञ्चित् स्थानं भवति स्म । इदं स्थानं सभागारम् इति नाम्ना ख्यायते स्म, यत्र जनाः एकत्रिताः भवन्ति स्म ।

त्रयोदशोत्तरशततमे पृष्ठे सप्तमे मानचित्रे महाबलिपुरमनगरं ऐहोलनगरं च अन्विष्यतु । एतयोः नगरयोः पाषाणमयानि कानिचन उत्कृष्टमन्दिराणि सन्ति । तेषु कानिचन मन्दिराणि अत्र प्रदर्शितानि सन्ति ।

बौद्धचैत्याः मन्दिराणि च केन प्रकारेण निर्मीयन्ते स्म ?

बौद्धचैत्यानां मन्दिराणां च निर्माणस्य प्रक्रियायाम् अनेकाः अवस्थाः आयान्ति स्म। एतेषां निर्माणाय प्रभूतं धनं व्ययीकरणीयं भवति स्म। अतः सामान्यतः नृपाः राजमहिष्यः चैव एतेषां निर्मापणस्य निश्चयं कुर्वन्ति स्म। प्राथमिकं कार्यं शोभनानां पाषाणानाम् अन्वेषणं कृत्वा पुनः च शिलाखण्डान् खनित्वा तेषां निष्कासनं करणीयं भवति स्म। पुनः मन्दिरस्य बौद्धचैत्यस्य च कृते विचारिते निश्चितस्थाने ते पाषाणाः प्रापणीयाः भवन्ति स्म। अत्र शिलानां कर्तनं कृत्वा शिलाखण्डाः स्तम्भानां भित्तिद्वाराणाम् कुट्टिमानां छदीनां च आकारेण आकारिताः क्रियन्ते स्म । एतेषु सर्वेषु सिद्धेषु सत्सु तेषां शिलाखण्डानां समुचिते स्थाने स्थापनम् अतिकठिनं कार्यं भवति स्म।



एतादृशानां शोभनानाम् आकाराणां निर्मातृभ्यः शिल्पकारेभ्यः च पारिश्रमिकं सम्भवतः राजानः राजमहिष्यः चैव यच्छन्ति स्म । एतदतिरिच्य एतेषु बौद्धचैत्येषु मन्दिरेषु च आगन्तारः भक्ताः यान् उपहारान् स्वीकृत्य आयान्ति स्म, तैः भवनस्य सज्जीकरणं क्रियते स्म । यथा हस्तिदन्त-निर्मातृभिः, श्रमिकसङ्घटनैः च सांच्याः कस्यचित् अलङ्कृत-प्रवेश-द्वार-निर्माणस्य व्ययः निर्वोढः।

वामतः उडीसायाः जैनमठः। काञ्चित् उपत्यकां खनित्वा तत्र तलद्वययुतं भवनं निर्मितम् । प्रकोष्ठानां प्रवेशद्वाराणि सावधानं पश्यतु । अत्र जैनभिक्षवः निवसन्ति स्म तथा च ते ध्यानं कुर्वन्ति स्म । द्वितीये अध्याये पञ्चदशपृष्ठे प्रदत्तचित्रस्य अत्र दर्शित-गुहाचित्रस्य च मध्ये कः भेदः अस्ति ?

अधः राष्ट्रियसङ्ग्राहलये नवदेहलीस्थे कस्याश्चित् प्रतिमायाः चित्रम्।
किं भवान् अत्र द्रष्टुं पारयति यत् केन प्रकारेण गुहानां खननं कृतं स्यात्?

एतेषां भवनानाम् अलङ्करणाय धनदातृषु वणिजः, कृषकाः, मालाकाराः, सौगन्धिकाः, लौहकाराः, सुवर्णकाराः तथा च एतादृशाः बहवः स्त्रीपुरुषाः सम्मिलिताः आसन् येषां नामानि स्तम्भेषु स्तम्भकरेषु भित्तिषु च अपि चित्रितानि सन्ति।

अतः यदा भवान् एतानि स्थानानि द्रष्टुं गच्छति तदा स्मरतु यत् कियन्तः जनाः एतेषां निर्माणाय स्वयोगदानं दत्तवन्तः आसन्।

एकनवतिपृष्ठे नवमाध्याये प्रदत्तचित्रम् इव भवान् अपि मन्दिराणां बौद्धचैत्यानां च निर्माणकाले आगम्यमानानां विभिन्नचरणानां चित्राणि रचयतु।

चित्रकला

सप्तमे मानचित्रे अजन्ताम् अन्विष्यतु । इदं तत् स्थानम् अस्ति यत्र पर्वतेषु शताधिकवर्षाणाम् अवधौ अनेकाः गुहाः खनिताः। एतस्मिन् स्थाने अधिकतया बौद्धभिक्षूणां कृते विहाराः निर्मिताः आसन् । अत्र तेषां विहाराणां कानिचन उदाहरणानि चित्ररूपेण प्रदत्तानि सन्ति । गुहानाम् अन्तः अन्धकारत्वात् प्रभूतानि चित्राणि दीपशिखानां प्रकाशे रचितानि आसन् । एतेषां चित्राणां वर्णानि १५००वर्षाणां पश्चात् अपि द्युतिमन्ति सन्ति । एतानि वर्णानि पादपैः खनिजैः च निर्मितानि आसन् । एतासां महतीनां कृतीनां कर्तारः कलाकाराः च अज्ञातनामानः सन्ति।

अजन्तायाः चित्राणि भवान् एतेषु प्रत्येकं चित्रे यत् पश्यति तस्य वर्णनं करोतु।

पुस्तकानां संसारः

एतस्मिन् युगे अनेकेषां प्रसिद्धमहाकाव्यानां रचना कृता । एतासु उत्कृष्टरचनासु स्त्रीपुरुषाणां वीरगाथाः सन्ति तथा च देवतासम्बद्धाः कथाः सन्ति ।

प्रायः अष्टादशशतात् वर्षेभ्यः (१८००) पूर्वं कस्यचित् प्रसिद्धस्य तमिलमहाकाव्यस्य सिलप्पदिकारम" इत्यस्य रचना इलांगो-नामकेन कविना कृता । एतस्मिन् महाकाव्ये कोवलन् इति नाम्नः वणिजः कथा अस्ति । सः पुहार इति स्थाने निवसति स्म । स्वभार्यायाः कन्नग्याः उपेक्षां कृत्वा सः कयाचित् माधवीनामधेयया नर्तक्या सह प्रेम आरब्धवान् । तत्पश्चात् सः कन्नगी च पुहारं परित्यज्य मदुरैनगरं गतवन्तौ । तत्र पाण्ड्यनृपस्य राजसभासद् मणिकारः कोवलम्-वर्ये चौर्यस्य असत्यारोपं कृतवान्, ततः राजा तं मृत्युदण्डेन दण्डितवान् । कन्नगी या अधुना अपि तस्मिन् स्निह्यति स्म, एतस्य अन्यायस्य कारणात् सा दुःखग्रस्ता रुष्टा च अभवत् । सा मुदुरैनगरम् विनाशितवती ।

सिलप्पदिकारम" इत्यस्मात् गृहीतं किञ्चित् वर्णनम्

अत्र कविः कन्नग्याः दुःखस्य वर्णनम् अनेन प्रकारेण कृतवानस्ति –

"भोः! मम दुःखं तु पश्यतु, भवान् मां सान्त्वयितुम् अपि न शक्नोति । किम् एतत् सत्यम् अस्ति यत् विशुद्धसुवर्णात् अपि सुन्दरतरा भवतः काया मलिना, धूलिधूसरिता च अस्ति, कथम् एवमेव अत्र पतिता अस्ति ? अयं कुत्रत्यः न्यायः अस्ति यत् गोधूल्याः एतस्यां स्वर्णिमाभायां फूलमालाभिः आवृत्तः सुन्दरवक्षःस्थलधारी भवान् भूमौ पतितः अस्ति । अहम् एकाकिनी असहाया हताशा च भूत्वा अत्र स्थिता अस्मि । किम् ईश्वरः नास्ति ? किम् एतस्मिन् देशे ईश्वरः नास्ति ? परन्तु किं तस्मिन् स्थाने ईश्वरः वसितुं शक्नोति यत्रत्य-नृपस्य असिः निर्दुष्टानां नवागन्तुकानां प्राणान् हरति ? किम् ईश्वरः नास्ति ? नास्त्येव ?

कश्चित् इतोऽपि तमिलमहाकाव्यं मणिमेखलयी इति प्रायः चतुर्दशशतवर्षेभ्यः पूर्वं सत्तनारद्वारा लिखितम् अस्ति । अस्मिन् काव्ये कोवलन्-माधव्योः पुत्र्याः कथा अस्ति । एताः रचनाः बहुभ्यः शताब्दीभ्यः पूर्वम् एव व्यलुप्यन्त । तासां पाण्डुलिपयः पुनः शतात् वर्षेभ्यः पूर्वम् अलभन्त ।

अन्ये संस्कृतस्य महाकाव्यानां लेखकाः आसन् - यथा कालिदासः यस्य विषये भवन्तः एकादशाध्याये पठितवन्तः ।

पुरातन-कथानां सङ्कलनं संरक्षणं च

हिन्दूधर्मसम्बद्धाः कथाः याः प्राचीनकालादारभ्य प्रचलिताः आसन्, एतस्मिन् काले एव लिखिताः। एतासु पुराणानि अपि सम्मिलितानि सन्ति । पुराणस्य शाब्दिकः अर्थः अस्ति प्राचीनम् अथवा पुराणम् । पुराणेषु देवतानां देवीनां च पूजायाः विधयः प्रदत्ताः

मेघदूतस्य कश्चित् श्लोकः

अत्र तस्य प्रसिद्धतम-रचनायाः मेघदूतात् कश्चित् अंशः उद्धृतः अस्ति। यत्र कश्चित् विरही प्रेमी प्रावृषः मेघं स्वसन्देशवाहकं कर्तुं कल्पयति।

पश्य अत्र कथं कविना मेघान् उत्तरदिशां प्रति नयतः शीतलवायोः वर्णनं कृतम् अस्ति –

"भवतां जलबिन्दुनिपातैः मृदुभूतमृदायाः ईषत्सौरभपूर्णम्
हस्तिश्वासे उषिता
वन्यपलाशं पचमाना,
भवता सह शीतलवायुः मन्दं मन्दं प्रवहिष्यति।

किं भवन्तं प्रतीयते यत् कालिदासं प्रकृतिप्रेमी इति वक्तुं शक्नुमः ?

सन्ति। एतदतिरिच्य एतेषु पुराणेषु संसारस्य सृष्टेः नृपाणां च विषये अपि कथाः सन्ति।

पुराणानि आधिक्येन सरलसंस्कृतेन श्लोकबद्धक्रमेण च लिखितानि सन्ति, यस्मात् सर्वे तानि श्रोतुम् अवगन्तुं च पारयेयुः। स्त्रियाः शूद्राः च ये वेदम् अध्येतुम् अधिकृताः न आसन् ते अपि एतानि पुराणानि श्रोतुं शक्नुवन्ति स्म। पुराणानां पाठं पूजकाः मन्दिरेषु कुर्वन्ति स्म, यं श्रोतुं जनाः तत्र आयान्ति स्म।

संस्कृतस्य द्वे महाकाव्ये महाभारतं रामायणं च चिरकालात् लोकप्रियाः सन्ति। भवत्सु बहवः बालाः एताभ्यां महाकाव्याभ्यां परिचिताः स्युः। महाभारते कौरव-पाण्डवयोः परस्परं जातस्य युद्धस्य कथा वर्णिता अस्ति। एतस्य युद्धस्य सङ्घर्षस्य वा उद्देश्यं पुरु-वंशस्य राजधान्याः हस्तिनापुरस्य राजसिंहासनस्य प्राप्ति आसीत्। इयं कथा तु बहुपुरातनी अस्ति परन्तु अद्य वयं एतां येन रूपेण जानीमः सा प्रायः १५००वर्षेभ्यः पूर्वं लिखिता वर्तते। इत्थं मन्यते यत् पुराणानां महाभारतस्य च रचना व्यासनामकेन ऋषिणा कृता अस्ति। महाभारते एव भगवद्गीता अपि अस्ति यस्याः विषये भवान् दशमाध्याये पठितवान् आसीत्।

रामायणस्य कथा कोशलराजकुमारस्य रामस्य विषये अस्ति। तस्य पिता तस्य कृते वनवासस्य आज्ञां दत्तवान्। वने लङ्कापतिः रावणः तस्य भार्यायाः सीतायाः अपहरणम् कृतवान्। सीतां प्रत्यानेतुं रामेण युद्धं करणीयम् अभूत्। सः विजयीभूय कोशलस्य राजधानीम् अयोध्यां प्रत्यागतवान्। महाभारतम् इव रामायणम् अपि काचित् प्राचीनकथा अस्ति, या पश्चात् लिखितरूपं प्राप्नोत्। संस्कृतरामायणस्य लेखकः वाल्मीकिः इति मन्यते।

एतस्य उपमहाद्वीपस्य विभिन्नभागेषु महाभारतस्य रामायणस्य च भिन्नानि भिन्नानि रूपान्तराणि लोकप्रियाणि सन्ति। एतेषाम् आधारेण नाटक-गीत-नृत्यपरम्पराः अपि विकसिताः। जानातु यत् भवतां राज्ये कतमं रूपान्तरणं प्रचलितम् अस्ति।

सामान्यजनैः कथिताः कथाः

सामान्यजनाः अपि कथाः कथयन्ति स्म,कविताः गीतानि च रचयन्ति स्म, गीतानि गायन्ति स्म, नृत्यन्ति स्म नाटकानां च मञ्चनं कुर्वन्ति स्म । एतासु उपर्युक्तविधासु काश्चन कथाः तु पंचतन्त्रकथारूपेण जातककथारूपेण च सङ्कलिताः अपि च अनेन प्रकारेण ताः सुरक्षिताः सन्ति । जातककथाः तु प्रायः बौधचैत्यानां (स्तूप) स्तम्भकरेषु अजन्तायाः च चित्रेषु दर्श्यन्ते स्म ।

वानरनृपस्य कथा

कस्मिंश्चित् काले वानराणां कश्चित् महान् राजा अभवत् । सः हिमालये गङ्गायाः तटे स्वस्य अशीतिसहस्रेण अनुयायिभिः सह निवसति स्म । एतेभ्यः वानरेभ्यः विशिष्टप्रकारस्य आम्राणि अतीव रोचन्ते स्म । एतानि आम्राणि बहुमधुराणि भवन्ति स्म । एतावन्ति स्वादिष्टाम्राणि धरातले न प्रादुर्भवन्ति स्म ।

एकस्मिन् दिने पक्वाम्रं गङ्गानद्यां पतित्वा प्रवहत् वाराणसीं प्राप्नोत् । तस्मिन् काले तत्रत्यः राजा नद्यां स्नाति स्म । सः तम् आम्रं प्राप्नोत्, तत् आम्रम् आस्वाद्य सः आश्चर्यचकितः अभवत् । सः स्वस्य राज्यस्य वन्यनिरीक्षकान् अपृच्छत्,

यत् किं ते एतस्य आम्रफलस्य वृक्षम् अन्वेष्टुं शक्नुवन्ति अथवा नैव । ते निरीक्षकाः नृपं हिमालयस्य उपत्यकाम् अनयन् ।

ताम् उपत्यकां प्राप्य नृपः तस्य राजसभासदः च बहूनि आम्राणि अखादन् । रात्रौ राजा अपश्यत् यत् वानराः अपि सुपक्वानि आम्राणि सहर्षम् आस्वादयन्ति । नृपः एतद् दृष्ट्वा खिन्नः अभवत्, अतः सः तान् वानरान् हन्तुं निर्णीतवान् । वानराणां राजा स्वप्रजां रक्षितुं काञ्चित् योजनाम् अकल्पयत् । सः आम्रवृक्षाणां शाखाः त्रोटित्वा ताः परस्परं संमेल्य नद्याः उपरि कस्यचित् सेतोः निर्माणं कृतवान् । तस्य सेतोः प्रान्तभागं सः एकस्मात् पक्षात् तावत्पर्यन्तम् अगृह्णीत् यावत्पर्यन्तं तस्य समग्रा प्रजा नद्याः पारे न प्राप्नोत् । परन्तु अनेन प्रयासेन सः तावान् श्रान्तः अभवत् यत् मरणासन्नः भूत्वा भूमौ अपतत् ।

नृपः यदा एतत् सर्वं अपश्यत् तदा सः वानरराजस्य प्राणरक्षणाय बहुप्रयासम् अकरोत् । परन्तु सः सफलः न अभवत् । वानरराजस्य मृत्यौ सः शोकसन्तप्तः अभवत्, अपि च राजा तं सर्वथा सममानयत् ।

मध्यभारते भरहुतस्य कस्माच्चित् बौद्धचैत्यात् लब्धपाषाणे लिखितचित्रे एषा उपर्युक्तकथा दर्शिता अस्ति ।

किं भवान् ज्ञापयितुं शक्नोति यत् एतस्याः कथायाः कतमः भागः अस्मिन् चित्रे प्रदर्शितः अस्ति ? अयं भागः किमर्थं चितः स्यात् ?

एतासु उपर्युक्तकथासु काचित् कथा अग्रिमे पृष्ठे प्रदत्ता अस्ति -

विज्ञानस्य पुस्तकानि

एतस्मिन् काले एव गणितज्ञः खगोलशास्त्री च आर्यभट्टः संस्कृतेन आर्यभट्टीयम नामकं पुस्तकम् अलिखत् । एतस्मिन् पुस्तके सः अलिखत् यत् अहोरात्रं पृथिव्याः स्वाक्षे भ्रणमस्य कारणात् भवति परन्तु अनुभूयते अस्माभिः यत् सूर्यः प्रतिदिनम् उदेति अपि च अस्तं गच्छति । सः आर्यभट्टः ग्रहणस्य विषये अपि वैज्ञानिकतर्कं दत्तवान् । सः वृत्तस्य परिधिं मापनस्य अपि विधिम् अन्विष्टवान्, यः विधिः प्रायः तावान् एव समीचीनः अस्ति यथा अद्यतनप्रयुक्तविधिः वर्तते ।

शून्यम्

अङ्कानां प्रयोगः आदितः एव भवति स्म, परन्तु अधुना भारतस्य गणितज्ञाः शून्यस्य कृते कस्यचित् नूतनस्य चिह्नस्य आविष्कारम् अकुर्वन् । सङ्ख्यानस्य इयं पद्धतिः अरबजनैः प्रयुक्ताः तदारभ्य एषा यूरोपे अपि प्रसृता । अद्य अपि एषा आविश्वं प्रयुज्यते ।

रोमदेशवासिनः शून्यस्य प्रयोगं विना गणनां कुर्वन्ति स्म । तस्मिन् विषये इतोऽपि ज्ञातुं प्रयतन्तु ।

अन्यत्र

कागदानि अद्य अस्माकं दैनन्दिनजीवनस्य भागभूतानि जातानि सन्ति । यानि पुस्तकानि वयं पठामः तानि कागदेषु एव मुद्रितानि भवन्ति, अनेन एव प्रकारेण लेखनाय अपि वयं कागदस्य उपयोगं कुर्मः । कागदस्य आविष्कारः प्रायः १९००वर्षेभ्यः पूर्वं लूननामधेयेन केनचित् जनेन चीनदेशे कृतः । सः पादपानां तन्तून् वस्त्राणि रज्जून् वृक्ष-वल्कलं च कूटित्वा तच्च चूर्णीकृत्य जलेन क्लेदितवान् । पुनः तत् आर्द्रगोलकं नोदित्वा तस्मात् जलम् अपसारितवान् पुनः तस्य आर्द्रगोलकस्य शोषणं कृत्वा कागदं निर्मिवान् । अद्य अपि हस्ताभ्यां कर्गदं निर्मातुम् एतस्य विधेः एव उपयोगः क्रियते ।

कागदस्य निर्माणस्य अयं विधिः शताब्दान् यावत् गुप्तरूपेण स्थापितः । प्रायः १८०० वर्षेभ्यः पूर्वं अयं विधिः कोरियादेशं यावत् प्रसृता ।

तदनन्तरं शीघ्रमेव जापानदेशं यावत् इयं प्रसृता । प्रायः १४०० वर्षेभ्यः प्राक् इयं बगदादं प्राप्नोत् । पुनः बगदादतः इयं सम्पूर्णे यूरोपे, अफ्रीकायाः एशियायाः च अन्येषु भागेषु प्रसृता । एतस्मिन् महाद्वीपे अपि कागदस्य विषये सूचना बगदादतः एव आगच्छत् ।

प्राचीनभारतस्य पाण्डुलिपयः केन वस्तुना सज्जीक्रियन्ते स्म ? (सङ्केतः - अध्यायः – १)

कल्पयतु

भवान् कस्यचित् मन्दिरस्य मण्डपम् उपविष्टवान् स्यात् । स्वम् परितः दृश्यस्य वर्णनं करोतु ।

बौद्धचैत्यः
मन्दिरम्
चित्रकला
महाकाव्यम्
कथा
पुराणम्
गणितम्
मन्दिरम्

आगच्छन्तु स्मरणं कुर्मः

१. निम्नलिखितानां सुमेलं करोतु ।

बौद्धचैत्यः (स्तूप)	देवीनां देवतानां च मूर्तेः स्थापनस्य स्थानम्
शिखरम्	उन्नतभूभागः (टीला)
मण्डपम्	बौद्धचैत्यं परितः वृत्ताकारपथः
गर्भगृहम्	मन्दिरे जनानां सम्मेलन-स्थानम्
प्रदक्षिणापथः	गर्भगृहस्य ऊपरि लम्बायमानं निर्माणम्

२. रिक्तस्थानानि पूरयतु –

क) _____कश्चन महान् गणितज्ञः आसीत् ।

ख) _____ देवीनां देवतानां च कथाः लभ्यन्ते ।

ग) _____ संस्कृतरामायणस्य लेखकः मन्यते ।

घ) _____अपि च _____द्वे तमिलकाव्ये स्तः ।

काश्चन महत्त्वपूर्णतिथयः

- बौद्धचैत्य-निर्माणस्य प्रारम्भः(२३०० वर्षेभ्यः पूर्वम्)
- अमरावती(२००० वर्षेभ्यः प्राक्)
- कालिदासः(१६००वर्षेभ्यः प्राक्)
- लौहस्तम्भः,भितर-ग्रामस्य मन्दिरम्, अजंतायाः चित्रकला,आर्यभट्टः (१५००वर्षेभ्यः पूर्वम्)
- दुर्गामन्दिरम्(१४००वर्षेभ्यः प्राक्)

आगच्छन्तु चर्चां कुर्मः

३. धातूनां प्रयोगे येषु अध्यायेषु चर्चा अभवत्,तेषाम् अध्यायानां सूचीं करोतु । धातुनिर्मितेषु केषु केषु वस्तुषु चर्चा अभवत् अथवा तानि दर्शितानि सन्ति ?

४. त्रिंशदधिकशतमे पृष्ठे लिखितकथां पठतु । येषां नृपाणां विषये भवान् षष्ठे एकादशे च अध्याये अपठत् तेभ्यः असौ वानरराजः कथं भिन्नः समानः वा आसीत् ?

५. इतोपि सूचनाः एकत्रीकृत्य कस्माच्चित् महाकाव्यात् काञ्चित् कथां श्रावयतु ।

आगच्छन्तु कृत्वा पश्यामः



६. दिव्याङ्गजनानां कृते भवनानि स्मारकाणि च कथं तेषां प्रवेशाय योग्यानि भवेयुः ? एतदर्थं परामर्शानां काञ्चित् सूचीं निर्मातु ।

७. कागदस्य अधिकाधिकोपयोगानां काञ्चित् सूचीं निर्मातु ।

८. अस्मिन् अध्याये वर्णितेषु स्थानेषु भवान् यदि एकस्य स्थानस्य दर्शनं लभेत तर्हि भवान् कतमं चेष्यति अपि च तत् एव किमर्थं चेष्यति ?

इति द्वादशोऽध्यायः

तिथिषु दृष्टिपातः

एतस्मिन् पुस्तके अस्माभिः २०००तमवर्षम् आरम्भिकबिन्दुरूपेण संस्थाप्य घटनानां प्रक्रियाणां च भवनस्य अनुमतितिथीनां सूचना प्रदत्ता अस्ति । परन्तु अन्यानि पुस्तकानि यानि भवान् पठति, तेषु तिथयः पृथक्प्रकारेण लिखिताः स्युः । एतेषु पुस्तकेषु तिथिभ्यः प्राक् प्रायः इति लिखितम् अस्ति ।

- यथा पुरापाषाणयुगस्य कृते (द्वितीयः अध्यायः) तिथयः लक्षाधिकवर्षेभ्यः पूर्वतनकालस्य रूपेण लिखिताः सन्ति ।
- मेहरगढे (तृतीयाध्यायः) कृषिपशुपालनयोः आरम्भिकतिथिः प्रायः ६०००ख्रिस्टाब्दात् पूर्वं प्रदत्ता अस्ति ।
- हडप्पायाः नगरीयविकासः प्रायः २७००तः १९००ख्रिस्ताब्दयोः मध्ये अभवत्
- ऋग्वेदस्य रचनाकालः प्रायः १५००तः १०००ख्रिस्ताब्दयोः मध्ये अभवत्
- महाजनपदानां गङ्गायाः च समतलक्षेत्रेषु नगराणां विकासः तथा च उपनिषद्-जैनधर्म-बौद्धधर्मसम्बद्धविचाराणाम् उदयः प्रायः ५००ख्रिस्ताब्दात् पूर्वम् अभवत्
- पश्चिमोत्तरयोः सिकन्दरस्य आक्रमणं प्रायः ३२७तः ३२५ख्रिस्ताब्दयोः प्राक् अभवत्
- चन्द्रगुप्तमौर्यस्य नृपपदालङ्करणं प्रायः ३२१ख्रिस्ताब्दात् पूर्वम् अभवत् ।
- अशोकस्य शासनकालः प्रायः २७२/२६८ख्रिस्ताब्दात् २३१ख्रिस्ताब्दयोः प्राक् अभवत् ।
- संगमसाहित्यस्य रचनाकालः प्रायः ३००ख्रिस्ताब्दपूर्वात् ३००ख्रिस्ताब्दः अस्ति ।
- कनिष्कस्य शासनं प्रायः ७८तः १००ख्रिस्ताब्दं यावत् आसीत् ।
- गुप्तसाम्राज्यस्य स्थापना प्रायः ३२०ख्रिस्ताब्दमध्ये अभवत् ।
- वल्लभीवर्यस्य परिषदि जैनसाहित्यस्य सङ्कलनम्,प्रायः ५१२/५२१ख्रिस्ताब्दे अभवत् ।
- हर्षवर्धनस्य शासनम् ६०६-६४७ईस्वीवर्षे अभवत् ।
- चीनियात्रिश्चैनत्सांगस्य भारतागमनं ६३० – ६४३ईस्वीवर्षे अभवत् ।
- पुलकेशिन्-द्वितीयस्य शासनम्,६०९ – ६४२ईस्वीवर्षे अभवत् ।

कासाञ्चित् घटनानां कृते यथा अशोकस्य शासनस्य आरम्भिकस्य तिथेः रूपेण भवान् एकाधिकतिथीः द्रष्टुं पारयति । इत्थम् एतदर्थम् अस्ति यतो हि इतिहासकाराणाम् एतस्मिन् विषये मतैक्यं नास्ति यत् समीचीना तिथिः का अस्ति । प्रश्नवाचकचिह्नेन सह प्रदत्ततिथयः एतं तथ्यं प्रति सङ्केतयन्ति यत् एताः तिथयः निश्चिताः न सन्ति ।

अग्रिमे वर्षे

अग्रिमे वर्षे अस्माकम् अतीतस्य विषये भवान् आधिक्येन पठिष्यति । एतस्मिन् भवान् अग्रिमसहस्रवर्षाणाम् इतिहासस्य विषये पठिष्यति, यस्य प्रारम्भः अष्टमशताब्दात् भविष्यति । एतस्मिन् भवान् –

- द्रक्ष्यति यत् पाण्डुलिपीः अभिलेखान् पुरातात्त्विकवस्तूनि मुख्यतः भवनानाम् अवशेषान् अतिरिच्य इतिहासस्य अवगमनाय इतोऽपि अन्यानि साधनानि भवन्ति ।
- नूतनानां राज्ञां राज्यानां च विषये अपि पठिष्यति, येषु मुगलसाम्राज्यं सम्मिलितं भविष्यति ।
- स्थापत्यकलायाः विषये इतोऽपि आधिक्येन ज्ञास्यति, यस्यां मन्दिराणां यवनमन्दिराणां दुर्गाणां अन्येषां भवनानां च विषये अपि सूचनाः भविष्यन्ति ।
- नगराणां विषये पठिष्यति, येषु शिल्पकाराणां व्यापारिणां नगरीयसंस्कृतेः च विषये सूचना भविष्यति ।
- आखेटक-सङ्ग्राहकानां पशुपालकानां कृषकाणां च विषये अपि पठिष्यति ।
- भवान् इदम् अपि पठिष्यति यत् केन प्रकारेण धार्मिकास्थासु तासां व्यवहारिकस्वरूपेषु अपि परिवर्तनानि अभवन् ।
- सङ्गीत-कवितयोः अन्यासां च साहित्यिक-रचनानां कृते कथं नूतनभाषाणां प्रयोगः अभवत् ।

एतस्य सर्वस्य अध्ययनकाले भवान् द्रक्ष्यति यत् एतावतां नूतनपरिवर्तनानाम् अतिरिक्तम् अतीतकालेन सह सम्पर्कसूत्रं निरन्तरम् अवर्तत । ध्यान यच्छन्तु यत् किं परिवर्तितं किं च स्वस्य पुरातनावस्थायाम् अतिष्ठत् ।


मानचित्रम् – 8
भारतस्य राजनैतिकमानचित्रम्
जम्मूकश्मीरम्
हिमाचल-प्रदेशः
पञ्जाबः
उत्तराखण्डम्
हरियाणा
देहली
राजस्थानम्
उत्तरप्रदेशः
चीनः
नेपालः
सिक्किमः
भूटानः
अरुणाचलप्रदेशः
असमः
नागालैण्डः
मेघालयः
बिहारः
मणिपुरम्
बाङ्गलादेशः
त्रिपुरा
मिजोरमम्
म्यांमारः
झारखण्डम्
पश्चिम-बङ्गालम्
गुर्जरप्रान्तः
मध्यप्रदेशः
छत्तीसगढः
उडीसा
महाराष्ट्रम्
तेलंगाना
यनमम्
(पुदुच्चेरी)
अरबसागरः
बङ्गालस्य अखातम्
गोवा
आन्ध्रप्रदेशः
कर्णाटकम्
पुदुच्चेरी
करायीकलम्
(पुदुच्चेरी)
माहे
(पुदुच्चेरी)
केरलम्
लक्षद्वीपः
अण्डमाननिकोबारद्वीपसमूहः
श्रीलङ्का
रेखाचित्रम्
मापकः न प्रदत्तः अस्ति।

टिप्पणी

टिप्पनि

टिप्पनि

टिप्पनि



राजारविवर्मा

जगदीशचन्द्रिकेशः

एतस्मिन् पुस्तके राजारविवर्मणः संक्षिप्तजीवनपरिचयः प्रदत्तः अस्ति, अपि च तात्कालिकधार्मिक-सामाजिक-सांस्कृतिक-घटनानां यथार्थशैल्या निर्मितदेवीनां नायर-जातीयस्त्रीणां च अनेकानि

सुन्दराणि चित्राणि तेषां संक्षिप्तविवरणानि च प्रस्तुतानि सन्ति।

मूल्यम् – 13 .50/ पेपरबैक / पृष्ठानि-१०३।

अधिकसूचनायै कृपया www.ncert.nic.inइति पश्यतु अथवा मुद्रणाधिकारपृष्ठे प्रदत्तसङ्केतेषु व्यापारप्रबन्धकेन सम्पर्कं करोतु।



ट्वर्ती मंदिर, महाबलिपुरम्

0655

राष्ट्रिय-शैक्षिकानुसन्धान-प्रशिक्षण-परिषद्
NATIONAL COUNCIL OF EDUCATIONL RESEARCH AND TRAINING

ISBN 81-7450-522-9